श्री॥काशीविश्वनाथपुरीमेमहल्लाठठेरकी॥पं[illegible] परवापकिसुनदयालसिंहकेगणेशप्रभाकरछापाखानेमे

सुसन्निवाटकृष्णंभ[illegible]ट्टीटीकासहितप्रथ

[illegible]का[illegible]या[illegible]जिसकोलेनाहोय

[illegible]सडकपरवा[illegible]बुकसेलेश्वरसिंहके

[illegible]परमिलैगा[illegible]शोधा बालशास्त्रीप

॥अथकृष्णंभट्टीटीकासहितसुसन्निवादप्रारंभः॥

[illegible]॥लिखाहसिन्दननै॥ छापारामदत्तने॥सम्वत्१९४९मितिजेठसुदी ११ चंद्रवासर ६८६ ॥

[illegible]णशापनमः॥शाब्दबोधेचेति॥ सप्तमीनिरूपितत्वे। चशब्दः प्रसिद्धौ। एकपदार्थेघटे। सप्तमी अ[illegible]योगित्वे। अपरपदार्थस्य। नीलपदार्थस्य
।षष्ठी प्रतियोगित्वे। संसर्गो अभेदादिः। संसर्गमर्यादा समभिव्याहार ज्ञानकार्यतावच्छेदककोटिप्रविष्ट संबंधता। तृतीया अभेदे। भासते इत्य
त्र भासनं विषयता। आख्यातार्थ आश्रयता॥ तथा च घटरूपैकपदार्थानुयोगिकः नीलरूपापरपदार्थप्रतियोगिको अभेदादिः संसर्गः शाब्दबो
धनिरूपितसंसर्गत्वाभिन्न[illegible]ता आश्रय इति वाक्यार्थः। एकत्वमपरत्वं च नपदे अन्वेति। अन्यथा आख्यातार्थे रतिवर्तमानत्वयोः परस्परम
न्वयो न स्यात्। नाप्यर्थे। नीलो घट इत्यादौ अभेदान्वयो न स्यात्। नीलघटयोरेकत्वात्। अपितु पदार्थता[illegible]वच्छेदके। तथा चैकं पदार्थतावच्छे
दकं तदवच्छिन्नैं[illegible]पदावपरं यत्पदार्थतावच्छेदकं नीलत्वादि तदवच्छिन्ननीलादेरभेदान्वय इत्यर्थः। पदा[illegible]पस्थापितार्थस्यैव प्रकार

[illegible]शाब्दबोधेचैकपदार्थे[illegible]पदार्थस्य संसर्गः संसर्गमर्यादया भासते॥

[illegible]ो विशेष्यतया च भानोपगमे नीलो घट इत्यादौ नीलरूपाश्रयप्रकारकाभेदसंसर्गकघटविशेष्यकशाब्दबुद्धित्वावच्छिन्नं[illegible]तिप्रथमान्त
[illegible]लपदसमभिव्याहृत[illegible]थमान्तघटपदजन्योपस्थितित्वेन समभिव्याहाररूपाकांक्षाज्ञानस्य कारणता। एवं घटमानयेत्यादौ घटप्रकारक
कर्मताविशेष्यकाधेयतासंसर्गकशाब्दबुद्धित्वावच्छिन्नं प्रति घटपदाव्यवहितोत्तरअंपदजन्योपस्थितित्वेन समभिव्याहाररूपा
कांक्षाज्ञानकारणतांगीकारादिति भावः॥ स च॥ संसर्गश्च। क्वचिद्भेदः। नीलो घट इत्यादौ॥ क्वचित्तदतिरिक्त एवे[illegible]
[illegible]दौ कर्मत्वे घटादेराधारतानिरूपितकर्मत्व[illegible]निष्ठाधेयता संबन्धः। घटो नास्तीत्यादौ नञर्थाभावे घटनिष्ठप्रति[illegible]

वृ॰
२

कत्वंपरिष्करोति। स्वसमानविभक्तिकत्वंचेति। स्वसमानत्वंनतुल्यत्वंअपितुस्वपदलक्षणयास्वप्रकृतिकविभक्तितुल्यत्वं। एवं
चस्वविशेष्यवाचकंपदंप्रकृतिर्यस्याःसाईदृशीयाप्रथमादिविभक्तिः प्रथमात्वादिनातत्सजातीयाविभक्तिर्यस्यतत्स्वप्रकृतिक
विभक्तिसजातीयविभक्तिकं विशेषणपदंतत्त्वंविशेष्यवाचकपदोत्तरविभक्तिरितिविभक्तिविभाजकप्रथमात्वादिमद्विभक्तिप्रकृ
तित्वमितियावत्। ननुसमानानुपूर्वीकत्वंसाजात्यमिति। ननुविशेष्यवाचकपदोत्तरविभक्तिरितिसुकाररूपसकारोत्तरउत्वरूपा

स्वसमानविभक्तिकत्वंचस्वप्रकृतिकविभक्तिसजातीयविभक्तिकत्वम्। साजात्यंचविभक्तिविभाजकप्रथमात्वादि
ना। ननुसमानानुपूर्वीकत्वंसाजात्यं। वेदाःप्रमाणंशतंब्राह्मणाइत्यादावन्वयबोधानुपपत्तेः। ननुविंशत्याद्याःसदैक
त्वेइत्यनुशासनात्शतंब्राह्मणाइत्यादेःसाधुत्वेपिवेदाःप्रमाणमित्यादयः कथंप्रयोगाः विशेष्यविशेषणवाचकप
दयोरसतिविशेषानुशासनेसमानवचनकत्वनियमात्।

नुपूर्वीविशेषवत्त्वविशेषणवाचकपदोत्तरविभक्तिनिष्ठमित्यर्थः। वे
दाःप्रमाणंशतंब्राह्मणाइत्यादावन्वयानुपपत्तेरिति। जसिजस्त्वरूपायाःसुविभक्तौसुत्वरूपायाआनुपूर्व्याःभेदात्साजात्यंनस्यात्। प्र
थमात्वादिनासाजात्यमस्तीतिनबोधानुपपत्तिरितिभावः। याविशेष्येषुदृश्यंतेलिंगसंख्यादयः विभक्तयःप्रायस्ताएवकर्तव्याःसमाना
र्थेविशेषणेइतिभर्तृहरिकारिकामर्थतोनुवदन्शंकते। ननुविंशत्याद्याइत्यादिना॥ कारिकास्थप्रायःपदार्थमाह। असतिविशेषानुशा राम
सनेइति। विंशत्याद्याःसदैकत्वेइत्यादिविशेषानुशासनस्थलेतुनविशेषणविशेष्यपदयोःसमानलिंगसंख्यानियमःसमान ॥ ६ ॥ २

गिना संबंधः। घटं जिज्ञासते इत्यादौ सनर्थेच्छायां ज्ञाधात्वर्थज्ञानस्य विषयतानिरूपितविषयिता संबंधः। विषयविषयीभावादिरित्या
दिना पचतीत्यादौ आख्यातार्थकृतौ धात्वर्थपाकादेर्जन्यतानिरूपितजनकत्वादिपरिग्रहः। व्याससमासभेदेन विकल्पमाह॥
अभेदश्चेत्यादिना॥ स्वसमानविभक्तिकेन। स्वं विशेष्यवाचकघटादिपदं तत्समानविभक्तिकं प्रथमांतं नीलादिपदं तेनोपस्थितस्यैव
नीलादिरूपार्थस्याभेदः संसर्गः। व्यासेन निरुक्तं समासेनाह। स्वाव्यवहितपूर्ववर्तिना चेति॥ स्वं विशेष्यवाचकं घटपदं तदव्य

संबंधः क्वचिद्भेदः क्वचिच्च तदतिरिक्त एवाधाराधेयप्रतियोग्यनुयोगिविषयविषयिभावादिः। अभेदश्च प्रातिपदिकार्थे
स्वसमानविभक्तिकेन स्वाव्यवहितपूर्ववर्तिना चाव्यवहितोत्तरवर्तिना च पदेनोपस्थापितस्यैव संसर्गमर्यादया
भासते। यथा नीलो घटः नीलघटमानयेत्यादौ गोगृष्टिरित्यादौ घटादौ नीलादेः। न तु विरुद्धविभक्तिमत्पदार्थस्य नीलस्य
घट इत्यादौ नीलघटाभेदान्वयबोधस्य सर्वानुभवविरुद्धत्वात्॥

॥ वहितपूर्ववर्तिना नीलादिपदेनेत्यर्थः। उपस्थितस्यैवेत्येव
कारव्यवच्छेद्यमाह। नत्विति। नीलस्य घट इत्यत्र नीलपदार्थस्यासमानविभक्तिकपदेन षष्ठ्याव्यवधानात्। अव्यवहितपदेन चा
नुपस्थाप्यत्वादिति भावः नीलस्य घट इत्यत्र तु नीलपदोत्तरषष्ठ्या घटपदाव्यवहितपूर्ववर्तित्वेपि अयोग्यत्वान्न षष्ठ्यर्थसंबं
धस्याभेदेन घटे अन्वयः। ननु स्वसमानविभक्तिकेनेत्यत्र स्वं विशेष्यवाचकं पदं तेन स्वेन समाना विभक्तिर्यस्येति विग्रहात् स्व
तुल्यविभक्तिकत्वं विशेषणपदे लभ्यते तच्च बाधितं विशेष्यपदस्य प्रातिपदिकत्वाद्विभक्तेश्चातद्भिन्नत्वाद् तः स्वसमानविभक्ति

विभक्तेर्नियमस्तु अस्तीति प्रायइत्युक्तमिति भावः। समानवचनत्वमित्यत्र वचनं संख्या। अन्यथा। विशेष्यविशेषणपदयोः समानवचनकत्व
नियमाभावे। तथानियमोपगमेन। समानवचनकत्वनियमांगीकारेण। प्रमाणमित्यस्य ल्युडंतत्वेन नित्यनपुंसकत्वादजहल्लिंगतया वेदा
इत्यस्य च भिन्नलिंगकत्वात्समानवचनकत्वाभावेन दोषायेत्याशयः। शक्तिर्निपुणता लोकशास्त्रकाव्याद्यवेक्षणात्॥ काव्यज्ञ
शिक्षयाभ्यास इति हेतुस्तदुद्भवे इति काव्यप्रकाशकारिका। तत्र शक्तिः कवित्वबीजभूतः संस्कारविशेषः। सचवासनासाजन्मां

अन्यथा घटानीलइत्या देरपिसाधुताप्रसंगात्। समानलिंगकस्थले तथानियमोपगमेन वेदाःप्रमाणमित्यादेः साधुत्वोप
पादनेपि इतिहेतुस्तदुद्भवे इति कारिकाया इति त्रयः समुदिता हेतुरिति काव्यप्रकाशव्याख्यायाअ संगतिर्दुर्वारैव। एवम
समानलिंकस्थले विशेष्यवाचकपदासमानवचनस्यापि विशेषणपदस्य साधुत्वे तादृशस्थले औत्सर्गिकमेकवचनमेवस
र्वत्र विशेषणपदानंतरं प्रयोक्तुमुचितमिति प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि पितरो देवता इत्यादेरनुपपत्तिः॥ मैवम्॥

तरीय ऐहिको वा। काव्यलोकशास्त्रादिज्ञानजन्या निपुणता। कविशिक्षयाऽभ्यासश्चेति। त्रयः समुदिताः दंडचक्रादिन्यायेन समुदितानां
फलोपधायकत्वेन। हेतुरित्येकवचनं तत्र त्रयः हेतुरिति समानलिंगत्वेपि वचनैक्याभावान्नियमभंग इति भावः। तादृश[स्थ]ले। अस
मानलिंगकस्थले। आप स्त्रीभूम्नीत्यादिवत्वबाधकाभावादनियम उत्सर्गः। उत्सर्गप्राप्तमौत्सर्गिकमेकवचनमेव विशेषणपदोत्तरमुचि
तमिति॥ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि पितरो देवता इत्यादेरनुपपत्तिरिति। पितृपितामहप्रपितामहेषु पितर इ॰ ।

५ विरुद्धत्वं नासामानाधिकरण्यम्॥ स्वरूपसंबंधरूपप्रमितिकरणतायाः प्रमितिकरणस्वरूपत्वेन वेदाः प्रमाणमित्यत्र प्रमितिकरणत्व निष्ठैकत्वस्य वेदनिष्ठबहुत्वसमानाधिकरणत्वात्॥ किंतु विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयीभूतसंख्याभिन्नत्वमेव विरुद्धत्वम्॥ ५

प्रयोगस्तु सपिंडीकरणोत्तरश्राद्धजन्यफलभागित्वं पारिभाषिकं पितृत्वमादाय समर्थनीयः। द्रव्यत्यागोद्देश्यत्वं च देवतात्वं। ननु समानलिंगस्थले समानवचनकत्वनियमांगीकारेणात्र यः समुदितो हेतुरित्यत्रानुपपत्तिसंभवेप्यसमानलिंगकस्थले न किंचिन्नियतं निमित्तमिति कथं प्रमाणानीत्यत्र बहुवचनानुपपत्तिः शंकितेति चेन्न। बहुवचनप्रयोगे हि क्वचिन्नियमो नियामको यथा नीलाः घटाः इत्यत्र समानलिंगकेषु समानवचनकत्वरूपः। क्वचिच्च बहुत्वसंख्याबोधः। यथा घटानीत्यत्र प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानी

यत्र विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याविरुद्धसंख्याया अविवक्षितत्वं तत्र विशेष्यविशेषण ऽप्रत्ययः॥

त्यत्रोभयविधहेत्वभावात्। प्रथमोपस्थितत्वाच्चैकवचनप्रयोगस्यैव भावाख्यातवत्साधुत्वात्। विशेषणपदोत्तरवचनेष्वनुगतं निमित्तमाह। यत्रेति। ननु घटाः नीला इत्यत्र विभक्त्यर्थः संख्यारूपः। नीला वर्णा इत्यादौ तु गुणे गुणानंगीकारादपेक्षाबुद्धिविशेषविषयत्वरूप एव विभक्त्यर्थो न तु संख्यारूपः। इति शंकायास्य साधारणविभक्त्यर्थमाह॥ ॥ विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्यायाम विरुद्धसंख्याया अविवक्षितत्वमिति। तथा च नियमशरीरे न संख्यात्वेन नवा अपेक्षाबुद्धिविशेषविषयत्वेन विभक्त्यर्थस्य निवेशः

टिप्पणी॥ समानवचनत्वस्य न स्वरूपसत्कारणता॥ किंतु यादृशशाब्दबोधे विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयसंख्याभिन्नसंख्याया विशेषणेनभान मा तादृशशाब्दबोधे एव विशेष्यविशेषणवाचकपदयोः समानवचनत्वज्ञानं कारणमित्येव नियमः॥ तेन घटाः नीला इत्यत्र विशेष्यवाचकघटपदोत्तरविभक्तौ सुत्वभ्रमेण घटविषयकनीलविषयकशाब्दबोधात्पूर्वं स्वरूपसत् समानवचनपदाभावेपि न क्षतिः॥ एवं च वेदः प्रमाणमित्यत्र वेदपदोत्तरसुविभक्तौ यदा जस्त्वभ्रमः न

किंतु विशेष्यवाचकपदोत्तरविभक्तितात्पर्यविषयत्वेनेति नाननुगम इति भावः। घटा नीला इत्यादौ विशेष्यवाचकं घटपदं तदुत्तरा जस् रूप प्रथमा विभक्तिस्तत्तात्पर्यविषयीभूता बहुत्वसंख्या ततो विरुद्धा एकत्वसंख्या तस्याः विशेषणपदोत्तरविभक्त्या अविवक्षितत्वमेव विशेष्यविशेषणपदयोः समानविभक्तिकत्वेनियामकमित्यर्थः। अत एवेति। ईदृशनियमांगीकारादेव। पुरूरवो मार्द्रवसो विश्वेदे

समानवचनकत्वनियमः। अत एव पुरूरवो मार्द्रवसो विश्वेदेवा इत्यादौ द्वित्वविशिष्टयोः पुरूरवो मार्द्रवः॥

वा इत्यत्र विश्वेदेवा इति विशेष्यवाचकं पदं तदुत्तरविभक्तितात्पर्यविषयसंख्या बहुत्वसंख्या तद्विरुद्धा संख्या द्वित्वरूपा सा पुरूरवो मार्द्र वसा वित्यत्र विवक्षितैवेति न समानवचनत्वं। विश्वेदेवानां बहुत्वेपि द्वित्वविशिष्टयोरेव पुरूरवो मार्द्रवसोः एवं कालकामयोस्त

दा समानवचनत्वज्ञानाभावेपि वेदधर्मिकप्रमाणबोधात्॥ तादृशबोधे विशेष्यवाचकपदोत्तरविभक्त्यर्थएकत्वसंख्याभिन्नसंख्याया विशेषणे अभावेन तादृशबोधे स मानवचनज्ञानस्य व्यभिचारापत्तिः॥ अतः विभक्त्यर्थसंख्यामुपेक्ष्य विभक्तितात्पर्यसंख्या इत्युक्तम्॥ तथा च वेदः प्रमाणमित्यत्र वेदपदोत्तरसुविभक्तौ यदा जस्त्व भ्रमः तदा तत्तात्पर्यविषयीभूतं बहुत्वमेव॥ तद्विरुद्धसंख्याया विशेषणे विवक्षितत्वान्न दोषः॥ ७॥ यत्र विशेषणे संख्या अविवक्षिता इत्युक्तौ तादृशशाब्दबोधस्य समान

वचनत्वज्ञानकार्यतावच्छेदकाकांक्षानिरूपकत्वप्रयोजकत्वं ततः संसर्गतामर्यादया

[illegible handwritten marginal note]

व्यु॰टी॰ त्वतत्र कर्मणि पूज्यत्वविधानादिति भावः। प्रभृत्योरिति। प्रभृतिग्रहणं विशेष्यवाचकविश्वेदेवपदोत्तरविभक्तितात्पर्यविषयबहुत्वसंख्या
४ याः अन्वययोग्यत्वं सूचयति। विश्वेदेवानां बहुत्वात्। तथा हि दक्षस्य दुहिता ज्येष्ठा विश्वा नाम महातपाः॥ तस्याः पुत्राः समुत्पन्ना विश्वे
देवास्त्रयोदश। नैमित्तिके कालकामौ काम्ये च धूरिलोचनौ। अन्वष्टके द्विदेवौ नांद्यां सत्यवसू स्मृतौ। पुरूरवो माद्रवसौ पार्वणे समुदाहृतौ
यशेदस्क्रतू नाम सदः सापिंड्यके विधाविति। इदमत्र तत्त्वं। कार्याव्यवहितप्राक्क्षणावच्छेदेन कार्याधिकरणवृत्त्यभावाप्रतियोगित्वं
न सकलशब्देषु चालनीन्यायेन प्रतियोगित्वादतस्तादृशप्रतियोगितानवच्छेदकशब्दत्वरूपधर्मवत्त्वमेव शाब्दधियं प्रति कारणत्वं वा

प्रभृत्योर्विशेषणतया विवक्षितत्वात्तद्वाचकस्य पदस्य द्विवचनांतता वेदाः प्रमाणमित्यत्र च विशेषणपदोत्तरविभक्त्या ब
हुत्वविरुद्धमेकत्वं विवक्षितं। तच्च प्रकृत्यर्थतावच्छेदके प्रमितिकरणत्वेन्वेति शाब्दप्रमाकरणत्वं च शब्दत्वावच्छिन्न
यावच्छब्दनिष्ठमेकमेवेति नायोग्यता॥ न च पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिविरोधः। संपन्नो व्रीहिरित्यनेकव्रीहि
तात्पर्यकेप्येकवचनदर्शनेन तादृशव्युत्पत्तिसंकोचस्यावश्यकत्वात्॥ ९ च्यां। तच्च शब्दत्वमेवेत्याह॥ शब्दत्वावच्छिन्नयाव
च्छब्दनिष्ठमेकमेवेति। यदि च शब्दत्वमेव कारणत्वं तदा कारणतावच्छेदकत्वं शब्दत्वेन संभवति अभेदेवच्छेद्यावच्छेदकभावानंगीकारा
त् तथापि तादृशप्रतियोगितानवच्छेदकत्वविशिष्टशब्दत्वस्य कारणत्वं स्वरूपतः शब्दत्वस्य कारणतावच्छेदकत्वमिति नानुपपत्तिः। संपन्नो राम
व्रीहिरित्यनेकव्रीहितात्पर्यकेपि पदे तादृशव्युत्पत्तिसंकोचस्येति। एकत्वं पदार्थतावच्छेदके व्रीहित्वेन्वेति। तथा चैकव्रीहित्वजातिव ४

मानाधिकरण्यसंबंधेनसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टोयःप्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मोघटत्वत्वंतेनधर्मेणघटत्वसजातीयंघट
त्वमेवतन्निष्ठोयोभेदःएकत्ववसटत्वभेदस्तत्प्रतियोगितावच्छेदकंपटत्वादिनिष्ठमेकत्वंतदनवच्छेदकंघटत्वनिष्ठमेकत्वंतदेवसजातीय
द्वितीयरहितत्वंघटपदोत्तरप्रथमैकवचनार्थः।जात्येकत्वादेरेवेत्यादिपदात्स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्वसंबंधेनैकत्वस्यघटेऽन्वयः।
स्वंघटपदोत्तरप्रथमैकवचनार्थएकत्वंतदाश्रयीभूतप्रकृत्यर्थतावच्छेदकंघटत्वंतद्वत्वंघटेऽस्तीतितदर्थः।युक्तंचैतत्घटत्वेएकत्वान्वयोन
संभवतिघटोऽस्तीत्यत्रघटत्वस्यस्वरूपतएवघटपदशक्यतावच्छेदकतयान्वयितावच्छेदकरूपेणानुपस्थितेः।अन्वयितावच्छेदकरूपेणोपस्थिते

यत्तुएकत्वाविवक्षायामपिभावाख्यातस्थलेएकवचनस्यसाधुत्वदर्शनात्संख्याया अविवक्षणेऽपिसंपन्नो व्रीहिरित्यादावे
कवचनोपपत्तेरलंजात्येकत्वपरतया — तत्रसमर्थनेनेति।तदप्यकिंचित्करम्॥ ((रेवपदार्थांतरान्वयनियमादिति।मतांतर
माह।यत्त्विति।युष्मदिसमानाधिकरणेस्थानिन्यपिमध्यमइतिपाणिनिसूत्रं।युष्मत्सदेतिङ्वाच्यकारकवाचिनिप्रयुज्यमानेसतिस्थानिनिगम्यमाने
वाऽसतिमध्यमःपुरुषः।प्रयुक्तेगम्यमानेवाउक्तेयुष्मदिमध्यमइतिहर्युक्तेः।एवमस्मदीत्यस्यशेषेप्रथमइत्यस्यचार्थइतिवैय्याकरणमतेऽपिभावा
ख्यातप्रयोगेनप्राप्नोतिकर्तृकर्मकारकाणांतिङ्वाच्यत्वाभावात्।एवंन्यायनयेऽपिभावप्रधाननिर्देशेनप्रयुक्तगम्यमानान्यतरयुष्मत्सदबोध्यनि
ष्ठयुष्मत्वेतिङर्थसंख्यासमानाधिकरणेसतिमध्यमःपुरुषइत्यर्थकरणात्।वर्तमानत्वार्थकभावाख्यातस्यावश्यकत्वेऽपिभावनान्वयिनि
संख्यान्वयनियमेनात्रभावनान्वयविरहेणसंख्यान्वयविरहादाह।एकत्वविवक्षायामपीत्यादि।अलंजात्येकत्वपरतयातत्समर्थनेन। ॥ ॥

[illegible]

मु॰टी॰ ४ वतत्रकर्मणिपूज्यत्वविधानादितिभावः।प्रभृत्योरिति।प्रभृतिग्रहणंविशेष्यवाचकविश्वेदेवपदोत्तरविभक्तितात्पर्यविषयबहुत्वसंख्या
याःअन्वययोग्यत्वंसूचयति।विश्वेदेवानांबहुत्वात्।तथाहिइंद्रस्यदुहिताज्येष्ठाविषानाममहातपाः॥तस्याःपुत्राःसमुत्पन्नाविश्वे
देवास्त्रयोदशानैमित्तिकेकालकामौकाम्येचधूरिलोचनौअन्वष्टकेदिविदेवौनांद्यांसत्यवसूस्मृतौ।पुरूरवोमार्द्रवसौपार्वणेसमुदाहृतौ
यश्रेदस्तक्रतूनामसदःसापिंड्यकेविधाविति।इदमत्रतत्वं।कार्याव्यवहितप्राक्क्षणावच्छेदेनकार्याधिकरणवृत्त्यभावाप्रतियोगित्वं
नसकलशब्देषुचालनीन्यायेनप्रतियोगित्वाद्तस्तादृशप्रतियोगितानवच्छेदकशब्दत्वरूपधर्मवत्वमेवशाब्दधियंप्रतिकारणत्वंवा

प्रभृत्योर्विशेषणतयाविवक्षितत्वात्तद्वाचकस्यपदस्यहिवचनांततावेदाःप्रमाणमित्यत्रचविशेषणपदोत्तरविभक्त्याब
हुत्वविरुद्धमेकत्वंविवक्षितं।तच्चप्रकृतत्वर्थतावच्छेदकेप्रमितिकरणत्वेन्वेतिशाब्दप्रमाकरणत्वंचशब्दत्वावच्छिन्न
यावच्छब्दनिष्ठमेकमेवेतिनायोग्यता॥नचपदार्थःपदार्थेनान्वेतीतिव्युत्पत्तिविरोधः।संपन्नोव्रीहिरित्यनेकव्रीहि
तात्पर्यकेप्येकवचनदर्शनेनतादृशव्युत्पत्तिसंकोचस्यावश्यकत्वात्॥९चं।तच्चशब्दत्वमेवसाहृ॥शब्दत्वावच्छिन्नयाव
च्छब्दनिष्ठमेकमेवति।यदिचशब्दत्वमेवकारणत्वंनदाकारणतावच्छेदकत्वंशब्दत्वेनसंभवतिअभेदेवच्छेद्यावच्छेदकभावानंगीकारा
त्तथापितादृशप्रतियोगितानवच्छेदकत्वविशिष्टशब्दत्वस्यकारणत्वंस्वरूपतःशब्दत्वस्यकारणतावच्छेदकत्वमितिनानुपपत्तिःसंपन्नो राम
व्रीहिरित्यनेकव्रीहितात्पर्यकेपिपदेतादृशव्युत्पत्तिसंकोचस्येति।एकत्वंपदार्थतावच्छेदकेव्रीहित्वेन्वेति।तथाचैकव्रीहित्वजात्यव ४

छिन्नःक्षेत्रस्थःसर्वोपिव्रीहिःसंपन्नःपरिपक्वइत्यर्थः।तादृशव्युत्पत्तिसंकोचस्यापि॥पदार्थःपदार्थेनान्वेतिनतुपदार्थैकदेशेनेतिव्युत्पत्तिसं
कोचस्य।पदार्थःपदजन्यप्रतीतिविशेष्यः॥पदार्थेनपदजन्यप्रतीतिविशेष्येनान्वेति।तथाचैकपदार्थविशेष्यकापरपदार्थप्रकारकशाब्द
बोधंप्रतिसमानविशेष्यताप्रत्यासत्त्यापदजन्यपदार्थोपस्थितिहेतुः।क्वचिद्वेदाःप्रमाणमित्यादावनुभवानुरोधेनविशेष्यतयैकत्वादिपदार्थ
प्रकारकबोधेविशेषणतयाप्रमाणादिपदजन्यपदार्थोपस्थितिहेतुः।व्यभिचारवारणंत्वव्यवहितोत्तरत्वसंबंधेनकारणवैशिष्ट्यनिवेशनबो
ध्यं॥एकदेशान्वयंपरिहरति।यदिचेति।स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबंधेनप्रकृत्यर्थेएवान्वयइति।स्वंव्रीहिपदोत्तरप्रथमार्थएकत्वं

यदिचस्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबंधेनप्रकृत्यर्थेएवैकत्वान्वयःव्रीहित्वजातेःस्वरूपतएवव्रीह्यादिपदशक्य
तावच्छेदकतयान्वयितावच्छेदकरूपेणानुपस्थितेःतत्रपदार्थान्तरस्यान्वयानुपपत्तेरितिमन्यतेतदाप्रकृतेपीदृश्येवगतिः॥

आश्रयीभूतंयत्प्रकृत्यर्थतावच्छेदकंव्रीहित्वंतद्वत्त्वंतेनसंबंधेनव्रीहावेवैकत्वान्वयोनतुप्रकृत्यर्थतावच्छेदकेव्रीहित्वे।तेननव्युत्पत्तिसंकोचइति
भावः।उक्तसंबंधेनैकत्वविशिष्टव्रीहयइत्यन्वयबोधः।प्रकृत्यर्थतावच्छेदकेएकत्वान्वयोनभवतीत्यत्रहेतुमाह।व्रीहित्वादिजातेःस्वरूप
तएवव्रीह्यादिपदशक्यतावच्छेदकतयान्वयितावच्छेदकरूपेणानुपस्थितेरिति॥तत्रव्रीहित्वे।पदार्थान्तरस्यान्वयानुपपत्तेरित्यत्रहे
तुत्वेनान्वेति।क्वचित्तुअन्वयितावच्छेदकरूपेणानुपस्थितेइतिसप्तम्यंतपाठः।अनुपस्थितेतत्रव्रीहित्वइत्यत्रहेतुगर्भविशेषणं।प्रकृ
तेपीदृश्येवगतिरिति।वेदाःप्रमाणमित्यत्रैकत्वाश्रयप्रमाणतावच्छेदकवत्त्वसंबंधेनैकत्वविशिष्टंयत्प्रमाणंतद्भिन्नावेदाइत्यर्थः॥

व्यु॰टी॰ शाब्दबोधमात्रे धर्मितावच्छेदकरूपेण धर्म्युपस्थितेर्हेतुत्वादिति भावः ॥ यत्त्विति ॥ पदार्थतावच्छेदके स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबं
५ न्धेन पदार्थेऽन्वेति पक्षद्वयेऽपि जातेरेकत्वभानोपगमो निरर्थक इत्यर्थः ॥ यतः स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकत्वरूपस्य तज्जाती ह॰
यद्वितीयरहितत्वं एकवचनार्थ इति। भूतले एकघटसत्त्वदशायां अत्र घट इत्यादौ स्वंप्रकृत्यर्थः एतद्देशवृत्ति घटः तत्सजातीयः स एव त
न्निष्ठः एकपटादिभेदस्तत्प्रतियोगितावच्छेदकं तन्निष्ठमेकत्वं अनवच्छेदकं तद्घटनिष्ठमेकत्वं तदेव सजातीयद्वितीयरहितत्वं घटपदो

यत्तु संपन्नो व्रीहिरित्यादावेकवचनोपस्थितानि नानैकत्वानि प्रत्येकं नाना व्रीहिष्वन्वीयन्ते इत्युक्तैव सामंजस्ये जातेरेकत्वभानोपगमो निरर्थक इति ॥ तदसत् ॥ यतः स्वसजातीयनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वरूपसजातीयद्वितीयरहितत्वमेकवचनार्थः न त्वेकत्वमात्रं ॥ तस्य वस्तुमात्रसाधारण्येनार्थत एव लाभात् ॥ अनुपयोगाच्च ॥ अत एव पशुना यजेत इत्यादौ पशुनिष्ठतादृशैकत्वस्याविवक्षितत्वात् अनेकपशुकरणकयागान्नादृष्टसिद्धिः ॥

॥ तरमेकवचनार्थः तद्दे
शवद्घटसत्त्वदशायां स्वसजातीयो द्वितीयोऽपि घटस्तन्निष्ठैकत्ववदेतद्घटभेदस्तत्प्रतियोगितावच्छेदकमेवैतद्घटनिष्ठमेकत्वं। एवं सजातीयैत
द्घटनिष्ठभेदप्रतियोगितावच्छेदकान्येवैतद्घटभिन्ननिष्ठान्येकत्वानीत्यनवच्छेदकैकत्वाप्रसिध्या नात्र घट इति प्रयोगः ॥ न त्वेकत्वमात्रं न तु
संख्यारूपैकत्वमात्रं। तस्य। संख्यारूपैकत्वस्य। वस्तुमात्रवृत्तित्वेनार्थत एव। शब्दं विनैव तद्बोधने शब्दानपेक्षणादिति भावः ॥ अनुपयोगा राम
च्चेति ॥ एकवचनांतघटादिपदस्य द्व्यादिघटव्यावृत्तिरेव फलम्। तदसंभवाच्चेत्यर्थः। ईदृशैकत्वार्थे उपष्टंभकमाह ॥ अत एवेति ॥ ५

तादृशैकत्वस्य सजातीयेत्यादिनिरुक्तैकत्वस्य॥ साजात्यंच स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेणेति॥ अत्र
। घटोस्तीत्यत्र स्वमेकवचनांतं घटपदं तत्समभिव्याहृतं पदमत्रेतिपदं तदर्थः एतद्देशवृत्तित्वं तत्संसर्गित्वं तत्संसर्ग एव॥ सचैतद्देशवृत्ति
त्वीयस्वरूपसंबंधरूपस्तद्विशिष्टं यत्प्रकृत्यर्थतावच्छेदकं घटत्वं तेन रूपेण सजातीयः स एव घटस्तन्निष्ठो यः एकपटभेदस्तत्प्रतियोगि
तावच्छेदकं तत्पटनिष्ठैकत्वं तदनवच्छेदकं घटनिष्ठमेकत्वं तद्रूपपारिभाषिकसजातीयद्वितीयरहितत्वमेकवचनार्थो घटोस्तीति पू
र्वमुक्तम्॥ एतद्देशे बहुघटसत्वदशायां तादृशवाक्यप्रयोगस्त्वजात्यैकत्वमादाय समर्थनीय इति॥ एतद्देशे बहुघटसत्वदशायामत्र घ

साजात्यंच स्वसमभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकरूपेण अतोत्र घटोस्तीत्यादौ घटनिष्ठभेदप्र
तियोगितानवच्छेदकैकत्वाप्रसिद्धावपि न क्षतिः॥ एतद्देशविद्यमानघटनिष्ठभेदप्रतियोगितानवच्छेदकैकत्वस्यैव तत्र बो
धादिति॥ तस्य च प्रसिद्धत्वात्॥ एतद्देशे बहुघटसत्वदशायां तादृशवाक्यप्रयोगस्त्वजात्यैकत्वादेव समर्थनीयः॥ ॥

टोस्तीति प्रयोगो न भवति। यदि कदाचिद्भवति तदा घटपदोत्तरप्रत्ययमैकवचनार्थ एकत्वं घटत्वरूपजातौ अन्वेति। तत्र प्रकृत्यर्थतावच्छे
दकतावच्छेदकसंबंधेन समभिव्याहृतपदार्थसंसर्गित्वविशिष्टप्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मेण साजात्यं ग्राह्यं। तथाच घटपद
समभिव्याहृतमत्रेति सप्तम्यंतपदं तदर्थः एतद्देशवृत्तित्वं तस्य स्वरूपेण संसर्गि घटस्तत्र घटप्रकृत्यर्थतावच्छेदकतावच्छेदकसंबंधेन सम
वायेन वृत्तिर्यस्य तादृशघटत्वं तत्वं तादृशवृत्तित्वरूपं घटत्वेस्ति। अथच प्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मो घटत्वत्वं तदपि घटत्वेस्तीति सा

व्यु॰टी॰ मानाधिकरण्यसंबंधेन समभिव्याहृतपदार्थसंसर्गित्वविशिष्टो यः प्रकृत्यर्थतावच्छेदकमात्रवृत्तिधर्मो घटत्वत्वं तेन धर्मेण घटत्वसजातीयं घट कु॰
६ त्वमेव तन्निष्ठो यो भेदः एकत्ववत्घटत्वभेदस्तत्प्रतियोगितावच्छेदकं घटत्वादिनिष्ठमेकत्वं तदनवच्छेदकं घटत्वनिष्ठमेकत्वं तदेव सजातीय
द्वितीयरहितत्वं घटपदोत्तरप्रथमैकवचनार्थः। जात्येकत्वादेरेवेत्यादिपदात्स्वाश्रयप्रकृत्यर्थतावच्छेदकवत्त्वसंबंधेनैकत्वस्य घटेऽन्वयः।
स्वं घटपदोत्तरप्रथमैकवचनार्थः एकत्वं तदाश्रयीभूतप्रकृत्यर्थतावच्छेदकं घटत्वं तद्वत्त्वं घटेऽस्तीति तदर्थः। युक्तं चैतत् घटत्वे एकत्वान्वयेन
संभवति घटोऽस्तीत्यत्र घटत्वस्य स्वरूपत एव घटपदशक्यतावच्छेदकतयान्वयितावच्छेदकरूपेणानुपस्थितेः। अन्वयितावच्छेदकरूपेणोपस्थिते

यत्तु एकत्वाविवक्षायामपि भावाख्यातस्थले एकवचनस्य साधुत्वदर्शनात्संख्याया अविवक्षणेऽपि संपन्नो व्रीहिरित्यादावे
कवचनोपपत्तेरलं जात्येकत्वपरतया — तत्रसमर्थनेनेति। तदप्यकिंचित्करम्॥ ((रेवपदार्थांतरान्वयनियमादिति। मतांतर

माह। यत्त्विति युष्मदि समानाधिकरणे स्थानिन्यपि मध्यम इति पाणिनिसूत्रं। युष्मत्सदे तिङ्वाच्यकारकवाचिनि प्रयुज्यमाने सति स्थानिनि गम्यमाने
वा सति मध्यमः पुरुषः। प्रयुक्ते गम्यमाने वा उत्ते युष्मदि मध्यम इति हर्युक्तेः। एवमस्मदीयस्य शेषे प्रथम इत्यस्य चार्थ इति वैय्याकरणमतेऽपि भावा
ख्यातप्रयोगेन प्राप्नोति कर्तृकर्मकारकाणां तिङ्वाच्यत्वाभावात्। एवं न्यायनयेऽपि भावप्रधाननिर्देशेन प्रयुक्तगम्यमानान्यतरयुष्मत्सद्बोध्यनि
ष्ठयुष्मत्वे तिङर्थसंख्यासमानाधिकरणे सति मध्यमः पुरुष इत्यर्थकरणात्। वर्तमानत्वार्थकभावाख्यातस्यावश्यकत्वेऽपि भावनान्वयिनि राम
संख्यान्वयनियमेनात्र भावनान्वयविरहेण संख्यान्वयविरहादाह। एकत्वविवक्षायामपीत्यादि। अलं जात्येकत्वपरतया तत्समर्थनेन। ॥ ॥ ६

एकत्वसमर्थनेनेत्यर्थः। प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमभंगापत्तेरितिभावः। दृष्टांतदार्ष्टांतिकयोर्वैषम्यमभिप्रेत्य समाधत्ते। भा
वाख्यातस्थलेऽगत्यंतरविरहेण विभक्तेनिरर्थकत्वोपगमादिति॥ भावाख्यातस्थले सुप्यत इत्यादौ स्वापे विभक्त्यर्थैकत्वं विशेषणं वक्तव्यं
तच्च स्वापत्वव्याप्यानां द्विकर्तृकस्वापत्वबहुकर्तृकस्वापत्वानां व्यावर्तनार्थमेव वक्तव्यं तच्च न संभवति स्वापत्वव्याप्यधर्माणां व्यावर्त्या
नां कदाप्यनवगमादेकत्वं विशेषणं व्यर्थमिति भावाख्यातस्य संख्यार्थो नास्तीत्यर्थः। सुप्यते सेतावन्मात्रं शृण्वतः कतिपयैरिति प्रश्नासं
गतेश्च न संख्या विभक्त्यर्थः। तथाहि सुप्यते सत्राख्यातार्थैकत्वस्य धात्वर्थस्वापेन्वयांगीकारे एकः स्वाप इत्यन्वयबोधो वाच्यस्तत्रैक
स्मिन्स्वापे निद्रानाड्यवच्छिन्नमनोयोगरूपे कतिपयैरिति जिज्ञासाविषयबहुनिष्ठकृतिजन्यत्वं बाधितमिति कतिपयैरिति प्रश्नासंग

भावाख्यातस्थलेऽगत्यंतरविरहेण विभक्तेर्निरर्थकत्वोपगमात्॥

तिः। एवं स्वापे द्वित्वबहुत्वयोरपि संभवात्सुप्येते सुप्यंते इति द्विबहुवचनापत्तिरपि द्रष्टव्या। तस्मात्संख्यार्थाभावेन स्वापत्वरूपेण धातू
पस्थापिते तृतीयांतोपस्थाप्यकर्तृणां तृतीयार्थकृतिद्वारान्वयाभ्युपगमादुक्तप्रश्नसंगतिरुपपद्यत इति भावाख्यातस्थले सुप्यत इत्ये
तावन्मात्रोक्ते केन काभ्यां कैरिति त्वनेकश्रोतृजिज्ञासाबोधकपदैः विभिन्नविभक्तिकैः संख्याबोधकस्य श्रोतृगताभावस्यापि व्यंज
नात्तद्बोधस्यानुभवबाधितत्वादिति गुरवः। तदर्थश्चानेकविषयिणी या श्रोतुर्जिज्ञासा तद्बोधकैरेकद्विबहुवचनांतैः पदैः श्रोतृगता
भावस्य स्वापत्वव्याप्यधर्माणां द्विबहुकर्तृकस्वापत्वानां स्वापान्विततिङर्थैकत्वव्यावृत्तानां कदापि अवगमाभावस्य द्विबहुकर्तृकस्वागमरूपस्य स्वा

प्र॰टी॰ पन्विताख्यातार्थैकत्वसंख्याबोधकस्याभिव्यंजनादित्यन्वयः। तथाहि धात्वर्थस्वापे निद्रानाड्यवच्छिन्नात्ममनोयोगरूपे आख्यातार्थैकत्वान्व कु॰
७ य एकस्मिन्स्वापे एककर्तृकत्वमेवास्ति न हि बहुकर्तृकत्वमिति व्यावर्त्यमेव हि बहुकर्तृकत्वं व्यावर्तकस्यापनिष्ठमेकत्वं व्यंजयति स्वा
पत्वव्याप्यधर्माणां हि बहुकर्तृकस्वापत्वानामवगम एव श्रोतृगताभावरूपाख्यातार्थैकत्वसंख्याबोधकमित्यर्थः। तद्बोधस्य हि बहु
कर्तृकस्वापबोधस्यानुभवबाधितत्वादिति व्यावर्त्यानामेकत्वव्यंजकानामभावान्न संख्याभावाख्यातार्थ इत्यर्थः। संभवत्यर्थसाधुत्वेप
दसाधुत्वमन्याय्यमित्यभिप्रेत्याह। अत्र चेति। अत्र च संपन्नो व्रीहिरित्यादौ तु व्रीहिपदोत्तरप्रथमार्थैकत्वस्य व्रीहित्वेन्वयसंभवेन सति
अत्र च सार्थकत्वोपगमसंभवे तत्परित्यागस्यानुचितत्वात्। सति तात्पर्ये तद्बोधस्यानुभविकत्वाच्चेति॥ एवं त्रयः समुदिता
हेतुरित्यत्र हेतुपदं कार्योत्पादकप्रयोजकतावच्छेदकसमुदायत्वावच्छिन्नपरं तादृशसमुदायत्वान्वितमेकत्वं एकवचनार्थः
तात्पर्ये एकत्वव्रीहित्वं तदवच्छिन्नः सर्वोपि व्रीहिः संपन्न इति बोधस्यानुभवसिद्धत्वाच्चेत्यर्थः। ननु असति विशेषानुशासने विशेष्यविशे
षणवाचकपदयोः समानवचनत्वमिति नियमस्य समानलिंगकस्थल एवाभ्युपगमेन वेदाः प्रमाणमित्याद्यनुपपत्तिवारणेपि त्रयः स
मुदिता हेतुरिति काव्यप्रकाशव्याख्याया असंगतिर्दुर्वारैवेत्यत आह। एवं त्रयः समुदिता हेतुरित्यत्रेति। अत्र विशेष्यवाचकं त्र
य इति पदं तदुत्तरजस्स्वरूपविभक्तेस्तात्पर्यविषयीभूता बहुत्वसंख्या तद्विरुद्धा संख्या एकत्वरूपा सा च हेतुपदोत्तरप्रथमैकवचने राम ७
न विवक्षितैवेति अविवक्षितत्वाभावात्त्रिपदस्य बहुवचनांतत्वेपि हेतुपदस्यैकवचनांततोपपत्तिः॥ ॥ ६ ॥ ६ ॥ ६ ॥

एवं चैकत्वविशिष्टं यत्कार्योत्पादप्रयोजकतावच्छेदकसमुदायत्वं तद्धर्मवंतस्त्रय इति बोधः॥ अत एवेति॥ समुदायत्वे एकत्वांगीकारादेवेत्य
र्थः। तथासति॥ तृणारणिमणिन्यायेन शक्त्यादीनां कारणत्वांगीकारे सति। एषां॥ शक्तिर्लोकशास्त्रकाव्याद्यवेक्षणजन्या निपुणता काव्य
ज्ञशिक्षापूर्वकाभ्यासश्चैषामिति तदर्थः। एकैकसमवधानदशायामपि। एषां मध्ये केवलशक्त्यादिना काव्योत्पत्तेः शक्तित्वादिकमे
व काव्योत्पादप्रयोजकतावच्छेदकं। न तु शक्त्यादित्रितयपर्याप्तसमुदायत्वमिति। तेषां शक्त्यादीनां काव्योत्पादप्रयोजकतावच्छेदक

अत एव शक्त्यादीनां त्रयाणां तृणारणिमणिन्यायेन हेतुत्वशंकानिरासः तथासत्येषामेकैकसमवधानदशायामपि का
र्योत्पत्तेरावश्यकतया तत्त्रितयपर्याप्तसमुदायत्वस्य कार्योत्पत्तिप्रयोजकतानवच्छेदकतया तेषां त्रयाणां तथाविधै
कसमुदायत्वाश्रयत्वानुपपत्तेः एवं जात्याकृतिव्यक्तयः पदार्थ इत्यत्र त्रितयनिष्ठस्य पदशक्तिरूपपदार्थत्वस्यैकत्वं विवक्षि
तमिति तत्र विशेष्यपदस्य बहुवचनांतत्वेपि विशेषणपदस्यैकवचनांततोपपत्तिः॥ १ समुदायत्वाश्रयत्वानुपपत्तिरित्यर्थः॥

एवं जात्याकृतिव्यक्तयः पदार्थ इत्यत्रेति॥ विशेष्यवाचकं जात्याकृतिव्यक्तय इति पदं तदुत्तरा विभक्तिर्जस् विभक्तिस्तत्तात्पर्यविषयीभूता सं
ख्या बहुत्वसंख्या ततो विरुद्धा एकत्वरूपा संख्या सा विशेषणवाचकपदोत्तरप्रथमया विवक्षितैवेति न विशेष्यविशेषणपदयोः समानवचन
त्वमिति। एवं चैकत्वविशिष्टपदशक्तिरूपं पदार्थत्वं तद्वंतः जात्याकृतिव्यक्तय इति बोधः। एवमसमानलिंगकस्यत्वे विशेष्यवाचकपदा
समानवचनस्यापि विशेषणवाचकपदस्य साधुत्वे असमानलिंगकस्य तु औत्सर्गिकमेव सर्वत्र विशेषणपदानंतरं प्रयोक्तुमुचितमिति॥

सु·टी· ८ प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानिपितरोदेवताइत्यादेरनुपपत्तिंवारयति॥ प्रत्यक्षानुमानेत्यादिना। दिगिति॥ शालाःसुभ्रातरःप रु·
त्याःस्वामिनोदेवृदेवरावित्यत्रभ्रातृपदस्यबहुवचनांतत्वेपिदेवृदेवरपदस्यद्विवचनांतत्वोपपत्तिरिति। अत्रविशेष्यवाचकपदं
स्वामिभ्रातरइतिपदंतदुत्तराजसुविभक्तिस्तत्तात्पर्यविषयीभूताबहुत्वसंख्यातद्धिरूढाद्वित्वसंख्यासादेवृदेवरपदोत्तरऔवि
भक्त्याविवक्षितैवेति। अविवक्षितत्वाभावाद्देवृदेवरपदेद्विवचनांतता। अत्रदेवृदेवरपदस्यदेवृदेवरपदवाच्येलक्षणातेनवाच्य

प्रत्यक्षानुमानेत्यादिसूत्रेप्रमाकरणत्वरूपप्रकृत्यर्थतावच्छेदकस्यप्रत्यक्षानुमानादिनिष्ठस्यैकतयाबाधितत्वेना
विवक्षितत्वात्प्रमाणपदस्यबहुवचनांततेति। एवंपितरोदेवताइत्यत्रापिपितृपितामहादीनांसहितानामेकरूपेण
देवतात्वविरहेणपितृत्वपितामहत्वादिनापृथगेवत्यागोद्देश्यत्वरूपदेवतात्वम्उद्देश्यतावच्छेदकभेदेनैवउद्दे
श्यताभेदात्। तत्रएकत्वस्याविवक्षयादेवतापदस्यबहुवचनांततेतिदिक्॥ सप्रकृतिकत्वंचस्वाव्यवहितोत्तरत्वे
नप्रतिसंधीयमानत्वम्। तेनदधिसुंदरमित्यादौविशेष्यपदानंतरंविभक्तेरसत्त्वेपिनक्षतिः तत्रविभक्तेरनुसंधानं
विनाशाब्दबोधानुपगमात्॥ ११ तावच्छेदकयोर्दे वृदेवरपदयोर्द्वित्वान्वयः। पदरूपपदार्थतावच्छेदकभेदसत्त्वाद्देवृदेवरा
वित्यत्रद्वंद्वोप्युपपद्यते। दधिसुंदरमित्यत्रस्वविशेष्यवाचकंदधिपदंतदुत्तरत्वेनप्रतिसंधीयमानासुब्विभक्तिः प्रथमात्वादिनात
त्सजातीयाविभक्तिर्यस्येतितत्त्वम्। सुंदरपदेइयमेवात्राकांक्षाबोध्येसर्थः॥

एवमिदं दधीत्यादौ विशेष्यवाचकपदोत्तरत्वेन प्रतिसंधीयमानविभक्तिसजातीयविभक्तिकत्वमपि। तथाविधविभक्त्यव्यवहितपूर्ववर्तितया प्रतिसंधीयमानत्वमिति। विशेष्यवाचके इदं पदमिति पदोत्तरस्रूपविभक्तिः प्रथमात्वादिना तत्सजातीयविशेषणवाचकपदोत्तरत्वेन प्रतिसंधीयमाना विभक्तिर्यस्य तत्त्वं विशेषणवाचके दधिपदेऽस्ति। शंकते॥ अथेति। सामग्र्या कार्यजनने। आकांक्षायोग्यता

एवं तादृशविभक्तिसजातीयविभक्तिकत्वमपि तथाविधविभक्त्यव्यवहितपूर्ववर्तितया प्रतिसंधीयमानत्वम् अनेन इदं दधीत्यादौ विशेषणपदानंतरं विभक्तेरसत्वेपि न क्षतिः अथ नीलस्य घट इत्यादावपि पदार्थोपस्थित्यादिकारणसमवधानसंभवात् कथं न नीलघटाद्योरभेदान्वयबोधः सामग्र्या कार्यजनने उक्तनियमभंगप्रसंगरूपबाधकस्याकिंचित्करत्वादिति चेत्। तथाविधान्वयबोधोपयिकाकांक्षाविरहात्॥ तथाहि॥ तादृशान्वयबोधे प्रथमाविभक्त्यन्तघटादिपदसमभिव्याहृतप्रथमांतनीलादिपदत्वमेवाऽसमस्तनीलघटपदाद्याकांक्षा॥

दिना शाब्दबोधजनने। विशेष्यविशेषणपदयोः समानविभक्तिकत्वरूपतथाविधनियमभंगप्रसंगरूपप्रयोजनक्षतेरप्रतिबंधकत्वादित्यर्थः। समाधत्ते॥ तथाविधान्वयबोधोपयिकाकांक्षाविरहादिति॥ विशेष्यविशेषणपदयोः समानविभक्तिकत्वरूपतथाविधनीलप्रकारकाभेदसंसर्गकघटविशेष्यकान्वयबोधजनिकायाः विशेष्यविशेषणपदयोः समानत्वरूपा या आकांक्षा ॥ या अभावादित्यर्थः॥ विनिगमनाभावादाह॥

व्यु॰टी॰ समासस्थले चेति॥ उक्तस्थले॥ नीलघट इति स्थले॥ समासे व्यासे चोक्ताकांक्षाविरहान्नीलप्रकारकाभेदसंसर्गकघटविशेष्यकबो लु॰
२ धापत्तिरित्यर्थः। उक्ताकांक्षाज्ञानयोरिति॥ समासव्यासस्थलीयोक्ताकांक्षाज्ञानयोरित्यर्थः। यत्त्विति। समासव्याससाधारणं विशेषण
वाचकपदस्य विशेष्यवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वस्वरूपं विरुद्धविभक्तिराहित्यमेव तादृशान्वयबोधोपयिकाकांक्षावि
शेष्यवाचकपदनिष्ठविशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वं तु न तथा नीलघटमानयेत्यादावसंभवादिति। नीलो घट इत्य

समासस्थले च घटपदाद्यव्यवहितपूर्ववर्तिनीलपदत्वं नीलादिपदाव्यवहितोत्तरवर्तिघटादिपदत्वं वा आ
कांक्षा उक्तस्थले च तादृश्या एकस्या अप्याकांक्षाया विरहान्नापत्तिः कार्यतावच्छेदककोटावव्यवहितोत्तरत्वनि
वेशान्नोक्ताकांक्षाज्ञानयोः परस्परबोधे व्यभिचारः यत्तु समासव्याससाधारणं विशेषणपदस्य विशेष्यवाचकपदाप्रकृ
तिकविभक्त्यप्रकृतित्वस्वरूपं विरुद्धविभक्तिराहित्यमेव तादृशान्वयबोधोपयिकाकांक्षा विशेष्यवाचकपदनिष्ठविशे
षणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वं च न तथा नीलघटमानयेत्यादावसंभवादिति॥ १ त्र विशेष्यकं च ॥ ॥ घटप
दं तत्प्रकृतिकाया विभक्तिर्द्वितीयादिविभक्तिः तदप्रकृतित्वं विशेषणवाचके नीलपदेऽस्ति। एवं नीलघट इत्यत्रापि। तथा हि वि[illegible]ष्यवाचकं
घटादिपदं तत्प्रकृतिका विभक्तिर्द्वितीया तदप्रकृतित्वं नीलपदे इति विरुद्धविभक्तिराहित्यमेव समासव्याससाधारणी नोक्ता[illegible] राम
प्रकारकाभेदसंसर्गकघटविशेष्यकान्वयबोधजननिका आकांक्षा। नीलस्य घट इत्यादौ तु विशेष्यवाचकघटपदाप्रकृतिका विभक्तिः॥ २

षष्ठीविभक्तिस्तत्प्रकृतित्वमेव नीलपदे॰ तेन नीलस्य घट इति वाक्यान्नीलप्रकारकाभेदसंसर्गकघटविशेष्यकशाब्दबोधः। विशेष्य
वाचकपदनिष्ठविशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वरूपाकांक्षाया नीलो घट इत्यत्र विशेषणवाचकं पदं नीलपदं तदप्रकृ
तिका विभक्तिर्द्वितीयादिविभक्तिस्तदप्रकृतित्वं विशेष्यवाचकपदे घटपदे इति नीलो घट इत्यादौ सत्वेपि नीलघटमानये[त्या]दौ अभावान्न त
न विशेष्यवाचकपदनिष्ठविशेषणवाचकपदाप्रकृतिकविभक्त्यप्रकृतित्वस्य विनिगमनाविरहेणाकांक्षात्वमित्यर्थः। न च [नीलघट] इति स
मस्तं विहाय नीलघटमानयेत्यादि समस्तानुसरणे किं बीजमिति वाच्यं। तत्र विशेषणवाचकपदाप्रकृतिकेत्यस्य [वि]शेषणवाचक

तदसत्॥ विशेष्यवाचकपदाप्रकृतिकत्वस्य तादृशपदानुत्तरत्वस्य तदुत्तरत्वेनाप्रतिसंधीयमानत्वरूपस्य वा
नीलो घट इत्यादौ नीलादिपदसमभिव्याहृतविभक्तौ घटपदसमभिव्याहृतविभक्तिभिन्नतयासत्वात्॥ ७॥

पदोत्तरत्वेनाप्रतिसंधीयमानेत्यर्थकरणेन दोषः। तथाहि नीलघट इत्यत्र विशेषणवाचकं नीलपदं तदुत्तरत्वेनाप्रतिसंधीयमाना वा विभक्ति
र्द्वितीया न तु प्रथमा विभक्तिस्तदप्रकृतित्वं विशेषणवाचकपदे घटपदे इति न दोष इत्याशयेन नीलघट इति समस्तमुपेक्षितवान्। न
च नीलघटमानयेत्यत्रापि नीलं च तं घटं चेति परिनिष्ठितविभक्त्या समासाश्रयणान्न दोष इति वाच्यं। प्रथमांतेन समास इत्यभिप्रायेण दो
षाभिधानादिति। तदसत् इति॥ विशेष्यवाचकपदाप्रकृतिकत्वं विशेष्यवाचकपदानुत्तरत्वं विशेष्यवाचकपदोत्तरत्वेनाप्रतिसंधीयमा
नत्वमिति वा॥ तथा च विशेष्यवाचकपदानुत्तरविभक्त्यप्रकृतित्वरूपं॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥॥

स्यु·टी· अथवाविशेष्यवाचकपदोत्तरत्वेनाग्रतिसंधीयमानविभक्त्यप्रकृतित्वरूपंवाविरुद्धविभक्तिराहित्यमेवाकांक्षानीलोघटइत्यादौनसं रु·
१० भवति। तथाचविशेष्यवाचकंपदंघटपदंतदुत्तरा विभक्तिःसुविभक्तिस्तत्प्रकृतित्वमेवविशेषणवाचकेनीलपदेइतिनीलपदो
त्तरविभक्तेर्घटपदोत्तरविभक्तिभिन्नत्वादित्यर्थः। शंकते। अथविशेष्यवाचकपदोत्तरावृत्तिविभक्तिविभाजकधर्मवद्विभक्तिराहित्य
स्यविवक्षणान्नदोषइतिचेत्इति॥ नीलोघटइत्यत्रविशेष्यवाचकंघटपदंतदुत्तरस्मिन्अवृत्तिर्योविभक्तिविभाजकोधर्मोद्वितीयात्वादि

अथविशेष्यवाचकपदोत्तरावृत्तिविभक्तिविभाजकधर्मवद्विभक्तिराहित्यस्यविवक्षणान्नदोषइतिचेत्तर्हिविभक्तित्वा
दिकमजानतःपुरुषस्यतादृशधर्मज्ञानासंभवात्शाब्दबोधानुपपत्तिःनीलोघटइत्यादावपिसुपदस्याम्पदत्वा
दिभ्रमदशायांतादृशबोधस्यानुदयात् नीलस्यघटइत्यादावपिषष्ठ्यादेःसुपदत्वादिभ्रमदशायांशाब्दबोधस्यसा
स्वरूपतोविरुद्धविभक्तिराहित्यस्याप्रयोजकत्वात्॥ १ स्तद्विभक्तिराहित्यस्यनीलपदेसत्वात्। एवंनीलघटमानय[illegible]त्यत्रवि
शेष्यवाचकंघटपदंतदुत्तरस्मिन्अवर्त्तमानोयोधर्मःतृतीयात्वादिस्तद्विभक्तिराहित्यस्यनीलपदेसत्वान्नीलोघटःनीलघ[illegible]यान्नी
लप्रकारकाभेदसंसर्गकघटविशेष्यकबोधः। नीलस्यघटइत्यादौतुघटपदोत्तरावृत्तिधर्मःषष्ठीत्वंतद्विभक्तिराहि[illegible]सत्वान्न
तादृशबोधइत्यर्थः। समाधत्ते। विभक्तित्वमजानतःपुरुषस्यतादृशधर्मज्ञानासंभवाच्छाब्दबोधानुपपत्तिरिति। यस्यविभक्तित्वज्ञानंना एम
स्तितस्यापिनीलोघटइतिवाक्याच्छाब्दबोधोजायतेसनस्यात्। विशेष्यवाचकपदोत्तरा॥ ॥ ॥ ॥ ॥ १०

इतिपर्मैज्ञानासंभवादित्यर्थः। स्वरूपतोविरुद्धविभक्तिराहित्यस्यप्रयोजकत्वंनसंभवति। तथाहि। नीलस्यघटइत्यादौषष्ठ्यांश्रुतभ्रमोजात
स्तदानींनीलस्यघटइतिवाक्यान्नीलप्रकारकाभेदसंसर्गकघटविशेष्यकबोधोजायतेसनस्यात्। विरुद्धविभक्तिराहित्यस्यस्वरूपतोऽ
भावादतस्तादृशज्ञानस्यैवप्रयोजकत्वंवाच्यमिति॥ ॥ यस्यविभक्तित्वज्ञानंनास्तितस्यबोधोनस्यादितियुक्तमेवसर्वमित्यर्थः। विरुद्ध
विभक्तिराहित्यज्ञानहेतुत्वपक्षेपिविभक्तित्वादिकमजानतःपुरुषस्यशाब्दबोधानुपपत्तिमुद्धर्तुंशंकते। अथनीलोघटोनीलघटइत्यादिद्वि
विधसाधारणमिति। स्वोत्तरत्वादिभिन्नंयत्पदंतदुत्तरंयत्तद्भिन्नत्वविशिष्टंयत्स्वोत्तरत्वादितद्रूपेत्यर्थः। यथानीलोघटइत्यत्रस्वंनीलपदं

अथनीलोघटःनीलघटइत्यादिद्विविधबोधसाधारणंस्वोत्तरसुप्पदभिन्नपदानुत्तरत्वविशिष्ट ॥
स्वोत्तरत्वादिरूपस्याव्यवहितोत्तरत्वसंबंधेननीलादिपदवत्सुबंतघटादिपदत्वमेवतथास्त्वितिचेन्न

तदुत्तरंस्वादिभिन्नंघटपदंतदुत्तरंयत्तद्भिन्नत्वंघटपदेऽस्ति॥ एवंनीलघटइत्यत्रापिस्वोत्तरंनीलपदोत्तरंस्वादिभिन्नंपदंघटपदंनतदुत्तरत्वं
घटपदेऽस्ति॥ अयंचस्वोत्तरत्वंचनीलपदोत्तरत्वमितिस्वरूपस्याव्यवहितोत्तरत्वसंबंधेननीलपदवत्स्वाद्यंतघटपदत्वत्वरूपाकांक्षा
समासव्याससाधारणी। नीलप्रकारकाभेदसंसर्गकघटविशेष्यकबोधजनिकेत्यर्थः॥ नीलस्यघटइतिप्रयोगवारणायस्वादिभिन्नेत्यत्रवि
शेष्यवाचकघटादिपदोत्तरविभक्तिवृत्तिविभक्तिविभाजकप्रथमात्वादिधर्मावच्छिन्नभिन्नेत्यर्थः॥ तथाचनीलपदोत्तरषष्ठ्याःप्र
थमात्वावच्छिन्नभिन्नत्वान्नदोषः॥

समाधत्ते॥ नीलघटरूपमित्यादिवाक्यसाधारण्यानुरोधेनान्यादृशाकांक्षाया उपगंतव्यत्वेन येप दर्शितव्याससमाससाधारणानुगताकां
क्षानुसरणस्याप्रयोजकत्वादिति। नीलंचतत् घटरूपंचेति कर्मधारयस्तत्रोक्ताकांक्षा व्याससमाससाधारणीन संभवति। तथाहि स्वंनी
लपदं तदुत्तरत्वरूपस्याव्यवहितोत्तरत्वसंबंधेन नीलपदवत् भवति रूपपदं। अथच स्वाद्यंतं भवति। तथापि स्वंनीलपदं तदुत्तरं स्वादि
भिन्नं घटपदं तदुत्तरत्वमेव रूपपदे इति तदनुत्तरत्व वैशिष्ट्यं सामानाधिकरण्येन स्वोत्तरत्वेनास्तीति नीलघटरूपमित्यादिसाधारण्यायान्या
दृश्याकांक्षोपगंतव्या साच स्वादिभिन्नेनिराकांक्षत्वप्रक्षेपेण बोध्या। तथाच स्वोत्तरं नीलपदोत्तरं स्वादिभिन्नं निराकांक्षं पदं तदुत्तरं यद्यत्त

नीलघटरूपमित्यादिवाक्यसाधारण्यानुरोधेनान्यादृश्या आकांक्षायाः समासस्थले उपगंतव्यतया उपदर्शितसमा
सव्याससाधारणानुगताकांक्षानुसरणस्याप्रयोजकत्वादिति॥ ((द्भिन्नत्वरूपस्वोत्तरस्वादिभिन्नपदानुत्तरत्वं जातं घटपदं तु स्वोत
रं स्वादिभिन्नं निराकांक्षं पदं न भवति। किंतु रूपमाकांक्षमेवेति। इयमाकांक्षासमासव्याससाधारणीन पूर्वोक्तेत्यर्थः। यद्यपि नीलघटरूपमित्यत्र नील
घटयोरभेदान्वयाभ्युपगमे नीलपदोत्तरं स्वादिभिन्नं पदं घटपदं तदुत्तरं यद्यद्रूपपदं तदनुत्तरत्वं घटपदेऽस्ति॥ अथच स्वोत्तरत्वं नीलप
दोत्तरत्वं चास्ति। तथापि घटपदे स्वाद्यंतत्वं नास्तीति उक्ताकांक्षा नास्ति। तत्र स्वाद्यंत घटादिपदत्वमित्यस्यानुसंधीयमान स्वाद्यंतघ
टादिपदत्वमिति विवक्षणात्प्रकृताकांक्षोत्पादनेऽपि नीलघटरूपमिति वाक्याद्रूपंनीलमन्यद्वेति संशयोच्छेदो जायते स न स्यादिति घ
टपदोत्तरं स्वादिविभक्त्यानुसंधानं नादरणीयमिति घटपदे स्वाद्यंतत्वाभावान्नीलघटयोराकांक्षाभावादन्वयो नास्तिकिं॥ ६॥

तुनीलरूपयोगत्वाभेदान्वयो वक्तव्यः सोपि न संभवति। स्वोत्तरं नीलपदोत्तरं यत्स्वादिभिन्नपदं घटपदं तदुत्तररूपपदे स्वोत्तरस्वादिपदभिन्नपदोत्तरत्वाभाववैशिष्ट्यं नास्तीति प्रकृताकांक्षाविलयापत्तिरिति बोध्यमिति॥ ॥न च स्वोत्तरस्वादिभिन्ननिराकांक्षपदानुत्तरत्वविशिष्टस्वोत्तरत्वरूपस्वाव्यवहितोत्तरत्वसंबंधेन नीलादिपदवत्त्वादंतघटादिपदत्वमेव समासव्याससाधारणी स्वभेदान्वयबोधौपयिका कांक्षास्तीति चेन्न। सिद्धांतमते तु सकलसमासे विशेष्यवाचकपदाव्यवहितपूर्ववर्तिविशेषणवाचकपदाव्यवहितोत्तरत्वस्यैव विशेष्यवाचकपदत्वं वा आकांक्षा। एवं सकलव्यासे प्रथमांतविशेष्यवाचकपदसमभिव्याहृतप्रथमांतविशेषणवाचकपदत्वमाकांक्षा इत्याकां

अथ नीलं घटमानयेत्यादौ नीलादेर्घटादावन्वयोपगमे नीलादिपदोत्तरविभक्त्यर्थकर्मत्वादेः कुत्रान्वय इति चेत्।
न कुत्रापि। विभक्तिपदं साधुत्वार्थमेव प्रयुज्यते अभेद एव वा विशेषणविभक्तेरर्थः॥

((स्याद्वैविध्ये—पि विशेष्यविशेषणेति

शब्दानुगमसंभवात्पूर्वपक्षिणस्तु शब्दानुगमस्याप्यभावात्। स्वोत्तरस्वादिभिन्नं निराकांक्षं पदं तदुत्तरं यत्तद्भिन्नत्वरूपं यत्स्वोत्तरस्वादिभिन्नपदानुत्तरत्वं तद्विशिष्टत्वस्य भेदकूटनिवेशेन गौरवात्तद्दुर्ज्ञेयत्वाच्च। अर्थानुगमेन सिद्धांतिमतस्यैवोचितत्वात्। अथ नीलं घटमानयेत्यादौ नीलादेर्घटादावन्वयोपगमे नीलादिपदोत्तरविभक्त्यर्थस्य कर्मत्वादेः कुत्रान्वय इति चेदिति॥ समाधत्ते॥ न कुत्रापीति पदसाधुत्वाय प्रयुज्यमाना विभक्तिर्निरर्थिकेति भावः। संभवत्यर्थे साधुत्वे पदसाधुत्वमन्याय्यमित्यभिप्रायिकं मतांतरमाह। अभेद इत्यारभ्य वदंतीत्यंतेन। नीलो घट इत्यादौ नीलप्रतियोगिकभेदाभा—ववान्घट इति बोधात् विशेषणविभक्तेरभेदोर्थः॥ ॥ ॥ ॥

ननु अभेदो नामार्थयोःसंसर्गतयाभासत इत्युक्तंतत्राह।समासस्थलएवेति॥नीलघटइत्यादिनानीलप्रकारकाभेदसंसर्गकघटविशेष्य
कबोधोदयादितिभावः।ननुसमासेपिविभक्त्यनुसंधानसंभवेऽभेदोविभक्त्यर्थएवास्त्वित्यतआह।तत्रविभक्त्यनुसंधानंविनेतितदाप्रसि
द्धिरिति।भेदस्यकेवलान्वयितयाअभावाप्रसिद्धिरित्यर्थः।जलेहीत्यादिनेति।घटत्वनीलभेदेतदुभयप्रतियोगिकाभावस्यजलेसत्वा
दित्यर्थः।नीलभेदत्वाद्यवच्छिन्नाभावस्यविभक्त्यर्थत्वेनीलादिपदार्थानन्वयप्रसंगइति।जलेनीलभेदरूपप्रतियोगिसत्वेनतदभा

अभेदस्यसंसर्गमर्यादयाभानंतुसमासस्थलएवनतत्रलुप्तविभक्त्यनुसंधानंविनापिशाब्दबुद्धेरानुभविकत्वादि
त्यपिवदंति अथैतन्मतेअभेदोयदिभेदत्वावच्छिन्नाभावस्तदाऽप्रसिद्धिःयदिचभेदप्रतियोगिकोभावस्तदानी
लंजलमित्यादिवाक्यस्यापिप्रामाण्यापत्तिःजलेहित्वादिनानीलभेदाद्यभावसत्वात्नीलभेदत्वावच्छिन्नाभाव
स्यविभक्त्यर्थत्वेनीलादिपदार्थानन्वयप्रसंगःनचभेदप्रतियोगिकाभावएवविभक्त्यर्थःनीलपदसमभिव्या
हारान्नीलभेदत्वावच्छिन्नाभावःप्रतीयतेइतिवाच्यम्॥ ((वासत्वान्नीलंजलमितिप्रयोगवारणेपिनीलोघट इत्यत्रवि
भक्त्यर्थेनीलभेदाभावेप्रकृत्यर्थस्यनीलस्यान्वयेनिराकांक्षत्वादितिभावः।नचभेदप्रतियोगिकाभावएवविभक्त्यर्थः।नीलपदेस
मभिव्याहारान्नीलभेदत्वावच्छिन्नाभावःप्रतीयतइतिवाच्यमिति॥नीलपदसमभिव्याहारेनीलभेदत्वावच्छिन्नप्रतियोगित्व
संबंधेनभेदविशिष्टोअभावएवनीलभेदत्वावच्छिन्नाभावइत्यर्थः॥ ६ ॥ ७ ॥ ६ ॥ ७ ॥ ६ ॥ ७ ॥

समाधत्ते। पदार्थद्वयसंसर्गभानस्यैवाकांक्षानियम्यत्वादिति मूलं। ननु तत्तत्पदार्थे तत्तत्पदार्थतावच्छेदकस्यापि संसर्गः। पदांतरसमभिव्याहारगम्योऽपि तु शक्तिगम्य इति भावः। नीलघट इत्यत्र नीलपदार्थस्य घटपदार्थे अभेदसंसर्गो भासते स च नीलपदसमभिव्याहाररूपाकांक्षानियम्यः नीलो घट इत्यत्र तु भेदाभावो नीलपदोत्तरप्रथमार्थः तत्र भेदः पदार्थतावच्छेदकः अभावः पदार्थः पदजन्यप्रतीतिविशेष्यः। तत्राभावे पदार्थतावच्छेदकरूपभेदस्य नीलभेदत्वावच्छिन्नप्रतियोगिताकत्वरूपः संसर्गः पदांतरसमभिव्याहाररूपाकांक्षालभ्यो न भवति अपि तु शक्तिगम्यः। शक्तिस्तु भेदप्रतियोगिताकाभाव एव। ननु नीलभेदत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन भेदविशिष्टे। अ

पदार्थद्वयसंसर्गभानस्यैवाकांक्षानियम्यत्वान्नीलभेदत्वावच्छिन्नप्रतियोगितांतर्भावेण वृत्तिं विना भेदरूपपदार्थतावच्छेदकस्याभावे तादृशसंबंधेन भानासंभवात् नैवम् भेदोऽभावश्च विशेषणविभक्तेरर्थः विशिष्टलाभस्त्वाकांक्षादिवशात् एतेन भेदे नीलादिपदार्थान्वये एकदेशान्वयप्रसंग इति निरस्तम्॥ ७ ॥ ६ ॥

नो न भेदरूपपदार्थतावच्छेदकस्याभावरूपतदर्थे नीलभेदत्वावच्छिन्नप्रतियोगिताकत्वरूपस्य तादृशसंबंधस्य भानमिति। यथा घट इत्यादौ घटत्वस्य घटसमवायसंसर्गः शक्त्यैव भासते न तु पदार्थांतरसमभिव्याहारेण घटे घटत्ववैशिष्ट्ये च शक्तिस्वीकारात्तथा प्रकृतेपीति भावः॥ समाधत्ते॥ भेदोऽभावश्चेत्यादिना। विशेषणेति। विशेषणविभक्तेर्नानार्थकत्वेपि। आख्यातार्थवृत्तिवर्तमानत्वयोरिवाकांक्षादिवशाद्विशिष्टलाभ इत्यर्थः। एतेन विभिन्नशक्तिस्वीकारेण। तथा च पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिभंगो नेति भावः॥

नीलघटइत्यादावपिअभेदान्वयबोधापत्तिरिति। नीलपदोत्तरद्वितीयार्थः ऽभेदनीलपदार्थस्यस्वनिष्ठप्रतियोगितानिरूपकतयाभेदस्या ऌः
प्यभावेप्रतियोगितानिरूपकतयाऽभावस्यचविशेषणतयापटेन्वयसंभवात्। नीलाभेदप्रकारकघटविशेष्यकबोधापत्तिरित्यर्थः। नन्वभे
दप्रकारकबोधेविरुद्धविभक्तिराहित्यंतंत्रमितिनियमान्नापत्तिरित्यतआह। धान्येनधनवानित्यादौतृतीययाभेदबोधनादभेदप्रकारकबो
धेविरुद्धविभक्तिराहित्यानपेक्षणादिति॥ द्वितीयादिनेति। विशेषणवाचकपदोत्तरद्वितीयादिनेत्यर्थः। याविशेष्येषुदृश्यंतेलिंगसंख्यावि

नचविशेषणविभक्तेरभेदार्थकत्वेनीलंघटइत्यादावप्यभेदान्वयबोधापत्तिर्धान्येनधनवानित्यादौतृतीययाअभेद
बोधनात्अभेदप्रकारकबोधेविरुद्धविभक्तिराहित्यस्यानपेक्षणादितिवाच्यम्॥ द्वितीयादिनाऽभेदबोधनेद्विती
याद्यन्तविशेष्यवाचकपदसमभिव्याहारस्यप्रयोजकत्वमित्युपगमात् अथप्रमेयोघटइत्यादौप्रमेयत्वावच्छिन्नभे
दाप्रसिद्ध्यालघुधर्मसमनियतगुरुधर्मस्याभावप्रतियोगितानवच्छेदकत्वेकम्बुग्रीवादिमान्घटइत्यादावपिकंबुग्री
वादिमत्वावच्छि न्नप्रतियोगिताकभेदाप्रसिद्ध्याविशेषणविभक्तेरभेदार्थकत्वासम्भवः॥ ((भक्तयः प्रायस्ताएव कर्त्तव्याः सम
नार्थेविशेषणेइतिहर्युक्तेः। नीलंघटइतिवाक्यमेवनभवतीतिभावः। द्वितीयाद्यंतविशेष्यवाचकेसत्वद्वितीयादीत्यादिनात्तृतीयापरिग्रहः। सा
चकर्तृकरणयोरित्यादिसूत्रविहितैवग्राह्या। तेनधान्येनधनवानित्याद्युपपदविभक्तिस्थलेविशेष्यविशेषणपदयोरसमानविभक्तिकत्वे
पिनाभेदबोधानुपपत्तिः। शंकते। प्रमेयोघटइत्यारभ्यचेत्यन्तमित्यंतेन। सर्वोपिप्रमेयइतिप्रमेयभेदाप्रसिद्धिरित्यर्थः। नीलत्वादिनानीलभेदाभाव

स्यनीलघटादौसत्वादिति। नीलरूपाश्रयत्वादिनानीलभेदस्य पीतरूपाश्रयपटादौप्रसिद्धस्यनीलघटेअभावसत्वादित्यर्थः। एतेनेति एते
ननीलघटपरनीलपदघटितनीलोघटइतिवाक्यप्रामाण्यप्रसंगेन। विशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिकमेवविशेषणविभक्त्य
र्थइति। प्रमेयोघटइत्यादौप्रमेयवृत्तिप्रमेयत्ववान्घटः एवंकंबुग्रीवादिमान्घटइत्यत्रापिकंबुग्रीवादिमद्वृत्तिकम्बुग्रीवादिमत्ववान्घटइ
तिबोधस्यनानुपपत्तिरितिभावः ननुविशेषणतावच्छेदकप्रमेयत्वादेर्विशेषणविभक्त्यर्थत्वेअभेदार्थकत्वप्रवादोव्याहतइत्यत

एवंनीलपटादिपरनीलादिपदघटितस्यनीलोघटइत्यादिवाक्यस्यापिप्रामाण्यापत्तिः नीलत्वादिनापटादेर्भेदाभा
वस्यनीलघटादौसत्वात् एतेनविशेषणतावच्छेदकीभूतनीलत्वप्रमेयत्वादिकमेवविशेषणविभक्त्यर्थः नीलत्वादे
र्नीलत्वावच्छिन्नभेदाभावरूपतयाऽभेदार्थकत्वप्रवादोपपत्तिरित्यपिनिरस्तम् नीलत्वादौनीलत्वादिमतः स्वर
तित्वसंबंधेनान्वये आकांक्षाविरहाच्च यथाहितद्विशिष्टेअधिकरणेतदधिकरणतयातदन्वयोनुभवविरुद्धः

आहनीलत्वादेरिति। नीलोघटइत्यत्रनीलत्ववान्घटइतिबोधः नीलत्वंचनीलत्वावच्छिन्नप्रतियोगिताकभेदत्वावच्छिन्नाभावरूपमित्य
भेदार्थकत्वप्रवादोअव्याहतइत्यर्थः। ननुनीलत्वंनीलरूपमेवनतुनीलभेदाभावरूपमतोदोषांतरमाह। नीलत्वादौनीलत्वादिमत
इत्यादिना। नीलोघटइत्यादिना। नीलोघटइत्यत्रविशेषणविभक्त्यर्थेनीलत्वेनीलत्वादिमतः प्रकृत्यर्थस्यस्वप्रकृत्यर्थोनीलत्वा
दिमान्तद्वृत्तित्वंनीलत्वेइत्येवंस्ववृत्तित्वसंबंधेनान्वयोवाच्यः सचनसंभवत्याकांक्षाविरहादित्यर्थः। आकांक्षाविरहमेवोपपा

तद्विशिष्टे भूतले अधिकरणतया तदन्वयो घटान्वयो विरुद्धः। घटवान्घटवानिति बोधाभावात्। तथा तद्धर्मे घटे आधेयतया तद्धर्मवतो न·
घटवतोऽन्वयोऽपि न घटवति घट इति बोधाभावादित्यर्थः। उद्देश्यतावच्छेदकविधेययोरैक्ये शाब्दबोधो न जायते इति नियमेऽपि
आकांक्षाविरह एव बीजं बोध्यं॥ तथा तत्तत्पदार्थनीलत्वे आधेयतासंबंधेन प्रकृत्यर्थस्य नीलत्वादिमतोऽप्यन्वयो न संभवति आकांक्षा
विरहादिति भावः। अत एव कर्म गच्छतीति वाक्यस्य निराकांक्षता इति। अत एव। तद्धर्मे तद्धर्मवतः आधेयतयान्वयविरहादेव। कर्म
त्वे द्वितीयार्थे कर्मत्ववतः प्रकृत्यर्थस्य कर्मणः आधेयतया अन्वये निराकांक्षते त्यर्थः। न चैवं संसर्गतामतेऽप्यनिस्तार इति। एवं नीलो

तथा तद्धर्मे आधेयतया तद्धर्मवदन्वयोऽपि अत एव कर्म गच्छतीति वाक्यस्य निराकांक्षता न चैवं संसर्गतामतेऽप्य
निस्तारः नीलो घट इत्यादौ स्ववृत्तिनीलत्वादेः संसर्गतास्वीकारे उक्तस्थले प्रामाण्यापत्तेर्दुर्वारत्वादिति वाच्यम् स्ववृ
त्तिनीलत्वादेः स्वस्मिन्संबंधतोपगमेन पटादिवृत्तिनीलत्वादेर्घटादौ पटादिसंबंधताविरहेण तादृशातिप्रसंगाभावा

घट इत्यादौ नीलाभेदस्य नीलत्वादिरूपपदार्थेनावच्छेदकरूपत्वे उक्तस्थले नीलपटपरनीलपदसमभिव्याहृतनीलो घट इति
वाक्ये प्रामाण्यापत्तेर्दुर्वारत्वात्। नीलवृत्तिनीलत्वादिरूपाभेदसंबंधेन नीलपदार्थवान्घटो भवत्येवेति प्रामाण्यापत्तिर्दुर्वारेत्यर्थः॥
समाधत्ते। स्ववृत्तिनीलत्वादेः स्वस्मिन्नेव संबंधतोपगमेनेति। स्वं नीलपदार्थो नीलपटः तद्वृत्तेः पटवृत्तेः नीलत्वादेः स्वस्मिन्नेव पट
एव॥ संबंधता न घटे इति तादृशातिप्रसंगाभावात्। नीलपटपरनीलपदघटितनीलो घट इति वाक्यप्रामाण्यापत्तिरूपातिप्रसंगा

यथाकाष्ठलोष्टादौविद्यमानोपिलौहित्यस्यस्वाश्रयसंयोगेनसंबंधःकिंतुस्फटिकादावेवलोहितःस्फटिकइतिविशिष्टबुद्धिनियामक
त्वात्तथानीलपटपरनीलपदघटितानीलोपटइतिवाक्याद्घटेनीलत्वविशिष्टबुध्यनुदयेनस्ववृत्तिनीलत्वादेर्घटेपटसंबंधत्वानस्वी
क्रियते॥किंतुपटएवस्वीक्रियते।नीलपटइतिविशिष्टबुध्युदयादितिभावः।वस्तुतस्त्विति।नीलोघटइत्यत्रनीलघटव्यक्तिगतत
द्व्यक्तित्वावच्छिन्नभेदाभावएव।तत्तद्व्यक्तीनांनीलादिरूपाश्रयव्यक्तीनां।स्वस्मिन्घटेसंबंधः।एवंनीलपटपरनीलपदसमभिव्याहृ
तनीलोघटइतिवाक्येपिनीलपटपरतन्नीलव्यक्तित्वावच्छिन्नभेदाभावोघटेनास्तीतिनैतद्वाक्यप्रामाण्यं॥अन्यदेतदिति।यथाभू

वस्तुतस्तुतत्तद्व्यक्तित्वावच्छिन्नभेदाभावएवनीलत्वादिप्रकारेणभासमानानांतत्तद्व्यक्तीनांस्वस्मिन्संबंधतयाभा
सतइतिनकाप्यनुपपत्तिःसंबंधताचतस्यभेदप्रतियोगिताकाभावत्वेनतत्तद्व्यक्तिभेदप्रतियोगिताकाभावत्वेनवे=
त्यन्यदेतत्।नचैवंविशेषणविभक्तेरभेदार्थकत्वमतेपितत्तद्व्यक्तित्वावच्छिन्नाभेदाएवविभक्त्यर्थोवक्तव्यइतिवा च्यं

तलंघटवदित्यत्रभूतलेघटस्यघटप्रतियोगिकःसंयोगसंबंधस्तत्रसंबंधतावच्छेदकंसंयोगत्वंघटप्रतियोगिकसंयोगत्वंवेतिविचारेणप्र
कृतानुकूलःउभयथापिविशिष्टबुद्धिनियामकत्वरूपसंबंधत्वास्यतेस्तथेहापीतिभावः।नचैवंविशेषणविभक्तेरभेदार्थकत्वमतेपित
त्तद्व्यक्तित्वावच्छिन्नाभेदएवविभक्त्यर्थोवक्तव्यइतिवाच्यमिति।एवंतत्तद्व्यक्तित्वावच्छिन्नाभेदस्यसंबंधत्वस्वीकारेसंभवत्स
र्थसाधुत्वेपदसाधुत्वमन्याय्यमितिन्यायेनतत्तद्व्यक्तित्वावच्छिन्नाभेदएवविशेषणविभक्त्यर्थोस्तु।तेनैवनीलपटपरनील॥ ६॥

मु.टी. पदसमभिव्याहृतनीलोघटइतिवाक्यप्रामाण्यवारणंसंभवतीतिभावः।समाधत्ते।तथासत्यपूर्वव्यक्तिनिष्ठतत्तद्व्यक्तित्वस्येति।नीलोघटोभवि क:
१५ ष्यतीत्यत्रतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकोयोभेदस्तादृशभेदत्वावच्छिन्नप्रतियोगिताकोऽभावोनीलपदोत्तरप्रथमार्थस्तदेकदेशे
तद्व्यक्तित्वेप्रकृत्यर्थस्यनीलरूपवतोऽन्वयः।तथाचापूर्वाभविष्यतीयानीलरूपाश्रयव्यक्तिस्तन्निष्ठंयत्तत्तद्व्यक्तित्वंतस्यकथंचिदपि
भानासंभवेनसामान्यलक्षणारूपभासकविरहाज्ज्ञानासंभवेनतदवच्छिन्नभेदाभावेऽपूर्वव्यक्तित्वावच्छिन्नप्रतियोगिताकभे
दस्याभावेशक्तिग्रहासंभवेनापूर्वव्यक्तीनांअभेदान्वयानुपपत्तेः।अभावज्ञानेहिप्रतियोगिज्ञानंकारणमिति।प्रतियोगिज्ञानाभा

तथासत्यपूर्वव्यक्तिनिष्ठतत्तद्व्यक्तित्वस्यकथंचिदपिभानासंभवेनतदवच्छिन्नभेदाभावेशक्तिग्रहासंभवेनापूर्वव्यक्तीना
मभेदान्वयबोधानुपपत्तेः।संसर्गज्ञानस्यविशिष्टबुद्धावहेतुत्वेनानुपस्थितस्यापिसंसर्गतयाभानसंभवेनसंसर्गेनाम
तेऽनुपपत्त्यभावात्।नचविभक्त्यर्थेऽपिभेदेतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबंधेननीलत्वादिनातत्तद्व्यक्तीना
मन्वयःतादृशभेदानामपितत्तद्व्यक्तिभेदत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावेऽन्वयउपेयते॥ ११ वाच्छक्ति
ग्रहासंभवादपूर्वव्यक्तीनामभेदान्वयबोधानुपपत्तिरित्यर्थः।अभेदस्यसंसर्गतामतेऽपिनैषदोषइत्याह।संसर्गज्ञानस्येति अनुप
पत्त्यभावादिति।नीलपदपरनीलपदघटितस्यनीलोघटइतिवाक्यस्यप्रामाण्याभावादित्यर्थः।नीलपदव्यक्तित्वावच्छिन्नाभे टि रामः
दोनीलपटेएवनतुघटेइतिनप्रामाण्यापत्तिरितिभावः।पुनःशंकते।नचविभक्त्यर्थेऽपिभेदेइति।भेदोऽभावश्चप्रथमार्थः।तत्रनीलत्वादि १५

नीलत्वादिप्रकारेणभासमानानांतत्तन्नीलव्यक्तीनांतत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनैवभेदेन्वयः। एवंतादृशभेदाना
मपि॥ नीलादिव्यक्तिभेदानामपितत्तन्नीलादिव्यक्तिभेदत्वावच्छिन्नाप्रतियोगिताकत्वसंबंधेनाभावेन्वयः। तावतैव। एवमन्वयां
गीकारेणैव॥ तत्तद्व्यक्तित्वावच्छिन्नाभेदलाभइतिनकाप्यनुपपत्तिः। ननीलपटपरनीलोघटइतिवाक्यस्यप्रामाण्यापत्तिः। नीलप
दव्यक्तित्वावच्छिन्नभेदाभावस्यघटेअभावादितिभावः। समाधत्ते। विशेषणतावच्छेदकावच्छिन्नाया एवप्रतियोगितायाइतिवि
शेषणतावच्छेदकंनीलत्वंनतुनीलव्यक्तित्वं। तथाचाभेदस्यविभक्त्यर्थनामतेनीलपटपरनीलपदघटितस्यनीलोघटइतिवाक्य

तावतैवतत्तद्व्यक्तित्वावच्छिन्नाभेदलाभइतिनकिंचिदनुपपन्नमितिवाच्यम्विशेषणतावच्छेदकावच्छिन्नाया
एवप्रतियोगितायाअभावेप्रतियोगिनःसंबंधतयाभानात् अन्यथाविशिष्टवैशिष्ट्यबुद्धित्वानुपपत्तेः। प्रतियोगि
विशेषिताभावज्ञानंचविशिष्टवैशिष्ट्यबोधमर्यादांनातिशेतइतिदर्शनात्। केवलंविशेष्येविशेषणमितिरीत्यानक
श्चिदभ्युपैतीतिचेत्सत्यम्॥ ११ स्यप्रामाण्यापत्तिः। नीलत्वावच्छिन्नप्रतियोगितायाश्चस्वरूपतयाअभावेभेदेप्रतियोगिनोनी
लस्यसंबंधतयाभानात्। यद्वासंबंधतयासंबंधघटकतयाभानात्। नीलत्वावच्छिन्नभेदाभावस्यघटेसत्त्वान्नीलपटपरनीलघ
टितवाक्यस्यप्रामाण्यापत्तिः। अन्यथाविशेषणतावच्छेदकनीलत्वावच्छिन्नप्रतियोगितायाःसंबंधत्वाद्यघटकत्वेविशिष्टस्यवै
शिष्ट्यमितिरीत्याबोधेहिविशेषणतावच्छेदकप्रकारकनिर्णयस्यकारणत्वादितिभावः। ननुविशेष्येविशेषणमितिरीत्यैवाभावस्य

मु॰ दी॰ ले बोधो यावद्विशेषणोपस्थितिजन्ये तस्मिन्बोधेन विशेषणतावच्छेदकनिर्णयः कारणमत आह। प्रतियोगिना विशेषिताभावेति न क्षिति रु॰
१६ ॥ सिद्धांती समाधत्ते। अभेदस्तादात्म्यमित्यादिना। स्वसामानाधिकरण्यस्वप्रतियोगिवृत्तित्वोभयसंबंधेन भेदविशिष्टं यत्तदन्यत्वमि
ति। स्वं नीलघटव्यक्तिभेदस्तत्सामानाधिकरण्यं द्रव्यत्वे अथच स्वं नीलघटव्यक्तिभेदस्तत्प्रतियोगिनीलघटव्यक्तिस्तद्वृत्तित्वं द्रव्य
त्वे इत्युभयसंबंधेन भेदविशिष्टं द्रव्यत्वमेव तदन्यत्वं तद्व्यक्तित्वे इत्यर्थः। स्वप्रतियोगिवृत्तित्वस्यैव संबंधत्वे स्वं नीलव्यक्तिभेदस्त

अभेदस्तादात्म्यं। तच्च स्ववृत्त्यसाधारणो धर्मः असाधारण्यं च एकमात्रवृत्तित्वम्। तच्च स्वसामानाधिकरण्यस्वप्र
तियोगिवृत्तित्वोभयसंबंधेन भेदविशिष्टं यत्तदन्यत्वमित्येकमात्रवृत्तिधर्म एव विशेषणविभक्तेरर्थः इति च्च तत्र प्रकृ
तार्थस्य संसर्गमर्यादया भासते। तादृशधर्मस्तत्तद्व्यक्तित्वादिरूप एव अपूर्वव्यक्तिनिष्ठतादृशधर्मस्य विशिष्य ज्ञातु
मशक्यत्वेप्येकमात्रवृत्तिधर्मत्वादिना सामान्यप्रत्यासत्तितः सुग्रहत्वमेव॥ ॥ प्रतियोगिनीलव्यक्तिस्तद्वृत्तित्वं
न तद्व्यक्तित्वे इत्यनेन संबंधेन भेदविशिष्टमेव तत्तद्व्यक्तित्वमतो द्वितीयसंबंधनिवेशः। तथा च स्वं नीलव्यक्तिभेदस्तत्सामानाधिक
रण्यं तत्तद्व्यक्तित्वेनास्ति नीलव्यक्तिभेदवति पटे तत्तद्व्यक्तित्वस्याभावात्। स्वसामानाधिकरण्यस्यैव संबंधत्वे स्वपदेन पटादि
भेदस्तत्सामानाधिकरण्यं तत्तद्व्यक्तित्वे इति भेदविशिष्टमेव भवतीति स्वप्रतियोगिवृत्तित्वनिवेशः। तथा स्वं पटादिभेदस्तत्प्रतियोगि राम
पटादिस्तद्वृत्तित्वं तद्व्यक्तित्वे नास्तीत्यर्थः। अपूर्वव्यक्तिनिष्ठस्य तादृशधर्मस्येति॥ नीलो घटो मे॥ ६ ॥ ६ ॥ ६ ॥ १६

विष्यती सत्र भाविव्यक्तिनिष्ठस्य तद्व्यक्तित्वस्य विशिष्य ज्ञातुमशक्यत्वेपि सामान्यलक्षणयार्थसंभवात्। तत्तद्व्यक्तित्वस्यैकमात्र
वृत्तितया विशेषरूपेण ज्ञातुमशक्यत्वेपि एकमात्रवृत्तिधर्मत्वादिना सामान्यलक्षणप्रत्यासत्त्या सुग्रहत्वमेव। एकव्यक्तिमात्र
वृत्तिधर्माः एतद्व्यक्तित्वादिरूपाः सर्वेषां तेषामेकव्यक्तिमात्रवृत्तिधर्मत्वेन ज्ञानसंभवादित्यर्थः। अभेदसंसर्गतामतेप्येतादृशानु
गताभेदस्यैव तथात्वमुचितमिति॥ एतादृशानुगताभेदस्यैव। तादात्म्यस्यैव। तथात्वं। संसर्गत्वमुचितमित्यर्थः। संसर्गतामतेपी
त्यपिना प्रकारतामते तादात्म्यस्य विभक्त्यर्थत्वमुक्तमेवेति सूचितं। अभेदस्य संसर्गतामते दूषणमाह॥ तत्तद्व्यक्तित्वावच्छि

अभेदस्य संसर्गतामतेप्येतादृशानुगताभेदस्यैव तथात्वमुचितं। तत्तद्व्यक्तित्वावच्छिन्नभेदाभावकूटस्य विशिष्य
तथात्वे घटो न नील इत्यादिवाक्यजन्यबोधे प्रतियोगिभावान्वयोश्च तुल्ययोगक्षेमाविति न्यायेन तादृशानन्
गतसंबंधावच्छिन्नप्रतियोगिताकाननुगताभावा एव भासेरन्॥ ((न्नभेदाभावकूटस्य विशिष्य तथात्वे घटो न नील इति
वाक्यजन्यबोधे प्रतियोग्यभावान्वयोस्तुल्ययोगक्षेमाविति न्यायेन तादृशाननुगतसंबंधावच्छिन्नप्रतियोगिताकाननुगता ए
वाभावा भासेरन्निति। तथात्वे संसर्गत्वे। अत्रायमर्थः। पीत घटे घटो न नील इति वाक्यं प्रयुज्यते तत्र न अविनिर्मोकदशायां घटो नील इ
त्यत्र येन संबंधेन नीलपदार्थो घटे प्रतीयते तेनैव संबंधेन नीलप्रतियोगिकाभावः घटो न नील इति वाक्यात्प्रतीयते इत्येव हि प्रतियो
ग्यभावान्वयोस्तुल्ययोगक्षेमता नाम। तथा च घटो नील इत्यत्र घटे नीलस्याभेदः संसर्गः स च तत्तन्नीलव्यक्तित्वावच्छिन्नप्रतियोगिताकभे

मुरी वच्छिन्नाभावस्तन्नीलव्यक्तिनिष्ठः। एवमनंतास्तनीलरूपाश्रयव्यक्तिषु तत्तद्व्यक्तिभेदत्वावच्छिन्नप्रतियोगिताकानंताभावाः संबं रू॰
१७ धतयावक्तव्याः। ते एव च संबंधाः पीतघटे घटो न नील इत्यत्र नीलत्वाभाव प्रतियोगितावच्छेदकसंबंधतया भासंते इति तादृशाननु
गतसंबंधावच्छिन्नप्रतियोगिताकाननुगता एवाभावा भासेरन्नित्यर्थः। ननु पीतघटे घटो न नील इत्यत्र तन्नीलव्यक्तित्वावच्छिन्नप्र
तियोगिताकभेदत्वावच्छिन्नप्रतियोगिताकाभावरूपैकसंबंधावच्छिन्नप्रतियोगिताक एक एव नीलत्वाभावः प्रतीयतामित्याशंकामप
नुदति॥ न तु नीलत्वादिव्यतिरेको अभाव इति। तत्र हेतुमाह। तथा सति। एकाभावभाने सति। यत्किंचित्तादृशाभावतात्पर्येण प्रयु

न तु नीलव्यतिरेकोभावः तथा सति यत्किंचित्तादृशाभावतात्पर्येण प्रयुक्तस्य नीलेपि न नील इत्यादिवाक्य
स्य प्रामाण्यं स्यात् इदन्तु बोध्यम्॥ ॰क्तस्य नीलेपि न नील इति वाक्यस्य प्रामाण्यं स्यादिति। सति नीलनिष्ठतद्व्यक्तिभेदा
भावसंसर्गेण नीलत्वाभावबोधतात्पर्येणेत्यर्थः। अत्रायमाशयः। यथा पीतघटे घटो न नील इत्यत्र यत्किंचिन्नीलव्यक्तित्वावच्छिन्न
प्रतियोगिताकभेदत्वावच्छिन्नप्रतियोगिताकाभावसंबंधावच्छिन्नप्रतियोगिताकाभावः प्रतीयते। तथा यत्किंचिन्नीलेपि एतत्सं
बंधावच्छिन्नप्रतियोगिताकनीलत्वाभावसत्त्वान्नीलेपि न नील इत्यस्य प्रामाण्यं स्यादित्यर्थः। यत्किंचित्तादृशाभावतात्पर्येणे
तद्व्यक्तित्वावच्छिन्नभेदाभावसंबंधेन नीलमेतन्नीलवद्व्यक्तावेवास्ति एतद्व्यक्तित्वावच्छिन्नभेदाभावसंबंधावच्छिन्नप्रतियोगिता रम
कनीलत्वाभावस्तन्नीलव्यक्तिभिन्ने सर्वत्रेति नीलांतरव्यक्तावपि नीलत्वाभावोस्तीति नीलेपि न नील इति प्रयोगप्रामाण्यं स्यात्॥ ६ ॥ १७

विशेषणविभक्तेरभेदार्थकत्वे घटो न नील इत्यादौ। नञा तु घटविशेष्यकः तादात्मीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकतादात्म्या भावप्रकारको बोधो जन्यते। न तु नीलादिभेदः। न तु नीलादिप्रतियोगिताकतादात्म्यसंबंधावच्छिन्नप्रतियोगिताको ऽभावः। येन नञो भेदबोधकत्वं स्यात् तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वस्यैव भेदलक्षणत्वादिति भावः। तादात्म्यं संसर्ग इति मते तु नैष दोषः। घटो नील इत्यत्र नीलप्रकारको घटविशेष्यकस्तादात्म्यसंसर्गको बोधः। नञा तु तादात्म्यसंसर्गावच्छिन्नप्रतियोगिताको नीलाभावो घटे प्रत्याय्यते इत्येतन्मते नञो भेदबोधकत्वमव्याहतमेवेति। ननु नञ्विनिर्मोके नीलो घट इत्यत्र तादात्म्यंप्रका

विशेषणविभक्तेरभेदार्थकत्वे घटो न नील इत्यादौ नञा नीलाद्यभेदाभाव एव प्रत्याययिष्यते न तु नीलादिभेदः यादृशसमभिव्याहारस्थले येन संबंधेन यद्धर्मिणि येन रूपेण यद्वत्त्वं असत्त्वे प्रतीयते तादृशस्थले नञा तद्धर्मिणि तादृशसंबंधावच्छिन्नतादृशधर्मावच्छिन्नप्रतियोगिताकतदभावबोधस्य व्युत्पत्तिसिद्धत्वात्॥ ((रतया भासते। नञ्समभिव्याहारे घटो न नील इत्यत्र तादात्म्यं संसर्गतया भासतामिति। नञो भेदार्थकत्वं तादात्म्यस्य प्रकारतावादिमतेऽपि नानुपपन्नमित्याह। यादृशसमभिव्याहारस्थल इत्यादि। नीलो घट इत्यत्र॥ येन संबंधेन॥ तादात्मीयस्वरूपसंबंधेन॥ यद्धर्मिणि॥ घटे॥ येन रूपेण॥ नीलतादात्म्यत्वेन रूपेण यद्वत्त्वं। नीलतादात्म्यवत्त्वं। तत्सत्त्वे प्रतीयते। तादृशस्थले॥ घटो न नील इत्यादिस्थले। नञा तद्धर्मिणि॥ घटरूपे धर्मिणि। तादृशसंबंधावच्छिन्नतादात्मीयस्वरूपसंबंधावच्छिन्नतादृशधर्मावच्छिन्ननीलतादात्म्यवत्त्वावच्छिन्नप्रतियोगिताकाभावबोधस्य व्युत्पत्तिसिद्ध

सु॰टी॰ नियमश्चेत्वादिति। नञानीलत्वतादात्म्याभाव एव बोध्यते। ननु तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकनीलाभाव इति नञो न भेदबो सु॰
१८ धकत्वं तादात्म्यप्रकारतावादिमते इति भावः। ननु व्यासस्थले नञो न भेदबोधकत्वमित्युक्त्वा समासेपि तन्नास्तीत्यत आह। अनी
लं घटमानयेत्यादौ घटपदसामानाधिकरण्यानुरोधेनेति। समानविभक्तिकयोः पदयोरभेदबोधकत्वं सामानाधिकरण्यं तन्निर्वाहेनेत्यर्थः
।नीलभिन्नपरतया॥ नीलभिन्नबोधतात्पर्यकतया॥ नञो भेदवति। लक्षणायाः स्वीकारात्। तथा च नीलपदार्थस्यैकदेशे भेदेऽन्वयः भेदवतो
घटेऽन्वयः। नन्वनीलं घटमित्यत्र नीलपदार्थः नञर्थे भेदे भेदश्च घटेऽन्वेतु व्यासवत्समासेपि निपातार्थत्वेन भेदान्वयस्यैव सत्त्वादिति नञो

प्रतियोग्यभावान्वयो चेत्यादेरप्ययमेवार्थः एवं च नञो भेदबोधकत्वं न कुत्रापि संभवति। अनीलं घटमानयेत्यादौ घ
टपदसामानाधिकरण्यानुरोधेनानीलपदस्य नीलभिन्नपरतया नञो भेदवत्त्वे लक्षणाया उपगंतव्यत्वात्॥

न भेदवति लक्षणेति चेन्न। तथा सति अनीलमिति द्वितीयानुपपत्तेः। इदं त्वत्रावधेयं। अभेदस्य प्रकारतामतेपि घटो न नील इत्या
दिवाक्यस्य नीलाभेदाभावबोधकत्वेपि तृतीयाभावस्य प्रतियोगिस्वरूपतया न नञो भेदबोधकत्वं नानुपपन्नं। परं तु भेदत्वप्रकारेण
बोधो भवति न वेत्यन्यदेतत्। इति नीलाभेदाभावबोधकत्वेपीति विरोधार्थकेनापि शब्देनाभेदाभावबोधनेपि न भेदबोधकत्वं नञ
इति सूचितं। तथापि द्वितीयाभावस्य प्रतियोगिरूपत्वेनाभेदाभावो नाम भेदाभावाभावः स च भेद एवेति भेदबोधकत्वं नञः सू राम
पपन्नमित्यर्थः। तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकाभावत्वं भेदत्वं। भेदाभावप्रतियोगिताकाभावत्वं भेदाभावाभावत्वं॥ ६॥ १८

मितिप्रकारभेदेपिधर्मएकएव। अनेदंचिंत्यते। अभेदेनभेदाभावः किंतु अभेदत्वादात्म्यं तदभावोभावप्रतियोगिकत्वादतिरिक्तो संताभावएवनभेदरूपइतिनञोभेदबोधकत्वमेतन्मतेइरुपपादमेवेति। इदमत्रावधेयमित्यारभ्यइत्यन्यदेतदित्संतोपाद्येऽसार्वत्रिकः। इदंतुतत्त्वमिति। तत्राभेदेशक्तिकल्पनेगौरवमिति। नचाभेदेयत्रेति॥ एकत्वादिसंख्यावाचिकायाविशेषणविभक्तेरभेदेशक्तिभ्रमः स्वारसिकलक्षणाग्रहोवा॥ भेदस्यसंसर्गतामतेविभक्त्यर्थतामतेचतादृशसमभिव्याहारज्ञानस्यप्रथमांतनीलपदप्रथ

इदंतुतत्त्वम्। असमस्तनीलोघटइत्यादिस्थलेऽभेदस्यसंसर्गतोपगमेपिगौरवविरहात्। तत्रविशेषणविभक्तेर्वृत्तिकल्पनमनुचितम्। नचयत्राभेदेविशेषणविभक्तेः शक्तिभ्रमः स्वारसिकलक्षणाग्रहोवातत्रसर्वमतएवाभेदप्रकारकबोधस्यनीलोघटइत्यादिवाक्याद्रुत्पत्त्यातादृशसमभिव्याहारज्ञानस्यद्विविधबोधेहेतुताद्वयंकल्पनीयंअभेदस्यसंसर्गतावादिनेतिगौरवम्। एवंतादृशसमभिव्याहारज्ञानघटितसामग्र्याभिन्नयोग्यताज्ञानघटितत्वेनद्वैविध्यमितिभिन्नविषयकप्रत्यक्षादिकंप्रतितादृशशाब्दसामग्रीप्रतिबंधकतायाअप्याधिक्यमितिवाच्यम्॥ एमांतयद

पदसमभिव्याहारज्ञानस्यद्विविधबोधेअभेदसंसर्गकाभेदप्रकारकबोधेगुरुभूतंहेतुताद्वयंअभेदस्यसंसर्गतामतेस्ति। प्रकारतामतेतुअभेदप्रकारकैकविधबोधांगीकारान्नगौरवमिति। स्थलांतरेप्रकारांतरेणसंसर्गतामतेगौरवमाह। एवंतादृशसमभिव्याहारज्ञानघटितसामग्र्याःभिन्नभिन्नयोग्यताज्ञानघटिततयाद्वैविध्येनभिन्नविषयकप्रत्यक्षादिकंप्रतितादृशशाब्दबोधसामग्रीप्रतिबंधकतायाअ

पाठ्यमिति॥

व्यपदेशिवद्भावेनफलस्यापिकर्मत्वं६

व्यु॰टी॰ संसर्गतावादिमतेशक्तिभ्रमाधीनेस्वारसिकलक्षणाधीनेवाभेदप्रकारकबोधेअभेदसंसर्गकबोधेचैकपदार्थेऽपरपदार्थवत्त्वसंसर्गवत्त्व क॰
१९ रूपयोग्यताज्ञानघटितप्रथमांतनीलपदप्रथमांतघटपदसमभिव्याहारघटितशाब्दसामग्रीभिन्नविषयकप्रत्यक्षंप्रति प्रतिबंधकताधिकं
।प्रकारतामतेएकविधशाब्दसामग्रीप्रतिबंधिकेतिनगौरवं।समाधत्ते॥अभेदस्यसंसर्गतावादिनोक्तस्थलेपितत्संसर्गकबोधस्यैवोपग
मादिति॥उक्तस्थलेपि।शक्तिभ्रमस्वारसिकलक्षणाभ्यामभेदप्रकारकबोधस्थलेपि।अभेदसंसर्गकबोधस्यैवोपगमात्।शक्तिभ्रमेणस्वा
रसिकलक्षणयावोपस्थापितस्याप्यभेदस्यसंसर्गतयाभानमुपगम्यते।अतएवनामार्थधात्वर्थयोःसाक्षाद्भेदसंबंधेनान्वयबोधोनसंभव

अभेदस्यसंसर्गतावादिनोक्तस्थलेपितत्संसर्गकबोधस्यैवोपगमादितिदिक्स्तोकंपचतिमृदुपचतीत्यादौविरुद्धवि
भक्त्यवरुद्धपदोपस्थापितस्यापिस्तोकमृद्वादेर्धात्वर्थेपाकादावभेदान्वयोपिव्युत्पत्तिसिद्धःतदनुरोधेनचद्वितीयां
तपदधातुपदयोःसमभिव्याहारस्याप्यभेदान्वयबोधोपयिकाकांक्षात्वमुपगम्यते॥

॥तीतिव्युत्पत्तोसाक्षात्सद्दानेनग्रा
मंगच्छतीत्यादौग्रामस्यगमनेसाक्षादन्वयोनास्तिकिंतुविभक्त्यर्थकर्मत्वद्वाराभवति।तथाचग्रामनिष्ठकर्मतानिरूपकत्वसंबंधेनग्रामस्यग
मनेऽन्वयःस्वीक्रियतइतिद्वितीयार्थोपिकर्मत्वसंसर्गघटकतयासंसर्गोभवतीतिभावः।तेनसंसर्गतामतेप्येकविधबोधांगीकारान्नदोषावकाश
इति।ननुस्वसमानविभक्तिकेनस्वाव्यवहितपूर्ववर्तिनाचपदेनोपस्थापितस्यैवार्थस्याभेदःसंसर्गतयाभासतइतिव्याससमासभेदेननिरू
क्ताकांक्षयोरेकस्याअप्यभावात्।कथंस्तोकंपचतीत्यादौअभेदान्वयबोधइत्यतोनामार्थधात्वर्थयोरभेदान्वयबोधमाकांक्षांतरेणोपपादयति राम १९

कर्मत्वातिदेशात्। कर्मत्वोपचारात्। क्रियापदस्य तत्र सार्थकप्रत्ययांतधातूपस्थाप्यार्थपरत्वादिति। तत्र क्रियाविशेषणानां कर्मत्वमित्यनुशासनेक्रियापदं सार्थकप्रत्ययांतधातूपस्थाप्यार्थपरं सार्थकप्रत्ययांतधातूपस्थाप्यक्रियास्तद्विशेषणानां कर्मत्वमित्यनुशासनार्थः प्रकृते स्तोकः पाक इत्यत्र च घञो निरर्थकतया सार्थकप्रत्ययांतधातूपस्थाप्यत्वाभावान्न पाकक्रियाविशेषणे स्तोके कर्मत्वसंज्ञाप्रयुक्ता द्वितीयेति भावः।

क्रियाविशेषणस्थले च न द्वितीयातिरिक्तविभक्तिरुत्पद्यते क्रियाविशेषणानां कर्मत्वमित्यनुशासनेन तत्र कर्मत्वातिदेशात् न चैवं स्तोकः पाक इत्यादावपि द्वितीयाप्रसंगस्तत्रापि स्तोकादेः क्रियायामेव विशेषणत्वात् भावव्युत्पत्तौ प्रयोगसाधुत्वमात्रार्थकतया धातुनैव तत्र पाकादिप्रतिपादनादिति वाच्यम् क्रियापदस्य तत्र सार्थकप्रत्ययांतधातूपस्थाप्यार्थपरत्वात् स्तोकं स्थीयत इत्यादौ आख्यातस्यापि वर्तमानत्वार्थकतया सार्थकत्वात् न च वर्तमानत्वाद्यविवक्षायां द्वितीयानुपपत्तिरिति वाच्यम् वर्तमानत्वादिविवक्षास्थल इव अर्थबोधप्रयोजिकाकांक्षाशालित्वेनैव तदविवक्षास्थलेपि भावाख्यातार्थवत्वात्॥

वर्तमानत्वादिविवक्षास्थल इवार्थबोधप्रयोजिकाकांक्षाशालित्वेनैव तदविवक्षास्थलेपि भावाख्यातस्यार्थवत्वादिति॥ स्तोकं स्थीयत इत्यादौ वर्तमानत्वविवक्षायां तादृशार्थे सति स्तोकावर्तमानास्थितिरित्यर्थबोधप्रयोजिका। आत्मनेपदपूर्वयक्पूर्वधातुत्वरूपाकांक्षा। यद्वा धातूत्तरयगुत्तरात्मनेपदत्वरूपाकांक्षाशालित्वमस्ति। यथा तथा वर्तमानत्वाविवक्षायामपि। स्तोकं स्थीयत इत्यादिभावप्रत्ययस्थले इयमेवार्थबोधप्रयोजिकाकांक्षास्तीति आकांक्षावत्त्वमेव पारिभाषिकार्थवत्त्वम्॥

मु०टी० तत्वस्यौयत इति भावप्रत्ययेनेरूपेस्तीनि सार्थकप्रत्ययांतधातूपस्थाप्यक्रियाया विशेषणे स्तोके द्वितीयोपपद्यत इत्यर्थः। आकांक्षासत्त्वेपि
२० विवक्षारूपतात्पर्याभावान्नवर्तमानत्वबोधः॥ केचित्त्विति॥ तत्र पाकादाविति। तत्र घञंतस्थले॥ प्रकृत्येकदेशार्थेपीति। प्रकृत्यर्थ इव प्र
त्ययांन पाकादिस्थलेपि। अनुभवबलात् प्रकृत्येकदेशार्थे प्रत्ययार्थान्वय इति। प्रकृतितदेकदेशान्यतरान्वितस्वार्थबोधकत्वं प्रत्यया

केचित्तु धातोरिव घञंतस्यापि पाकादौ शक्तिरुपेयते। अन्यथा सुब्विभक्त्यर्थसंख्याकर्मत्वादीनां तत्र पाकादावन्वयानुप
पत्तेः प्रकृत्यर्थान्वितस्वार्थबोधकत्वं प्रत्ययानामिति व्युत्पत्तेः। धातूनां च सुब्विभक्त्यप्रकृतित्वात्॥ प्रकृत्येकदेशार्थेपि
प्रत्ययार्थान्वयोपगमे पचन्तं पश्यतीत्यादितः पचमानं पश्यतीत्यादितश्च पाकादौ द्वितीयाद्यर्थकर्मत्वाद्यन्वयबोध
प्रसंगात्। एकविशेषणत्वेनोपस्थितस्यान्यत्र विशेषणत्वेनान्वयस्याव्युत्पन्नतया तत्र प्रत्ययार्थविशेषणपाकादेर्न कर्म
त्वे विशेषणतयान्वय इति चेत् तथापि पाकादिविशेषणतया सुबर्थसंख्याया अन्वयसंभवात्। यत्र पाककर्त्रादेर्द्वि
त्वादिकं बाधितं पाकादेश्च तदबाधितं तत्र पचन्तौ पश्यति पचमानौ पश्यतीत्यादिप्रयोगप्रसंगस्य दुर्वारत्वात्॥

यानामिति व्युत्पत्तिरुक्तस्यनीयेति भावः। ननु पचंतं पश्येत्यादौ एकत्र शत्रर्थे कर्तरि विशेषणत्वेनान्वितस्य धात्वर्थपाकस्य अन्यत्र द्वितीयाद्य
र्थकर्मत्वादौ विशेषणत्वेनान्वयस्याव्युत्पन्नत्वेन पाकादौ द्वितीयाद्यर्थकर्मत्वान्वयवारणेपि द्वितीयार्थसंख्याया विशेष्यतया पाकादावन्व
यमापादयति। तथापीति। एकोयः पाकस्तदनुकूलकृतिमंतं पश्येत्यर्थः। इष्टापत्तिं वारयति। यत्र पाककर्त्रादेर्द्वित्वं बाधितं पाकादेस्तद्द्वित्वादिक
मबाधितं तत्र पचंतौ पचमानौ पश्येत्यतिप्रसंगस्य दुर्वारत्वादित्यर्थः॥

धातूपस्थाप्यार्थेनि॥ पचंतंपश्यसादौ धातूपस्थाप्येऽर्थे पाके पचंतमिति द्वितीयादिरूपसुबर्थैकत्वसंख्यादिबोधं प्रतिपद्यादित्तत्तद्धातूत्तरश
त्रादिप्रत्ययधर्मिकयत्किंचिदर्थपरत्वज्ञानंकर्त्रादिरूपार्थतात्पर्यकत्वज्ञानंतत्प्रतिबंधकमिति॥ पचंतमित्यादौ पाके द्वितीयार्थसंख्यान्वया
पत्तिवारणंसम्भवति॥ पाकंपश्येत्यादौ च धातूपस्थाप्ये पाके पाकमितिद्वितीयार्थैकत्वान्वयो भवति॥ पचधातूत्तरघञ्प्रत्ययधर्मिककिं
चिदर्थपरत्वज्ञानरूपप्रतिबंधकाभावात् घञो निरर्थकत्वादितिदोषोद्धारेऽपि प्रतिबध्यप्रतिबंधकंगौरवमेव दोष इत्यर्थः॥ विशेषणविभ
क्तीति॥ शोभनमिति प्रथमाविशेषणविभक्तिः प्रथमात्वादिनात्तत्सजातीया पचनमिति प्रथमाविभक्तिस्तत्प्रकृतिः पचनमिति ल्युडंतंन

धातूपस्थाप्यार्थेसुबर्थान्वयबोधंप्रतिनतत्तद्धातूत्तरप्रत्ययधर्मिककिंचिदर्थपरत्वज्ञानस्यप्रतिबंधकतासुपगम्येनादृ
शातिप्रसंगवारणेऽचगौरवात् एवंशोभनंपचनमित्यादौधातुमात्रेणपाकाद्युपस्थितौचतत्रशोभनाद्यभेदान्वयबोधा
नुपपत्तिः विशेषणविभक्तिसजातीयविभक्तिप्रकृत्यनुपस्थाप्यत्वात् प्रकृत्यैकदेशसाधारणतादृशविभक्तिप्रकृति
त्वस्यप्रयोजकत्वेतत्रल्युडादेरधिकरणपरत्वेऽपितथाविधान्वयबोधापत्तेः॥ १॥ तुपचइतिधातुभागः॥ तथाचपचनमितिल्युडं

तप्रकृत्यनुपस्थाप्यपाके शोभनान्वयोन संभवतीतिपचनमितिल्युडंतस्यशक्तिरवश्यमभ्युपेयाइतिभावः॥ प्रकृत्येकदेशसाधारणेतिप्रत्य
यविधावुद्देश्यत्वंहिप्रकृतित्वंतच्चपचनमित्यत्रप्रत्ययभागइवधातुभागेऽप्यस्ति॥ शोभनंपचनमित्यत्रविशेषणविभक्तिसजातीयविभक्ति
प्रकृतिधातूपस्थाप्यपाके शोभनान्वयोपपादनेऽपिपचंत्यस्मिन्निसधिकरणार्थल्युडंतपचनपदस्यत्वेऽपिशोभनंपचनमित्य॥ ६ ॥

भिमत्यर्थप्रकारके श्री भार्या स्यकुंभि अनुमय ॥

सु·टी· त्रापिपाकेशोभनान्वयः स्यात्त्वधिकरणइत्यर्थः॥ कस्यचित्प्रतिवंधकतां कल्पयित्वा तद्वारणेचगौरवादिति॥ धातूपस्थाप्यार्थे प्रातिपदि कु·
२१ कार्थाभेदान्वयबोधंप्रतिनतद्वात्तूत्तरप्रत्ययधर्मिककिंचिदर्थपरत्वज्ञानंप्रतिवंधकं॥ प्रकृतेचपचधात्वर्थेपाकेशोभनादावभेदान्वय
बोधंप्रतिपचधातूत्तरल्युट्प्रत्ययधर्मिकाधिकरणार्थपरत्वज्ञानंप्रतिवंधकमितिनधात्वर्थपाकेशोभनान्वयः॥ किंत्वधिकरणइतिपचनमि
तिभावप्रत्ययविशिष्टेशक्तिकल्पनमनर्थकमितिभावः॥ अत्रप्रतिवध्यप्रतिवंधकभावकल्पनेगौरवंदोषइतिप्रतिबध्यप्रतिवंधकभा

कस्यचित्प्रतिवंधकतांकल्पयित्वा तद्वारणेचगौरवात् नचैवमुपकुम्भार्द्धपिप्पल्यादिरूपपूर्वपदार्थप्रधानस
मासपदात्कुंभसमीपपिप्पल्यर्द्धादौविभक्त्यर्थान्वयस्यप्रातिपदिकांतरार्थाभेदान्वयस्य चानुपपत्तिः पूर्वपदस्य
समासोत्तरविभक्त्यप्रकृतित्वादितिवाच्यम् तदनुरोधेनैवनत्रकुंभपिप्पल्यादिपदानामेवकुंभसमीप
पिप्पल्यर्द्धादौलक्षणायाः पूर्वपदस्यतात्पर्यग्राहकमात्रोपयोगितायाश्चस्वीकारात् ॥ ६ ॥ ७ ॥

वानकस्यनोपः॥ तथाचाधिकरणल्युडंतप्रकृत्येकदेशार्थेपाकेशोभनान्वयवारणायप्रकृतित्वंनप्रकृत्येकदेशसाधारणंयतः प्रत्ययविधानु
देश्यत्वंप्रकृतित्वम्॥ उद्देश्यत्वंचपचनमित्यादौधातुप्रत्ययसमुदायेपर्याप्तमिति॥ शोभनंपचनमितिभावल्युडंतस्यकेशोभनाभेदान्व
यानुपपत्तिरिति॥ ल्युट्घञाद्यजंतसमुदायेशक्तिरावश्यकीतिभावः॥ नचैवमुपकुंभार्द्धपिप्पल्यादीति॥ एवंप्रकृतित्वस्यप्रकृत्येकदे राम
शवृत्तित्वे॥ ननुयदर्थयोरन्वयस्तत्पदयोरव्यवहितपूर्वापरीभावोनास्तिकुंभपदेनव्यवधानादित आकांक्षा॥ ६ ॥ ७ ॥ ६ ॥ २१

न्तरमाह॥ तादृशसमस्तपदप्रत्ययपदयोर व्यवहितपूर्वापरीभावोप्याकांक्षेति॥ उपकुम्भं पश्येत्यादौ कुम्भसमीपवर्तिनीकर्मतेति बोधमति
उपकुम्भपदाव्यवहितोत्तर द्वितीयापदस्यान्योपस्थितिस्तेन कारणतेत्यर्थः॥ ननु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति भङ्गः उपपद
सद्वितीयाप्रकृतित्वाभावात्॥ प्रत्ययः परश्चेति सूत्रेण बहुजादिभिन्नप्रत्ययाव्यवहितपूर्वपदत्वं प्रकृतित्वमिति प्रतिपादनादिति चेन्न॥ उ
पकुम्भमित्यत्र समस्तपदाद्द्वितीया विहिता॥ ननु केवलकुम्भपदादिति प्रत्ययाव्यवहितपूर्ववर्तिपदत्वरूपं प्रकृतित्वं समस्तपदे स्ती
ति न प्रत्ययानामित्युक्तव्युत्पत्तिविरोध इति॥ वस्तुतस्तु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तिराकांक्षारू.

वस्तुतस्तु नञोत्तरपदार्थविशेषितपूर्वपदार्थसमीपाद्यर्थादौ प्रत्ययार्थान्वयबोधे तादृशसमस्तपदप्रत्ययपदयोर
व्यवहितपूर्वापरीभावोप्याकांक्षा एवं तत्र प्रातिपदिकांतरार्थयोः भेदान्वयबोधे समानविभक्तिकयोस्तादृशस
मस्तपदपदांतरयोश्च समभिव्याहारोप्याकांक्षा तथा सत्यतिप्रसंगविरहात्॥ छ ॥ छ ॥ छ ।। ॥

पपर्यवस्यतीतिनिनोक्तानुपपत्तिरिति॥ तादृशसमस्तपदपदांतरयोश्चेति॥ उपकुम्भ शोभनमिति पदयोश्चेत्यर्थः॥ तथा सत्यतिप्रसंग
विरहादिति॥ तथा सति उपकुम्भपदाव्यवहितोत्तरम् पदत्वमेव शोभनपदसमभिव्याहृतोपकुम्भपदत्वरूपाकांक्षयोर्नियामक
त्वस्वीकारे सति॥ उपकुम्भमहं पिप्पलीत्यादौ कुम्भसमीपपिप्पल्याद्यर्थादौ द्वितीयार्थान्वयस्य शोभनान्वयस्य च नानुपपत्तिरिति भावः॥
ननु घमन्ते शक्तिर्मास्त्वित्याशंक्य निराचष्टे॥

धात्वर्थपाकादौ प्रत्ययार्थान्वयबोध इति॥ यथोपकुम्भमर्द्धपिप्पल्यौ सादौ प्रकृत्येकदेशार्थे समीपार्द्धादौ विभक्ति॰ शोभनादिरूपप्रातिपदिकान्तरार्थयोरन्वयः स्वीकृतस्तथा मयापि पाकं पचनं च पश्ये त्यत्र धात्वर्थपाके द्वितीयारूपप्रत्ययार्थे कर्मत्वान्वयबोधोपपत्तये घञन्तल्युडन्ताम्पदयोरव्यवहितपूर्वापरीभाव आकांक्षा॥ एवं स्तोकं पाकं पश्येत्यत्र धात्वर्थपाके स्तोकाभेदान्वयबोधे समानविभक्तिक स्तोकपाकपदसमभिव्याहार आकांक्षा॥ एवं भावल्युडि शोभनं पचनमित्यत्र धात्वर्थपाकादौ शोभनरूपप्रातिपदिकान्तरार्थाभेदान्वयार्थं ल्युडन्तपचनपदशो

धात्वर्थपाकादौ प्रत्ययार्थान्वयबोधे प्रातिपदिकान्तरार्थाभेदान्वयबोधे च ल्युड्घञाद्यन्तसमुदायप्रत्यययोरव्यवहितपूर्वापरीभावस्य समानविभक्तिकयोस्तादृशसमुदायपदपदान्तरयोः समभिव्याहारस्य चाकांक्षात्वोपगमे दर्शिताधिकरणार्थकल्युट्प्रत्ययस्थलीयातिप्रसंगस्य दुरुद्धरतया न तत्संभवः अथ घञन्तसमुदायस्य पाकाद्यर्थकत्वे घञन्तसमुदायस्य संयोगविभागत्वादिविशिष्टवाचकत्वं स्यात् संयोगविभागादिपदानां नैमित्तिकसंज्ञात्वनिराकरणं दीधितिकृतां विरुद्धमिति चेत् का क्षतिः नहि कस्यचिद्ग्रन्थकृतो विपरीतलिखनं युक्तिबलाद्दृढसिद्धौ बाधकम्॥ ((भन पदयोः समानविभक्तिकयोरव्यवहितपूर्वापरीभाव आकांक्षा स्वीक्रियते॥ एवं च घञन्तल्युडन्तसमुदाये शक्तिर्न कल्पनीयेत्यत आह॥ दर्शितातिप्रसंगस्य दुर्वारत्वेनेति॥ अधिकरणार्थकल्युडन्तपचनपदस्थलेपि शोभनं पचनमित्यत्र धात्वर्थपाकादौ द्वितीयार्थकर्मैकत्वान्वयस्य शोभनान्वयस्य च दुर्वारत्वे इत्यर्थः। न तत्संभवः ल्युड्घञाद्यन्तसमुदायद्वितीयादिरूपप्रातिपदिकाद्युक्तसमभिव्याहारयोर्नाकांक्षात्वसंभवः। शोभनाभेदान्वयेन धात्वर्थपा

उक्ताकांक्षाकारणत्वे व्यभिचारात्॥ तथाच घञाद्यंतसमुदाये शक्तिरावश्यकीति भावः॥ शंकते॥ अथेति॥ घञाद्यंतसमुदायस्य सार्थक त्वे संयोगविभागादिपदानां नैमित्तिकसंज्ञात्वनिराकरणं दीधितिकृतां विरुध्येतेत्यन्वयः॥ दीधितिमते हि घञाद्यंतसमुदायस्य संयोगवि भागादिपदस्य संयोगत्वजातिविभागत्वजातिविशिष्टवाचकत्वं व्युत्पाद्य घञो ऽसत्वेपि गच्छतिविभजतइत्यादौ कृत्प्रयासंयोगत्वजातिविभा गत्वजातिविशिष्टवाधातुशक्त्यैव संयोगविभागादिघञाद्यंतेपि संयोगत्वविभागत्वजातिविशिष्टबोधनिर्वाहे घञंतेपदे शक्तिकल्पनमनर्थ कमिति घञादिभावप्रत्ययो निरर्थक इति युक्त्या संयोगत्वादिविशिष्टवाचकत्वं प्रसाध्य संयोगविभागादिपदानां घञंतानां नैमित्तिकसंज्ञा

एवंच यत्र धातुमात्रस्यैव पाकादौ तात्पर्यं तत्र तद्विशेषणवाचकपदात् द्वितीयैव यत्र तु कृदंतसमुदायस्य पाकादौ तात्पर्यं तत्र तादृशपदं तथाविधकृदन्तसमुदायसमानविभक्तिकमेव॥

१ त्वनिराकरणं संयोगत्वादिजात्यवच्छिन्नवाचकत्वरूपस्य नैमित्तिकसंज्ञात्वस्य निराकरणं विरुध्येत॥ धातुमात्रस्य संयोगत्वरूपजात्यवच्छिन्नवाचकत्वस्यावश्यकत्वे प्रत्ययविशिष्टस्य जात्यवच्छिन्नवाचकत्वरूपनैमित्तिकसंज्ञात्वं न संयोगादिपदानामिति दीधितिग्रन्थः॥ युक्तिबलादस्तु सिद्धो स्तोकः पाकः शोभनं पचनमित्यत्र धातुमात्रेण पाकाद्युपस्थितौ स्तोकपाकाद्यभेदान्वयो न स्यात्॥ विशेषणविभक्तिप्रकृत्यनुपस्थाप्यत्वादित्युक्तहेतोः घञंतसमुदायस्य वाचकत्वसिद्धौ दीधितिविरोधो न बाधक इत्यर्थः॥ एवंचेति। घञंतस्य शक्तिसिद्धौ चेत्यर्थः। यत्र धातुमात्रस्यैव पाकादौ तात्पर्यं तत्र तद्विशेषणवाचकपदाद्द्वितीयैवेति॥ यत्र पाकादौ धातुमात्रस्य भागं विहाय पच धातुभागस्य पाकादौ विभक्त्यर्थानुकूलव्यापारबोधे तात्पर्यं। तत्र। स्तो

व्यु॰ कंपाकेस्यात्॥ तद्विशेषणवाचकपदात्॥ स्तोकादिपदात्॥ क्रियाविशेषणानांकर्मत्वमित्यनुशासनाद्द्वितीयैव॥ यत्रतुकृदंतसमुदायस्यघञंत कृ॰
२३ वाचकपदस्यपाकादेर्विभक्त्यनुकूलव्यापारेतात्पर्यं॥ तत्र। पाकपदे। तादृशपदं। स्तोकादिपदं। तथाविधघञंतपाकादिसमानविभक्तिकमेव। स्तो
कः पाकइत्येव॥ स्तोकेसंमतिमाह॥ तदुक्तमिति॥ धात्वैकाधिकरण्येतुधातुमात्रोपस्थाप्यविक्लित्त्यनुकूलव्यापारेऽभेदान्वयेतुस्तोकमोदनस्य
पाकइत्यत्रस्तोकपदात्द्वितीयैव॥ कर्तृकर्मणोःकृतीतिषष्ठीकर्मणि॥ ओदनकर्मकपाकइत्यर्थः॥ आधेयत्वेओदनवृत्तिकर्मतानिरूपकःपाकः
धातोर्व्यापारमात्रार्थकत्वेतुकर्मत्वेषष्ठी॥ ओदननिष्ठकर्मतानिरूपकःपाकइत्यर्थः। वैयाकरणास्तुस्तोकंपाकःफलविशेषणत्वात्॥ यथाहितं
डुलंपचतीत्यत्रतण्डुलनिष्ठाविक्लित्तिरितिबोधात्। तण्डुलस्याभेदसंबंधेनविक्लित्तिरूपफलेऽन्वयात्द्विक्लित्तिरूपफलाश्रयत्वात्तण्डुलंक

तदुक्तंकातंत्रपरिशिष्टकृताकथंस्तोकःपाकःकृदन्तविशेषणत्वात्धात्वैकाधिकरण्येतुस्तोकमोदनस्यपाकइतिस्या

॥देवनितिवदंति
त्॥ तथास्तोकंपाकइत्यत्रापिअभेदेनविक्लित्तिनिरूपफलाश्रयस्तोकवाचकपदेपिद्वितीया। स्तोकाभिन्नविक्लित्तिरिति
बोधात्स्तोकःपाकः व्यापारविशेषणत्वादित्याहुः। तेषांमतेस्तोकंपचतीत्यत्रव्यापारविशेषणत्वतात्पर्येगतिविरहइति। नव्यनैयायि
कास्तुस्तोकंपचतीत्यादौव्यापारविशेषणत्वेपिनदोषः। सामान्येनपुंसकमितिसूत्रेणनपुंसकलिंगतयोत्सर्गिकैकवचनतयाचस्तोकमि
त्यत्रप्रथमाविभक्त्यंगीकारात्। फलविशेषणतात्पर्येपिप्रथमैव॥ एवंक्रियाविशेषणत्वेपिक्रियावाचकपदोत्तरंद्वितीयाप्रतिपादकपा राम
णिन्यनुशासनविरहेपिनक्षतिरित्याहुः। वदंतीत्यस्वरसस्तद्बीजंतुभावार्थकघञ्ल्युट्क्तिनाद्यनेककृदंतसमस्येः नंनशक्ति॥ २३

तज्ज्ञानतत्कारणत्वकल्पनमपेक्ष्य शोभनं पचनमित्यधिकरणार्थकल्युट्स्थले धात्वर्थे सुबर्थकर्मत्वादीनां शोभनादिप्रातिपदिकान्तरार्थानां चान्वय
बोधापत्तिवारणाय पचादिधातूत्तरल्युडादिप्रत्ययधर्मिकाधिकारणादिरूपमतः किंचिदर्थपरत्वज्ञानस्य सिद्धस्य प्रतिबंधकत्वरूपधर्मक
ल्पनमेवोचितं धर्मिकल्पनातो धर्मकल्पनाया एव लघीयस्त्वादिति॥ तदर्थबोधकपदोत्तरविभक्त्या संख्याबोधनेऽभेदसंसर्गावच्छिन्न
प्रकारता— तदर्थविषयताशालिशाब्दबोधसामग्र्यपेक्षिता तादृशबोधस्तदर्थविशेष्यकस्तदर्थनिरूपितभेदान्वयविषयकश्चेति॥ य
था राजास्तीत्यत्र तदर्थः राजपदार्थस्तद्बोधकं राजपदं तदुत्तरप्रथमा एकत्वरूपसंख्याबोधने एको राजास्तीति बोधेऽभेदसंसर्गावच्छिन्न

तदर्थकपदोत्तरविभक्त्या संख्याबोधनेऽभेदसंसर्गावच्छिन्नप्रकारताभिन्नतदर्थविषयताशालिशाब्दबोधसा
मग्री अपेक्षिता॥ तादृशश्च बोधस्तदर्थविशेष्यकस्तदर्थनिरूपितभेदान्वयविषयकश्च॥

१९ प्रकारता राजा पुरुष इत्यत्र राज्ञि प्र
सिद्धा तद्भिन्ना या तदर्थविषयता राजनिष्ठविशेष्यता तच्छालिशाब्दबोधस्यैको राजा इत्याकारकस्य सामग्री राजपदार्थोपस्थितिरा
जपदसमभिव्याहृतप्रथमादिविभक्त्युपस्थितिरूपापेक्षिते त्यर्थः। यथा राज्ञः पुरुष इत्यत्र राजपदोत्तरषष्ठ्या एकत्वबोधने एकराज
निरूपितस्वत्ववानिति शाब्दबोधेऽभेदसंसर्गावच्छिन्नप्रकारताभिन्ना या स्वत्वनिष्ठाविशेष्यता निरूपिता निरूपितत्वसंबन्धावच्छि
न्ना राजनिष्ठा प्रकारतारूपविषयता तच्छालिबोधस्यैकराजनिरूपितं स्वत्वमिति बोधस्य सामग्री राजपदोत्तरङस्पदसमभिव्या
हाररूपाकांक्षा योग्यता राजपदजन्योपस्थितिङस्पदजन्योपस्थितिनिरूपापेक्षिते त्यर्थः॥ ६ ॥ ० ॥ ६ ॥

मु.टी. ननु पुरूरवोमाद्रवसौ विश्वेदेवा इत्यत्र पुरूरवोमाद्रवपदोत्तरविभक्त्या द्वित्वबोधनादभेदसंसर्गावच्छिन्नैव विश्वेदेवनिष्ठविशेष्यतानि रु.
२४ रूपितत्वा प्रकारता पुरूरवोमाद्रवसो नैव भेदसंसर्गावच्छिन्नप्रकारताभिन्नपुरूरवोमाद्रवोनिष्ठा विषयता इत्यभेदसंसर्गावच्छिन्नप्रकार
ताभिन्नपुरूरवोमाद्रवोनिष्ठविषयताशालिशाब्दबोधस्य सामग्र्यपेक्षणाद्व्यभिचार इति चेन्न॥ विशेष्यान्वयिसंख्याविरुद्धसंख्यानवच्छिन्न
त्वेन प्रकारताविशेषणात्॥ पुरूरवोमाद्रवोनिष्ठाप्रकारताविशेष्यान्वयिना या संख्या विश्वेदेवनिष्ठा बहुत्वसंख्या तद्विरुद्धा द्वित्वसंख्या तदव
च्छिन्नैवेत्यदोषात्॥ नीलो घटो नीलौ घटौ इत्यादौ च विशेष्यवाचकपदोत्तरविभक्त्यैव द्वित्वादिकं प्रत्याय्यत इति॥ विभक्त्यैवेत्येवका

नीलौ घटावित्यादौ च विशेष्यवाचकपदोत्तरविभक्त्यैव द्वित्वादिकं प्रत्याय्यते॥ एवं च क्रियाविशेषणवाचकपदोत्तरविभ
क्त्या अबाधितयोरपि द्वित्वबहुत्वयोः प्रत्यायनासंभवात्तादृशपदोत्तरमौत्सर्गिकमेकवचनमेव भावाख्यातस्यत्ववदित्यव
धेयम् अभेदान्वयबोधश्च विरूपोपस्थितयोरेवेति व्युत्पत्तिः घटो घटः दण्डवान् दण्डवान् पाकं पचतीत्यादौ घटत्वदण्डव
त्वपाकत्वाद्यवच्छिन्ने तत्तद्रूपावच्छिन्नस्य तथाविधान्वयबोधानुदयात्॥ ॥ रेण विशेषणवाचकपदोत्तरविभक्त्या क्वापि सं
ख्या न प्रत्याय्यते॥ किंतु विशेषणविभक्तिः साधुत्वार्थैव यतो नीलो घटौ इत्यत्र नीलनिष्ठविषयताः भेदसंसर्गावच्छिन्नप्रकारतारूपैव न तु
तद्भिन्ना इति निरुक्तविषयताशालिशाब्दसामग्र्यभावात् न नीलपदोत्तरविभक्त्या संख्याबोध इति भावः। अभेदान्वयश्च विरूपोपस्थितयो राम
रेवेति व्युत्पत्तिरिति॥ विभिन्नाभ्यां नीलत्वघटत्वधर्माभ्यामुपस्थितयोर्नीलघटयोरेव नीलो घट इत्यादावभेदान्वयबोधः॥ ९॥ ९॥ २४

ननु घटो घट इत्यादावेव घटत्वरूपेणोपस्थितयोरित्यर्थः। अथेत्यादि। अभेदान्वयप्रयोजकसमानविभक्तिकत्वविरुद्धविभक्तिराहित्यादेः सत्त्वात्कथं नाभेदेनान्वयबोध इत्यर्थः। अत्राहुरिति। आकांक्षायोग्यतादिरूपसामग्रीवशाद्यादृशशाब्दबोधः क्वचित्प्रसिद्धस्तादृशबोधस्यैवान्यत्रापत्तिः संभवति आकांक्षादिबलान्नत्वापादकाभावेनाप्रसिद्धस्येत्यर्थः। तर्हि घटांशे विशेषणतावच्छेदकविधया नीलादिभाननियामकनी

अथ तत्प्रयोजकसमानविभक्तिकत्वादेः सत्त्वात्कथं न तादृशान्वयबोधः अत्राहुः यादृशं फलं क्वचित्प्रसिद्धं तत्तादृशस्यैवापत्तिः संभवति रूपसामग्रीबलात् यादृशं च सर्वथैवाप्रसिद्धं तादृशस्य चापादकाप्रसिद्धेरापत्तिरशक्यैवेति घटत्वाद्यवच्छिन्नविशेष्यताकाभेदसंसर्गकघटत्वाद्यवच्छिन्नप्रकारकशाब्दबोधस्य क्वचिदप्यनुदयात्कथं तदापत्तिः। अथ घटो नीलघटः दण्डवान् रक्तदण्डवानित्यादौ तादृशशाब्दबोधस्य प्रसिद्धिः विधेयकोटावधिकावगाहिनः शाब्दबोधस्य नवीनैः स्वीकारादिति चेत्तर्हि घटाद्यंशे विशेषणतावच्छेदकविधया नीलादिभाननियामकनीलाद्युपस्थितितात्पर्यज्ञानविशेषादिघटितैव सामग्री घटत्वावच्छिन्नविशेष्यकनीलघटत्वाद्यवच्छिन्नाभेदान्वयबोधप्रयोजिका तदभावादेव घटो घट इत्यादिषु न तादृशशाब्दबोधापत्तिरिति केचित्॥

१ लाद्युपस्थितितात्पर्यज्ञानघटितैव सामग्री घटत्वाद्यवच्छिन्नविषयकनीलाद्यवच्छिन्नाभेदान्वयबोधप्रयोजिका तदभावादेव घटो घट इत्यादौ न तादृशान्वयबोधापत्तिरिति॥ तर्हि विधेयकोटावधिकावगाहिनः शाब्दबोधस्य नवीनैरुपगमात्। अधिकांशविषयतानियामिका सामग्री नवीनैर्वक्तव्या॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

साचसामग्रीघटोनीलघटइत्यादौपदांशेनीलरूपविशिष्टोघटोविशेषणतयाभासते॥ नीलरूपंचविशेषणतावच्छेदकतयाभासतेतत्र
नीलादिभाननियामिकासामग्रीनीलपदजन्यनीलोपस्थितिर्नीलोघटोघटइतिपदंघटविशेष्यकनीलघटाभेदबोधंजनयत्विति ज्ञानंचत
दृदितेवेतिनीलपदजन्यनीलाद्युपस्थित्यभावात्। घटोघटइत्यादितोनघटत्वावच्छिन्नविशेष्यकोघटाभेदबोध इत्यर्थः अथद्रव्यत्वा
दौधर्मितावच्छेदकतासंबंधेनप्रसिद्धस्यशुद्धघटत्वावच्छिन्नप्रकारकाभेदान्वयबोधस्यघटत्वादावापत्तिः। नचापादकाभावः। तत्रतात्प
र्यज्ञानविशेषादिघटितायाःधर्मितावच्छेदकतयाद्रव्यत्वादौतदुत्पादनियामकसामग्र्याएवापादकत्वादिति। द्रव्यंघटइत्यादौघटपदंद्र

तत्रद्रव्यत्वादौधर्मितावच्छेदकतासंसर्गेणप्रसिद्धस्यशुद्धघटत्वाद्यवच्छिन्नप्रकारकाभेदान्वयबोधस्यघटत्वा
दावापत्तिसंभवात्॥ नचतत्रापादकाभावःतात्पर्यज्ञानविशेषादिघटितायाधर्मितावच्छेदकतयाद्रव्यत्वादौत
दुत्पादनियामकसामग्र्याएवापादकत्वात्॥ ॥ द्रव्यपदार्थान्वितस्वार्थबोधयत्विति तात्पर्यज्ञानंधर्मितावच्छेदकतासं
बन्धेनद्रव्यत्वेवर्त्ततेएवंद्रव्यपदार्थोघटत्वावच्छिन्नाभेदसंसर्गवानितियोग्यताज्ञानंस्मरणात्मकंप्रत्यक्षात्मकंवाधर्मितावच्छेदकतासं
बंधेनद्रव्यत्वेस्तीतितद्रूपासामग्रीयथाद्रव्यंघटइत्यत्रधर्मितावच्छेदकतासम्बन्धेनद्रव्यत्वेस्तितथाघटोघटइत्यत्रापितात्पर्यज्ञानयो
ग्यताज्ञानादिरूपासामग्रीधर्मितावच्छेदकतासंबंधेनघटत्वेस्तीतिघटोघटइत्याकारकशाब्दबोधापत्तिरित्यर्थः। घटोघटइत्य
॥ तःशाब्दबोधापत्तिमुद्धर्तुंशंकते॥

नचेत्यादिना॥ धर्मितावच्छेदकतासंवन्धेन द्रव्यत्वादेौ तादृशान्वयबोधे सत्ति प्रयोजिका घटप्रकारकाभेदान्वयबोधे सति प्रयोजिका द्रव्य
पदजन्य द्रव्यत्वावच्छिन्नोपस्थितितदवच्छिन्नविशेष्यकयोग्यताज्ञानादिघटिता सामग्र्येव द्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानादी
सर्थः॥ तयाच द्रव्यपदजन्योपस्थितिद्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानाद्यभावान्न घटो घट इत्यादिशाब्दवोध इति भावः॥ सामग्र्येवे
त्येवकारेण पूर्वोक्तघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानात्तादृशतात्पर्यज्ञानस्य केवलस्य द्रव्यपदजन्योपस्थित्यादिर
हितस्य कारणत्वनिरासः॥ ननु द्रव्यपदजन्य द्रव्यत्वावच्छिन्नोपस्थितिद्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्र्या आ

नच धर्मितावच्छेदकतासंवंधेन द्रव्यत्वादेौ तादृशान्वयबोधे सति प्रयोजिका द्रव्यपदजन्य द्रव्यत्वाद्यवच्छिन्नोप ६
स्थितितदवच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्र्येव। धर्मितावच्छेदकतायास्तत्कार्यतावच्छेदकसंवंधताविरहे

त्वविषयत्वात्तस्यैव द्रव्यं घट इति शाब्दवोधजनकत्वेन कथं द्रव्यत्वनिष्ठ धर्मितावच्छेदकतासंवंधेन द्रव्यत्वादेौ द्रव्यं घट इति शाब्दवोधप्र
योजकत्वं समवायेन योग्यताज्ञानमात्मनि द्रव्यं घट इति शाब्दवोधस्य धर्मितावच्छेदकतासंवंधेन द्रव्यत्वेति वैयधिकरण्यात्कार्यताव
च्छेदकसंबन्धेन कार्यं सति प्रतिकारणतावच्छेदकसंवंधेन कारणसत्वमेव प्रयोजकं। सच संवंध उभयत्र समवाय इत्यत आह॥ ध
र्मितावच्छेदकतायाः तत्कार्यतावच्छेदकसंवंधताविरहेपीति॥ द्रव्यत्वनिष्ठधर्मितावच्छेदकतायाः द्रव्यपदजन्य द्रव्यत्वावच्छि
न्नोपस्थितिद्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्र्याः कार्यतावच्छेदकसंबंधत्वाभावेपीत्यर्थः॥ ६ ॥

तथाचसमवायसंबंधेनद्रव्यंघटइतिबोधप्रतिसमवायसम्बन्धेनद्रव्यपदजन्यद्रव्यत्वावच्छिन्नोपस्थितिर्द्रव्यत्वावच्छिन्नविशेष्यकयोग्यता ज्ञानादिघटितसामग्रीनियामिका नतु द्रव्यत्वनिष्ठधर्मितावच्छेदकतासंबंधेनद्रव्यंघटइतिशाब्दबोधप्रतिद्रव्यपदजन्यद्रव्योपस्थितिर्द्रव्यविशेष्यकयोग्यताज्ञानादिघटितसामग्रीनियामिका येनैतत्सामग्र्यभावात् धर्मितावच्छेदकतासंबंधेनद्रव्यत्वेद्रव्यंघटइतिशाब्दबोधोनस्यात् एवंचद्रव्यत्वनिष्ठधर्मितावच्छेदकतासंबंधेनद्रव्यंघटइतिशाब्दबोधेघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानादिघटितसामग्र्येवनियामिका साचसामग्रीयथाद्रव्यत्वेतथाघटत्वेप्यस्तीति घटोघटइति शाब्दबोधापत्तिस्तदवस्थेति भावः॥ पुनरपि घटोघटइतिशाब्दबोधापत्तिमुद्धरति॥ द्रव्यत्वादिनिष्ठायास्तस्यास्तत्कार्यतावच्छेदकधर्मघटकत्वात्॥ द्रव्यत्वादिनिष्ठायास्तस्याः

द्रव्यत्वादिनिष्ठायास्तत्कार्यतावच्छेदकधर्मघटकत्वात्॥

धर्मितावच्छेदकतायाः॥ तत्कार्यतावच्छेदकधर्मः द्रव्यपदजन्यद्रव्यत्वाद्यवच्छिन्नोपस्थितिद्रव्यविशेष्यकयोग्यताज्ञानादिघटितसामग्रीकार्यतावच्छेदकधर्मः॥ द्रव्यत्वावच्छिन्नधर्मिताकघटत्वावच्छिन्नप्रकारताकाभेदसंसर्गकशाब्दत्वरूपोधर्मस्तद्घटकत्वं द्रव्यत्वनिष्ठधर्मितावच्छेदकतावच्छेदकतायाअस्ति॥ अत्रायंभावः॥ द्रव्यत्वनिष्ठधर्मितावच्छेदकतायदिद्रव्यपदजन्योपस्थितियोग्यताज्ञानादिघटितसामग्र्याः कार्य्यतावच्छेदकसंबंधः स्यात्तदा धर्मितावच्छेदकतासंबंधेनद्रव्यंघटइतिशाब्दबोधद्रव्यपदजन्योपस्थितियोग्यताज्ञानादिघटितसामग्रीप्रयोजिकास्यात्॥ प्रयोजकीभूतद्रव्यपदजन्योपस्थितियोग्यताज्ञानादिघटितसामग्र्यभावाच्च॥ ॥

घटो घट इति शाब्दबोधापत्तिर्न स्यात्॥ द्रव्यत्वनिष्ठधर्मितावच्छेदकतायाः सामग्रीकार्यतावच्छेदकसंबंधतानंगीकारेऽपि तत्संबंधेन द्र
व्यं घट इति शाब्दबोधप्रयोजकत्वेनेनसामग्र्या इति शाब्दबोधापत्तिस्तदवस्थैव॥ तथापि द्रव्यत्वनिष्ठधर्मितावच्छेदकतायाः द्रव्य
पदजन्यद्रव्यत्वावच्छिन्नोपस्थितिद्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्रीकार्यतावच्छेदकधर्मघटकत्वं वर्त
त एव द्रव्यत्वरूपावच्छेदकाद्यवच्छिन्नधर्मिताकघटत्वावच्छिन्नप्रकारताकाभेदसंसर्गकशाब्दत्वस्य कार्यतावच्छेदकधर्मघ
टकत्वादेव देतोः द्रव्यत्वनिष्ठधर्मितावच्छेदकताघटितद्रव्यत्वावच्छिन्नधर्मिताकघटत्वावच्छिन्नप्रकारताकाभेदसंसर्गकशाब्द

तादृशसामग्र्याः स्वात्मनिष्ठप्रत्यासत्त्या द्रव्यत्वाद्यवच्छिन्नविशेष्यकघटत्वाद्यवच्छिन्नाद्यभेदबुद्धित्वरूपस्वीयकार्यता
वच्छेदकावच्छिन्नासत्तेरव्याप्यतया घटत्वादेर्धर्मितावच्छेदकतासंबंधेन घटत्वावच्छिन्नाभेदबोधापादकत्वं न स
भवतीति वाच्यम्॥

त्वावच्छिन्नप्रतिद्रव्यपदजन्योपस्थितितादृशयोग्यताज्ञानघटितासामग्रीप्रयोजिका भवत्येवेति तादृशद्रव्यप
दजन्योपस्थित्यादिघटितोक्तसामग्रीरूपप्रयोजकाभावान्न घटो घट इति शाब्दबोधापत्तिरिति भावः। तस्या स्वात्मनिष्ठप्रत्यासत्त्येति॥ त
स्याः स्वद्रव्यपदजन्यद्रव्योपस्थितिद्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्र्या व्यापिकाया आत्मनिष्ठप्रत्यासत्त्या सम
वाय संबंधेन द्रव्यत्वावच्छिन्नविशेष्यकघटत्वाद्यवच्छिन्नाभेदबुद्धित्वरूपकार्यतावच्छेदकावच्छिन्नासत्तिव्याप्या॥ समवाय संबं
धेन यत्र द्रव्यं घट इति शाब्दबोधो व्याप्यस्तत्रात्मनिष्ठद्रव्यपदजन्यद्रव्यत्वावच्छिन्नोपस्थितिद्रव्यत्वावच्छिन्नविशेष्यक

मु·टी योग्यताज्ञानादिघटितासामग्रीव्यापिकाकार्यतावच्छेदकसंबंधेनयत्रकार्य्यंकारणतावच्छेदकसंबंधेनतत्रकारणमितिसामग्रीव्याप्तिः॥प्रकृ ऊ·
२७ तेचद्रव्यंघटइत्याकारकाकार्यैवशाब्दव्यक्तिः।समवायेनात्मनिधर्मितावच्छेदकतासंबंधेनसैवशाब्दव्यक्तिर्द्रव्यत्वेवर्तनइतिद्रव्यंघटइ
तिशाब्दधीःस्यान्नामघटोघटइतिशाब्दधीस्तुकथंस्यात् सामग्रीविरहात्॥ तथाहि। आत्मनिष्ठसमवायप्रत्यासत्त्यायोग्यताज्ञानादिघ
टितसामग्रीद्रव्यत्वनिष्ठधर्मितावच्छेदकतासंबंधेनशाब्दबोधव्यापिकातथाचव्यापिकायाद्रव्यादिपदजन्यद्रव्यत्वावच्छिन्नोपस्थिति
द्रव्यत्वावच्छिन्नविशेष्यकयोग्यताज्ञानादिघटितसामग्र्याःधर्मितावच्छेदकतासंबंधेनघटत्वेऽभावान्नघटोघटइतिशाब्दबोधापत्ति
रित्यर्थः॥अत्रायंभावः॥अत्रसामग्रीव्याप्तिर्द्वैधादैशिकीकालिकीच॥तथाहियत्रकारणतावच्छेदकप्रत्यासत्त्यायोग्यताज्ञानघ
टितसामग्रीतत्रकार्यतावच्छेदकप्रत्यासत्त्यातादृशबोधइत्येका॥यत्रकारणतावच्छेदकधर्मघटकप्रत्यासत्त्याइतरकारण
विशिष्टयोग्यताज्ञानादिरूपासामग्रीतत्रकार्य्यतावच्छेदकधर्मघटकप्रत्यासत्त्यातादृशबोधइत्यपरा॥तथाचप्रथमव्याप्तिबला
द्यदाकारणतावच्छेदकसंबंधेनकारणाधिकरणेतदवच्छेदकसंबंधेनात्मनिकार्यमुत्पद्यतेतदाकारणतावच्छेदकधर्मघटक
संबंधेनकारणाधिकरणेद्रव्यत्वेकार्यतावच्छेदकधर्मघटकावच्छेदकताप्रत्यासत्त्याद्रव्यत्वेप्युत्पद्यतेततश्चैतादृशसामग्र्या
धर्मितावच्छेदकतासंबंधेनद्रव्यत्वेतादृशबोधप्रयोजकत्वमक्षुण्णमेवेतिभूयोघटोघटइत्याकारकशाब्दबोधमापादयितुमात्मनि
ष्ठप्रत्यासत्तिंदूषयित्वाधर्मितावच्छेदकताप्रत्यासत्त्याशाब्दधियमुपपादयति॥ छ॥ ६॥ छ॥ ६। राम २७

योग्यताज्ञानस्य धर्मितावच्छेदकमिति॥ समवायेन द्रव्यत्वावच्छिन्नधर्मिकघटत्वावच्छिन्नप्रकारकशाब्दबोधम्प्रति। समवायेन द्रव्यत्वावच्छिन्नधर्मिकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गक द्रव्यं घट इत्याकारकयोग्यताज्ञानमात्मनिष्ठप्रत्यासत्त्याकारणत्वे द्रव्यत्वप्रमेयत्वाद्यनंतधर्मितावच्छेदकभेदेनानंतकार्यकारणभावकल्पने गौरवेण लाघवाद्धर्मितावच्छेदकतासंबंधेन द्रव्यं घटः प्रमेयो घट इत्याकारकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकशाब्दबुद्धौ। तादृशसंबंधेन। धर्मितावच्छेदकतासंबंधेन। तस्य। घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानस्य॥ द्रव्यत्वप्रमेयत्वादिरूपधर्मितावच्छेदकमनिवेश्य हेतुताकल्पनस्यैवोचितत्वात्॥ न यावद्धर्मितावच्छेदक

योग्यताज्ञानस्य धर्मितावच्छेदकं निवेश्य तद्भेदेन अनंतकारणताकल्पनमपेक्ष्य लाघवाद्धर्मितावच्छेदकतासंबंधेन शाब्दबुद्धौ तादृशसंबंधेन तस्य धर्मितावच्छेदकमनिवेश्य हेतुताकल्पनस्यैव युक्तत्वात्॥ घटत्वादिधर्मितावच्छेदकघटत्वाद्यवच्छिन्नप्रकारकयोग्यताज्ञानबलादेव घटत्वादौ धर्मितावच्छेदकतासंबंधेन तदापत्तेः संभवात्॥ ॥

तासंबंधेन यत्र द्रव्यं घट इत्याकारकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानं। तत्र धर्मितावच्छेदकतासंबंधेन द्रव्यं घट इत्याकारकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकशाब्दबोधः धर्मितावच्छेदकतासंबंधेन योग्यताज्ञानं च द्रव्यत्वप्रमेयत्वादाविव घटत्वेप्यस्तीति घटो घट इत्याकारकशाब्दबोधापत्तिरित्यर्थः। घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकशाब्दबोधत्वं कार्य्यतावच्छेदकं घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानत्वं कारणतावच्छेदकं धर्मितावच्छेदकतासंबंधेन शाब्दबोधो निश्चयात्मकः। योग्यताज्ञानं संशयनिश्चय

साधारणमिति भेदः॥ तदापत्तेः। घटो घट इति शाब्दबोधापत्तेरित्यर्थः॥

आत्मनिष्ठप्रत्यासत्त्यायोग्यताज्ञानकारणतावादीघटोघटइतिशाब्दबोधापत्तिंनिरसितुंशंकते॥नचयोग्यताज्ञानस्यधर्मितावच्छेदकनिष्ठप्रत्यासत्त्याहेतुत्वोपगमेइत्यनूद्यदूषयति॥द्रव्यत्वावच्छिन्नस्यपदादनुपस्थितत्वेपिद्रव्यत्वादेस्तादृशप्रत्यासत्त्या।धर्मितावच्छेदकनिष्ठप्रत्यासत्त्या।प्रत्यासन्नंसंबद्धंयद्द्रव्यंघटइतियोग्यताज्ञानंतस्मात्तादृशप्रत्यासत्त्याधर्मितावच्छेदकनिष्ठप्रत्यासत्त्याद्रव्यंघटइत्याकारकशाब्दबोधापत्तिरित्यर्थः॥आत्मनिष्ठप्रत्यासत्त्याहेतुभूतामिति॥तादृशप्रमेयत्वावच्छिन्नोपस्थित्यादिदशायां।आत्मनिष्ठसमवाय

नचयोग्यताज्ञानस्यधर्मितावच्छेदकनिष्ठप्रत्यासत्त्याहेतुत्वोपगमेद्रव्यत्वाद्यवच्छिन्नस्यपदादनुपस्थितत्वेपिद्रव्यत्वादेस्तादृशप्रत्यासत्त्याप्रत्यासन्नयोग्यताज्ञानात्तत्रतादृशप्रत्यासत्त्याशाब्दबोधापत्तिः।आत्मनिष्ठप्रत्यासत्त्याहेतुभूतांद्रव्यत्वाद्यवच्छिन्नोपस्थितिमंतरेणापितादृशप्रमेयत्वाद्यवच्छिन्नोपस्थित्यादिदशायांप्रमेयत्वादेर्धर्मितावच्छेदकतासंबंधेनज्ञानस्यफलजनकत्वात्तादृशद्रव्यत्वाद्यवच्छिन्नोपस्थितिविरहस्याकिंचित्करत्वादितिवाच्यम्॥ ९ ॥

प्रत्यासत्त्याहेतुभूतप्रमेयपदजन्यप्रमेयत्वाद्यवच्छिन्नोपस्थित्यादिदशायां।प्रमेयत्वादेर्धर्मितावच्छेदकतासंबंधेनप्रमेयोघटइतियोग्यताज्ञानस्यफलजनकत्वात्।प्रमेयोघटइतिशाब्दधीजनकत्वात्।तादृशद्रव्यत्वावच्छिन्नोपस्थितिविरहस्य।आत्मनिष्ठप्रत्यासत्त्याहेतुभूतद्रव्यपदजन्यद्रव्यत्वावच्छिन्नोपस्थितिविरहस्य।अकिंचित्करत्वात्।धर्मितावच्छेदकनिष्ठप्रत्यासत्त्याघटत्वाद्यवच्छिन्नप्रकारकाभेदसंसर्गकशाब्दबोधःप्रमेयत्वेजायते।तत्रद्रव्यपदजन्योपस्थितिव्यभिचारः।एवंघटाभेदबोधोद्रव्यत्वेजायते।तत्रप्रमेयपदजन्योपस्थितिव्यभिचा

एवंपरस्परव्यभिचारेणपदजन्यपदार्थोपस्थितीनामकारणतया तदभावस्य घटत्वावच्छिन्नाभेदशाब्दबोधाभावाप्रयोजकत्वादित्यन्वयः ॥ आसत्तिनिष्ठप्रत्यासत्त्यायोग्यताज्ञानस्य कारणत्वे तु द्रव्यपदजन्यद्रव्यत्वप्रकारकोपस्थितिशून्यतादशायां नद्रव्यं घट इति शाब्दबोधापत्तिः॥ समवायसंबंधेनद्रव्यत्वावच्छिन्नधर्मिकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकशाब्दबोधंप्रतिकारणीभूतस्य समवायसंबंधेनद्रव्यत्वावच्छिन्नधर्मिकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानस्य समवायेनसहकारिकारणतयाऽपेक्षणीयद्रव्यपदजन्यद्रव्यत्वप्रकारकोपस्थित्यभावात् तथाच समवायेनद्रव्यत्वावच्छिन्नविशेष्यकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानस्य द्रव्यं घट इत्यादिशाब्दबोधजनकतयाक्लृप्तस्याभावान्नघटोघट इत्यत्र शाब्दबोधापत्तिरितिभावः॥ समानप्रकारताप्रत्यासत्त्यापद

समानप्रकारताप्रत्यासत्त्यापदार्थोपस्थितेःशाब्दबोधेहेतुत्वोपगमात्॥

जन्यपदार्थोपस्थितेः शाब्दबोधहेतुत्वोपगमादिति॥ द्रव्यपदजन्यद्रव्यत्वप्रकारकोपस्थित्यसत्त्वेप्रकारतयाद्रव्यपदजन्यद्रव्यत्वप्रकारकोपस्थितिरूप[illegible]कसामग्र्यभावात्॥ द्रव्यत्वेधर्मितावच्छेदकनिष्ठप्रत्यासत्त्याशाब्दधीनिवारणेऽनंतधर्मितावच्छेदकनिवेशनात्सनिष्ठप्रत्यासत्त्यायोग्यताज्ञानस्यनकारणत्वं किंतुधर्मितावच्छेदकतासंबंधेनधर्मितावच्छेदकंद्रव्यत्वप्रमेयत्वादिकमनिवेश्य घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानस्यैवकारणत्वात् तस्य च घटत्वेपि सत्त्वाद्घटोघट इत्यत्रशाब्दबोधापत्तिर्दुर्वारेतिभावः॥

॥ ॥ ॥

येनसंबंधेन।धर्मितावच्छेदकतासंबंधेन।यद्धर्मावच्छिन्नकार्यंप्रति।घटत्वावच्छिन्नप्रकारकाभेदसंसर्गकशाब्दत्वावच्छिन्नकार्यंप्रति।येन संबंधेन।प्रकारतासंबंधेन।यद्धर्मावच्छिन्नस्य।शाब्दबोधत्वावच्छिन्नकार्यस्यव्यापकता।तेनसंबंधेन।प्रकारतासंबंधेन।तद्धर्मावच्छिन्नकार्योत्पादकसामग्र्या अपि।शाब्दत्वरूपसामान्यधर्मावच्छिन्नकार्योत्पादकसामग्र्याःप्रकारतासंबंधेन पदजन्यपदार्थोपस्थितिरूपाया अपि।तेनसंबंधेनधर्मितावच्छेदकतासंबंधेन तद्धर्मावच्छिन्नकार्योत्पादादौ।घटप्रकारकाभेदसंसर्गकशाब्दबोधादौ।अपेक्षिततया प्रकारतासं

येनसंबंधेनयद्धर्मावच्छिन्नकार्यंप्रतियेनसंबंधेनयद्धर्मावच्छिन्नकार्यस्यव्यापकतातेनसंबंधेनतद्धर्मावच्छिन्नकार्योत्पादकसामग्र्या अपितेनसंबंधेनतद्धर्मावच्छिन्नकार्योत्सत्तावपेक्षिततयाप्रकारतासंबंधेनद्रव्यत्वादौद्रव्यपदजन्यपदार्थोपस्थित्यसत्त्वेनतत्रधर्मितावच्छेदकतासंबंधेनशाब्दबोधापत्तेरयोगात्·नचयत्रप्रमेयत्वाद्यवच्छिन्नविशेष्यकवृत्तिज्ञानजन्यप्रमेयत्वाद्यवच्छिन्नविशेष्यकोपस्थितावेवउद्बोधकांतरात्द्रव्यत्वाद्यवच्छिन्नस्यभानंतत्रद्रव्यत्वाद्यवच्छिन्नविषयकशाब्दापत्तिवारणायतद्धर्मावच्छिन्नविशेष्यकशाब्दबोधंप्रतितद्धर्मावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यतद्धर्मप्रकारकपदार्थोपस्थितेर्हेतुतावाच्या॥ ६ ॥ ६ ॥

बंधेनप्रकृताभिप्रायेणाह॥द्रव्यत्वादौ।द्रव्यपदजन्यपदार्थोपस्थितिरूपव्यापकसामग्र्यसत्त्वेन॥तत्र॥द्रव्यत्वे।धर्मितावच्छेदकतासंबंधेनद्रव्यंघटइत्साकारकशाब्दबोधापत्तेरसम्भवादित्यर्थः।नचयत्रप्रमेयत्वावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यप्रमेयत्वाद्यवच्छिन्नविशेष्यकोपस्थितावेवोद्बोधकांतराद्द्रव्यत्वावच्छिन्नस्यभानंतत्रद्रव्यत्वावच्छिन्नविषयकशाब्दापत्तिः॥प्रमेयंप्रमेयपदशक्तिमदितिवृत्तिज्ञानेन॥ ६ ॥ ६ ॥

प्रमेयविषयकसंस्कारसहकृतेन जन्यायां प्रमेयत्वाद्यवच्छिन्नविषयकसमूहालंबनस्मृतावेवोद्बोधकान्तराद्द्रव्यपदवृत्तिज्ञानातिरिक्तात्का
लादृष्टादिरूपाद्द्रव्यविषयकसंस्कारोद्बोधकाद्द्रव्यत्वावच्छिन्नस्य भानं विषयता तत्र प्रमेयपदजन्यप्रमेयद्रव्यरूपोपस्थित्या द्रव्यं घट इति शा
ब्दबोधापत्तिस्तद्वारणाय द्रव्यत्वावच्छिन्नविशेष्यकशाब्दं प्रति द्रव्यत्वावच्छिन्नविशेष्यकवृत्तिज्ञानजन्यद्रव्यत्वप्रकारकोपस्थितेर्हेतुतेत्य
र्थः ॥ आत्मनिष्ठप्रत्यासत्त्या हेतुत्वकल्पनमुचितमिति ॥ विषयनिष्ठप्रत्यासत्त्या हेतुताकल्पने धर्मितावच्छेदकताप्रत्यासत्त्या यदैकपुरुषस्य यो
ग्यताज्ञानं तदा पुरुषान्तरस्य शाब्दधीः स्यादिति। तत्पुरुषीयशाब्दे तत्पुरुषीययोग्यताज्ञानं हेतुरिति पुरुषविशेषनिवेशे पि प्रकाराद्यनिवे

तथा च प्रकारविशेषनिवेशस्यावश्यकत्वे आत्मनिष्ठप्रत्यासत्त्यैव हेतुताकल्पनं युक्तम्· अन्यथा पुरुषभेदेन कार्यकार
णभावबाहुल्यप्रसंग इति वाच्यम्। स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतावि
शिष्टप्रकारतासंबंधेनोपस्थितेर्हेतुतास्वीकृतस्तादृशापत्तेर्वारणात् ॥ २ ॥ ७ ॥ १ ॥

शेवीजं सच न संभवतीति ॥ वृत्तिज्ञानजन्यद्रव्यविषयकवृत्तिज्ञानजन्यप्रमेयविषयकोक्तसमूहालंबनस्मृतिस्थले द्रव्यविषयशाब्दाप
त्तेरत उभयनिवेशस्य प्रकारविशेषं निवेश्य पुरुषभेदमनिवेश्यात्मनिष्ठप्रत्यासत्त्या हेतुताकल्पनमेवोचितमित्यर्थः। तथा चात्मनि
ष्ठसमवायप्रत्यासत्त्या द्रव्यत्वावच्छिन्नधर्मिकघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकशाब्दबोधं प्रति क्लृप्तायास्तादृशयोग्यताज्ञानरूपासा
मग्रीतदभावान्न घटे घट इत्यत्र शाब्दबोधापत्तिरिति भावः। स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितेति ॥ १ ॥ ७ ॥

द्रव्यं घट इत्याकारकशाब्दबोधः प्रकारतासंबंधेन द्रव्यत्वे जायते तत्र द्रव्यपदजन्यपदार्थोपस्थितिरूपं कारणमप्यस्ति कारणीभूतोपस्थितेः संबंधश्च स्वं द्रव्यपदजन्योपस्थितिस्तज्जनकं द्रव्यपदशक्तं द्रव्यपदशक्तिमदिति शक्तिरूपवृत्तिज्ञानात्तादृशज्ञाननिरूपिता या शक्तिरूपवृत्तिनिष्ठप्रकारता तन्निरूपिताविशेष्यता द्रव्ये विशेष्यतावच्छेदकता द्रव्यत्वे द्रव्यपदजन्यद्रव्यपदार्थोपस्थितिनिरूपिताप्रकारतापि द्रव्यत्वेऽस्तीति सामानाधिकरण्यसंबंधेन निरुक्तविशेष्यतावच्छेदकताविशिष्टायाप्रकारतातत्संबंधेन पदजन्यपदार्थोपस्थितेर्हेतुमत्त्वावसिद्धौ तादृशापत्तेर्वारणात्॥ प्रमेयत्वावच्छिन्नविशेष्यकवृत्तिज्ञानरूपोद्बोधको हि प्रमेयत्वावच्छिन्नविषयकसंस्कारद्रव्यविषयवृत्तिज्ञानानितिरिक्तकालादृष्टादिरूपोद्बोधको हि द्रव्यत्वावच्छिन्नविषयकसंस्काराभ्यां जनितायां प्रमेयत्वद्रव्यत्वोभयत्वावच्छिन्नविषयकसमूहालंबनात्मकस्मृतौ सत्यां तादृशी आपत्तिर्द्रव्यं घट इति शाब्दापत्तिस्तस्या वारणादित्यर्थः॥ यतः शाब्दबोधाद्‌द्रव्यत्वे आपद्यते तत्र द्रव्यत्वे उक्तसंबंधेन कारणं द्रव्यपदजन्योपस्थितिरूपं नास्ति॥ तथाहि॥ स्वं द्रव्यपदजन्यद्रव्यत्वावच्छिन्नोपस्थितिः तज्जनकं द्रव्यपदशक्तिमदिति शक्तिज्ञानं तन्निरूपिताशक्तिनिष्ठप्रकारता तन्निरूपिता या द्रव्यनिष्ठा विशेष्यता तदवच्छेदकता द्रव्यत्वे द्रव्यपदजन्यद्रव्यत्वावच्छिन्नोपस्थितिश्च द्रव्यत्वे प्रकारतासंबंधेन वर्तत इति तादृशविशेष्यतावच्छेदकताविशिष्टप्रकारतासंबंधेन द्रव्यपदजन्योपस्थितेः सत्त्वाद्‌द्रव्यं घट इत्यत्र शाब्दबोधो जायते द्रव्यपदजन्यद्रव्यत्वावच्छिन्नानुपस्थितौ स शाब्दबोधः कथं स्यादिति॥ एवं च विषयनिष्ठप्रत्यासत्त्या योग्यताज्ञानकारणतायां निर्दिष्टायां धर्मितावच्छेदकताप्रत्यासत्त्या घटो घट इत्यत्र शाब्दबोधापत्तिस्तदवस्थेति भावः॥

नचपदार्थेपिप्रकारतासंबंधेनेति। पदार्थेपिपदजन्यप्रतीतिविशेष्येपि। द्रव्यंघटइत्यत्रद्रव्येपिविशेष्येपिऽभेदसंबंधेनघटरूपेप्रकारेपिप्र
कारतासंबंधेनशाब्दबोधउत्पद्यते। तत्र। घटरूपप्रकारे॥ प्रकारतासंबंधेन। स्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छे
दकताविशिष्टप्रकारतासंबंधेन। पदार्थोपस्थितेरभावात्॥ घटपदजन्यघटइत्याकारकपदार्थोपस्थितौघटस्यविशेष्यतयाभानात् प्रकार
तासंबंधेनशाब्दबोधेप्रकारतासंबंधेनपदार्थोपस्थितेर्हेतुत्वेव्यतिरेकव्यभिचारादित्यर्थः। एवंचात्मनिष्ठप्रत्यासत्त्यायोग्यताज्ञानकारण
तासिद्धौघटोघटइत्यत्रशाब्दापत्तिर्नास्तीतिभावः॥ परामर्शकारणताविचारदर्शितदिशाव्यभिचारस्यवारणीयत्वादितिचेदिति॥ धूमा

नचपदार्थेपिप्रकारतासंबंधेनशाब्दबोधोस्त्यात्तत्रप्रकारतासंबंधेनपदार्थोपस्थितेरभावात्प्रकारनिष्ठप्रत्यास
त्त्यापदार्थोपस्थितेर्हेतुताव्यभिचारेणकल्पयितुमशक्येतिवाच्यम्। परामर्शकारणताविचारदर्शितदिशाव्यभिचारस्यवारणी
यत्वात्॥

लोकपरामर्शयोःपरस्परजन्यानुमितौव्यभिचारेणधूमपरामर्शविशिष्टानुमितौधूमपरामर्शस्यालोकपरामर्शविशि
ष्टानुमितौआलोकपरामर्शस्यचकारणत्वं। वैशिष्ट्यंचकार्यकारणतावच्छेदकसमवायघटितसामानाधिकरण्येनस्वाव्यवहितोत्तरत्वसन्ब
न्धेनच। तथास्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारताशुद्धप्रकारताघटितसामानाधिकरण्यसं
बंधेनपदजन्यपदार्थोपस्थितिविशिष्टशाब्दबोधंप्रतिस्वजनकज्ञानीयवृत्तिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकताविशिष्टप्रकारता
संबंधेनपदजन्यपदार्थोपस्थितिर्हेतुरितिशुद्धप्रकारतासंबंधेनघटरूपपदार्थेशाब्दत्वावच्छिन्नसत्त्वेपिविशिष्टप्रकारताशुद्धप्रकारताघटित

धेनोपस्थितिविशिष्टशाब्दत्वावच्छिन्नाभावान्न व्यतिरेकव्यभिचार इति एवं च घटत्वे धर्मितावच्छेदकतया घटप्रकारकाभेदसंसर्गकयोग्यताज्ञा
नस्य स्वजनकज्ञानीयस्यादि विशिष्टप्रकारतासंबंधेन घटपदजन्योपस्थितेष्वसत्वात् घटो घट इत्यत्र शाब्दबोधापत्तिरिति भावः। समाधत्ते। त
र्हीति। तद्धर्मावच्छिन्नाभेदसंसर्गावच्छिन्नाच या घटनिष्ठप्रकारता तन्निरूपिता विशेष्यताद्धर्मेतदवच्छेदकतासंबंधेन द्रव्यं घट इति शाब्द
त्वावच्छिन्नं द्रव्यत्वे ज्ञायते तत्र द्रव्यत्वे तद्धर्मभेदो घटत्वभेदो हेतुरस्ति घटो घट इत्यत्र तु न शाब्दबोधापत्तिर्घटत्वे घटत्वभेदाभावादित्यर्थः। स

इति चेत्तर्हि तद्धर्मावच्छिन्नाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति त
द्धर्मभेदस्यापि हेतुत्वं स्वीकरणीयं तथा न घटो घट इत्यादिस्थले शाब्दबोधापत्तिः। स घट इत्यादिवाक्याज्जातित्वादिना घट
त्वादिधर्मितावच्छेदकस्य स्वरूपतो घटत्वादिप्रकारतावच्छेदकस्य घटः स इत्यादिवाक्यात्स्वरूपतो घटत्वादिधर्मिताव
च्छेदकस्य जातित्वादिविशिष्टघटत्वादिप्रकारतावच्छेदकस्य शाब्दबोधस्योपपत्तये विशेष्यत्वप्रकारत्वयोरवच्छेदकत्वे निर
वच्छिन्नत्वेन विशेषणीये।

घट इति वाक्याज्जातित्वादिना घटत्वादिधर्मितावच्छेदकस्य स्वरूपतो घटत्वादिप्रकारतावच्छेदकस्य घटः स इत्यादि
वाक्यात्स्वरूपतो घटत्वादिधर्मतावच्छेदकस्य जातित्वादिविशिष्टघटत्वावच्छिन्नप्रकारकस्य च शाब्दबोधस्योपपत्तये विशेष्यत्वप्रकारत्वयोरव
च्छेदकत्वे निरवच्छिन्नत्वेन विशेषणीये इति॥ तद्धर्मावच्छिन्ननिरवच्छिन्नतद्धर्मनिष्ठावच्छेदकतानिरूपिता या अभेदसंसर्गावच्छिन्ना प्रकारता
तन्निरूपिता या विशेष्यता तन्निरूपिता या निरवच्छिन्नावच्छेदकता तद्रूपसंबंधेन शाब्दत्वावच्छिन्नं प्रति तद्धर्मभेदो हेतुः॥ द्रव्यघ ॥ ६ ॥

टइत्यत्रघटत्वनिष्ठायानिरवच्छिन्नावच्छेदकतातन्निरूपितायाअभेदसंसर्गावच्छिन्नाघटनिष्ठाप्रकारतातन्निरूपितायाद्रव्यनिष्ठाविशे
ष्यतातन्निरूपितायाद्रव्यत्वनिष्ठानिरवच्छिन्नावच्छेदकतातत्संबंधेनशाब्दत्वावच्छिन्नंद्रव्यत्वेजायतेतत्रद्रव्यत्वेघटत्वभेदरूपेहेतुर
स्तीति। स घटइत्यस्यजातिमान्घटइत्यर्थः। अत्राभेदसंबंधेनघटःप्रकारः घटत्वनिष्ठप्रकारतावच्छेदकतानिरवच्छिन्ना॥ अथचजा
तिमान्विशेष्यः विशेष्यतावच्छेदकताजातौ॥ साचजातित्वावच्छिन्नाइति। घटत्वनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपितअभेदसंसर्गाव
च्छिन्नघटनिष्ठाप्रकारतानिरूपितायाजातिमन्निष्ठाविशेष्यतातन्निरूपितायाजातिनिष्ठावच्छेदकतासाजातित्वावच्छिन्नेतिनिरवच्छि
न्नतादृशावच्छेदकतासंबंधेनशाब्दत्वावच्छिन्नंजातौजायतइतिजातौघटत्वभेदाभावेपिशाब्दबोधउपपद्यते। एवंघटःसदित्यस्यघटोजाति
क मानित्यर्थः। अत्रघटोविशेष्यःघटत्वनिष्ठाविशेष्यतावच्छेदकतानिरवच्छिन्ना। अत्रचाभेदसंसर्गः। जातिमान्प्रकारः। जातिनिष्ठाप्रकारतावच्छेदक
ताजातित्वावच्छिन्नाइति॥ जातिनिष्ठनिरवच्छिन्नावच्छेदकतानिरूपितेत्यादिसंबंधेनघटत्वेघटविशेष्यकजातिमत्प्रकारकाभेदसंसर्गकशा
ब्दबोधोजायते॥ घटत्वेजातिभेदाभावेपिशाब्दबोधउपपद्यतइति। घटोनीलघटइत्याद्यन्वयबोधस्येति। विधेयकोटावधिकावगाहि शा
ब्दबोधोऽनुमितिकरणमनुमानमित्यादौ बहुशःसूत्रकारादिभिरंगीकृतस्तथाहि अनुमानमित्यस्यानुपूर्वकमाधात्वर्थोनुमितेर्निरूपितत्व
संबंधेनल्युडर्थेकरणेऽन्वयः अनुमितिकरणमित्यत्रनामार्थयोरभेदान्वयादनुमितिपदलक्षितानुमितिसंबंध्यंशस्याधिकस्याभेदेनकर
णेऽन्वयः तथाचानुमितिकरणमनुमितिसंबंध्यभिन्नंकरणमित्यर्थः॥ वस्तुतस्तुनतथाबोधःप्रामाणिकः अन्यथा तुल्ययुक्त्यानीलोघ
टोघटइतिबोधस्यापिस्वीकारापत्तेरितिभावः॥

मु॰टी॰ अन्यत्रदर्शितदिशासोप्युपपादनीय इति॥ अवच्छेदकतायास्तद्धर्मपर्याप्त्यादिविवक्षयेत्यर्थः निरवच्छिन्नातद्धर्मपर्याप्ताचया अवच्छेदक मू॰
३२ तातन्निरूपिताया ऽभेदसंसर्गावच्छिन्नाप्रकारतातन्निरूपितविशेष्यतानिरूपितनिरवच्छिन्नावच्छेदकतासंबंधेन शाब्दं प्रतितद्धर्मभेदः का
रणं घटोनीलघट इत्यत्रावच्छेदकतानकेवलघटत्वपर्याप्ता किंतुनीलत्वघटत्वोभयपर्याप्तातद्घटितोभयसंबंधेनघटत्वेशाब्दबोधाभावात्
घटत्वेनीलघटत्वभेदाभावेपिशाब्दबोध उपपद्यत इति भावः। ससइत्यादिवाक्यादिति॥ जातिमान् जातिमानित्यर्थः। निरवच्छिन्नातद्धर्मप
र्याप्ताचया अभेदसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितनिरवच्छिन्नावच्छेदकतासंबंधेनशाब्दं प्रतितद्धर्मभेदः कारणं। घटो

घटोनीलघट इत्याद्यन्वयबोधस्यप्रामाणिकत्वेनान्यत्रदर्शितरीत्यासोप्युपपादनीयः ससइत्यादिवाक्यात् जातित्वाद्यव
च्छिन्नधर्मितावच्छेदकताकतद्धर्मावच्छिन्नप्रकारतावच्छेदकताकाभेदान्वयबोधस्यवारणायतद्धर्मावच्छिन्नावच्छेदकताप्र
कारतानिरूपितधर्मितावच्छेदकतावच्छेदकत्वप्रत्यासत्त्याशाब्दबोधं प्रतितद्धर्मभेदस्यापिपृथक्कारणत्वंकल्पनीयम् ॥ ॥

नीलघट इत्यत्रावच्छेदकतानकेवलजातित्वाद्यवच्छिन्नाधर्मितावच्छेदकतायस्यईदृशो ऽभेदान्वयबोधः। अत्रजातिमान्धर्मीधर्मिताव
च्छेदकताजातौसाजातित्वावच्छिन्नेत्यर्थः। तद्धर्मोजातित्वंतदवच्छिन्नाप्रकारतावच्छेदकतायस्यसतद्धर्मावच्छिन्नप्रकारतावच्छेदकताकः
यो ऽभेदान्वयबोधस्तद्वारणायेत्यर्थः। अत्रापिजातिमान्प्रकारः प्रकारतावच्छेदकताजातौसाजातित्वावच्छिन्नेत्यर्थः। तद्धर्मोजातित्वंतद राम
वच्छिन्नाजातिनिष्ठावच्छेदकतायस्यास्तादृशीजातिमन्निष्ठा ऽभेदसंसर्गावच्छिन्नाप्रकारतातन्निरूपिताधर्मिताजातिमतितद ॥श॥ ३२

वच्छेदकत्वं जातित्वेतादृशप्रत्यासत्त्या शाब्दबोधो जातित्वे जायते तद्धर्मभेदः जातित्वभेदः कारणं स नास्तीति न जातिमान् जातिमानित्यत्र शाब्दबो
धइति॥ एवं दंडवान्दण्डवानित्यादिवाक्यादिति॥ मतुपः संबंधिनि शक्तेः दंडसंयोगवान्दण्डसंयोगवानित्यर्थः। दण्डत्वनिष्ठावच्छेदकतानिरू-
पितदण्डनिष्ठावच्छेदकतानिरूपितसंयोगनिष्ठावच्छेदकतानिरूपितसंयोगिपुरुषनिष्ठाभेदसंसर्गावच्छिन्नप्रकारतानिरूपितविशे
ष्यतानिरूपितसंयोगत्वाद्यवच्छिन्नसंयोगनिष्ठावच्छेदकतानिरूपितदण्डनिष्ठावच्छेदकतावच्छेदकत्वसंबंधेन दण्डत्वे शाब्दबोधआ

एवं दण्डवान्दण्डवानित्यादिवाक्याद्दण्डसंयोगत्वाद्यवच्छिन्नवतितदवच्छिन्नवद्भेदान्वयबोधस्य वारणाय दण्डसंयोग
त्वाद्यवच्छिन्नावच्छेदकताक प्रकारतानिरूपितविशेष्यतानिरूपितसंयोगत्वाद्यवच्छिन्नावच्छेदकतानिरूपितावच्छेदक
तावच्छेदकत्वसंबंधेन शाब्दबोधे दण्डत्वादिभेदस्य पृथक्कारणत्वं कल्पनीयम्। अवच्छेदकतायां निरवच्छिन्नत्वनिवे
शोपि पूर्ववद्बोध्यः वस्तुतस्तु तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानं प्रति तद्धर्मभेदत्वेन हेतुता लाघवात्॥ ६ ॥

पद्यते तत्र दण्डत्वभेदरूपकारणं नास्तीति नापत्तिरित्यर्थः॥ अवच्छेदकतायां निरवच्छिन्नत्वनिवेशोपि पूर्ववद्बोध्य इति॥ जातिमद्वान्दण्डवा
न्दण्डवान्जातिमद्वानित्युभयत्र जातित्वेन दण्डत्वमेव भासते॥ तत्र जातिमद्वान् दण्डवानित्यत्र दण्डत्वरूपजातिनिष्ठावच्छेदकता जातित्वाव
च्छिन्नेति तद्व्युदासः॥ एवं दण्डवान्जातिमद्वानित्यत्रापि दण्डनिष्ठप्रकारतानिरूपितसंयोगनिष्ठावच्छेदकतानिरूपितदंडनिष्ठावच्छे
दकतानिरूपितदण्डत्वनिष्ठावच्छेदकत्वं जातित्वावच्छिन्नमिति तत्र शाब्दबोधानापत्तिः। वस्तुतस्तु तद्धर्मान्यवृत्तीति। धर्मितावच्छेदकता

संबंधेनघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानंद्रव्यंघटइत्याकारकंप्रमेयोघटइत्याकारकंचद्रव्यत्वप्रमेयत्वादावस्तितत्रद्र
व्यत्वप्रमेयत्वादौधर्मितावच्छेदकतासंबंधेनद्रव्यंघटःप्रमेयोघटइतिशाब्दबोधोजायतेसचशाब्दबोधःव्याप्यःव्यापकंचतद्धर्मान्यवृत्ति
विषयतासंबंधेनज्ञानं।प्रकृतेतद्धर्मःप्रकारीभूतस्यघटस्यधर्मोघटत्वंतदन्यद्रव्यत्वंतद्वृत्तिर्याधर्मितावच्छेदकतारूपाविषयतातत्संबंधेनज्ञा
नंद्रव्यंघटइतिशाब्दरूपंज्ञानंतद्धर्मान्यवृत्तिविषयतासंबंधेनज्ञानत्वेनस्वंप्रतिस्वस्यव्यापकत्वात्तथाचव्यापकीभूतशाब्दबोधोधर्मितावच्छे
दकतासंबंधेनद्रव्यत्वेस्तितत्रद्रव्यत्वेतद्धर्मभेदःघटत्वभेदोहेतुरस्तिएवंचघटत्वावच्छिन्नप्रकारकाभेदसंसर्गकयोग्यताज्ञानेनघटोघट

घटत्वाद्यवच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेनशाब्दबोधंप्रतिघटत्वाद्यन्यवृत्तिविषयतासंबंधेनज्ञान
त्वाद्यवच्छिन्नस्यव्यापकतयाघटत्वादौतादृशविषयतासंबंधेनज्ञानत्वावच्छिन्नोत्पादकसामग्रीविरहेणनतत्रतादृशविशे
ष्यतावच्छेदकतासंबंधेनशाब्दबोधापत्तिः।९।। इत्यत्रघटत्वेधर्मितावच्छेदकतानिष्ठप्रत्यासत्त्याघटोघटइत्यत्रशाब्दबोधआ
पादयितुमशक्यःयोग्यताज्ञानाद्यशाब्दव्यापकस्यतद्धर्मान्यवृत्तिविषयतासंबंधेनज्ञानस्यद्रव्यत्वेघटत्वभेदसत्त्वेनद्रव्यंघटइत्याद्रौद्रव्य
त्वादौप्रसिद्धस्ययातद्धर्मभेदरूपासामग्रीतदभावाद्घटत्वेघटत्वभेदाभावादितिभावः॥घटत्वावच्छिन्नप्रकारतेत्यादि॥अभेदसंसर्गाव
च्छिन्नायाघटत्वाद्यवच्छिन्नाघटनिष्ठाप्रकारतातन्निरूपिताद्रव्यनिष्ठविशेष्यतातदवच्छेदकताद्रव्यत्वेतत्संबंधेनद्रव्यंघटइति
शाब्दंप्रतिघटत्वान्यद्रव्यत्ववृत्तिधर्मितावच्छेदकतारूपविषयतासंबंधेनप्रत्यक्षस्मृत्यनुमितिशाब्दरूपज्ञानत्वावच्छिन्नस्यव्यापकतयाघटत्वा

तादृशविषयतासंबंधेन घटत्वावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन ज्ञानत्वावच्छिन्नस्य घटत्वाद्यन्यवृत्तिविषयतासंबंधेन ज्ञान
त्वावच्छिन्नस्योत्पादिका घटत्वे घटत्वभेदरूपा सामग्रीति तस्या विरहेण न तत्र घटत्वे तादृशविशेष्यतावच्छेदकतासंबंधेन अभेदसंसर्गावच्छिन्नघ
टत्वाद्यवच्छिन्नघटनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यतानिरूपितघटत्वनिष्ठधर्मितावच्छेदकतासंबंधेन घटो घट इत्यत्र शाब्दबोधा
पत्तिरित्यर्थः॥ उक्तं लाघवमाह। एवं चेत्यादिना। तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानं प्रति तद्धर्मभेदत्वेन हेतुत्वांगीकारे च घटवान्देशो धर्मी
धर्मितावच्छेदको घटो धर्मितावच्छेदकतावच्छेदकता घटत्वे तत्र प्रत्यासत्त्या घटवान् घटवानित्यत्र शाब्दबोधोपपत्तयेऽभेदेन प्रकारः घटवा

एवं च घटवान् घटवानित्यादिशाब्दबोधवारणानुरोधेन धर्मितावच्छेदकतावच्छेदकादिनिष्ठप्रत्यासत्त्या कारणांतरमपि न क
ल्प्यते एवमुद्देश्यतावच्छेदकविधेययोरैक्ये एको द्वावित्यादिवाक्यादेकत्वद्वित्वाद्यवच्छिन्ने एकत्वद्वित्वादीनां भेदान्वयबोधानुदयात्

न् घटे प्रकारतावच्छेदकता तदवच्छेदस्य भेदः कारणमिति तस्य कारणत्वान्तरं पूर्वं कृतं तदपि न कल्प्यते घटवान् घटवानित्यत्र योग्यताज्ञानजन्यशाब्द
बोधव्यापकस्य तद्धर्मान्यवृत्तिविषयतासंबंधेन ज्ञानस्य तद्धर्मभेदरूपसामग्र्यभावात्। घटत्वे घटत्वभेदाभावात्। एवं घटवान् घटत्ववद्वानित्यत्र न शाब्दबो
धानुपपत्तिस्तत्र हि धर्मितावच्छेदकतावच्छेदकतारूपविषयतासंबंधेन शाब्दबोधो घटत्वे जायते तत्र प्रकारतावच्छेदकतावच्छेदकतावच्छे
दकरूपघटत्वत्वभेदसत्त्वादिति भावः। एवमुद्देश्यतावच्छेदकविधेययोरैक्ये इति। एकः इति वाक्ये एकवचनार्थः एकत्वं तत्र एकत्वे एकत्व
भेदाभावात् एकत्ववानेकत्ववानिति शाब्दानुदयः तथा द्वावित्यत्र द्वित्ववान् द्वित्ववानिति न शाब्दधीः॥ ६ ॥ ७ ॥ ६ ॥

योग्यताज्ञानजन्यशाब्दव्यापकतद्धर्मान्यवृत्तिविषयतासंसर्गकज्ञानजनकत्वद्धर्मभेदाभावात् तथाचैकत्वत्वद्वित्वत्वाद्यवच्छिन्नासमवायादिसं क॰
सर्गावच्छिन्नायाविभक्त्यर्थैकत्वादिनिष्ठप्रकारतातन्निरूपिताएकद्विपदार्थनिष्ठाविशेष्यतातन्निरूपितासमवायादिसंसर्गावच्छिन्नाए
कत्वद्वित्वनिष्ठावच्छेदकतातदवच्छेदकताएकत्वत्वद्वित्वत्वादिनिष्ठातेनसंबंधेनएकत्वत्वद्वित्वत्वादौजायमानशाब्दबुद्धावेकत्वत्व
द्वित्वत्वादिभेदस्यहेतुत्वांतरकल्पनमनादेयमेवेत्यर्थः घटइत्यत्रएकोघटइतिघटावित्यत्रद्वौघटावितिशाब्दबोधोदयात्तद्धर्मःएक

एकत्वत्वद्वित्वत्वाद्यवच्छिन्नसमवायादिसंसर्गावच्छिन्नप्रकारतानिरूपितविशेष्यतानिरूपितसमवायादिसंसर्गावच्छिन्नाव
च्छेदकतावच्छेदकत्वादिसंबंधेनशाब्दबुद्धौएकत्वत्वादिभेदस्यएवंकर्मगच्छतीत्यादौचकर्मत्वत्वाद्यवच्छिन्नेआधेयता॰
संबंधेनतद्वत्तोन्वयबोधवारणायकर्मतात्वाद्यवच्छिन्नावच्छेदकताकाधेयतासंबंधावच्छिन्नप्रकारतानिरूपितधर्मि
तावच्छेदकतासंबंधेनशाब्दबोधेकर्मत्वत्वादिभेदस्यघटेनघटइत्याद्यनुमिते॥ १ त्वद्वित्वंचतदन्यघटत्ववृत्तिविषय
तासंबंधेनज्ञानंयोग्यताज्ञानजन्यशाब्दव्यापकज्ञानंप्रतिहेतुभूतस्यएकत्वद्वित्वरूपतद्धर्मभेदस्यघटत्वेसत्वादितिभावः॥ एवमि
ति॥ कर्मगच्छतीत्यादौकर्मपदोत्तरद्वितीयार्थेकर्मत्वत्वावच्छिन्नेकर्मत्वेआधेयतासंबंधेनतद्वतःकर्मत्ववतःकर्मणइतियावत्
॥अन्वयबोधवारणायकर्मत्वत्वाद्यवच्छिन्नाकर्मत्वनिष्ठावच्छेदकतायस्याईदृशीयाऽऽधेयतासंसर्गावच्छिन्नाकर्मनिष्ठप्रकारतात राम
न्निरूपिताधर्मिताकर्मत्वेतदवच्छेदकताकर्मत्वत्वइतितेनसंबंधेनकर्मत्वेशाब्दापत्तिवारणायकर्मत्वत्वादिभेदस्यहेतुत्वांतर ३४

कर्मवत्कर्मणातुल्यक्रियइतिसूत्रेकर्मपदेनरंवसदार्थतावच्छेदकंयत्सादृश्यंतद्वृत्तिसादृश्यत्वेकर्मत्वत्वावच्छिन्नकर्मत्वनिष्ठावच्छेदकतानिरू पितकर्मनिष्ठाप्रकारतानिरूपितासादृश्यनिष्ठाधर्मितातन्निरूपितावच्छेदकतासंबंधेनकर्मणः शाब्दबुद्धौ कर्मत्वभेदः कारणं तच्चनव स्तुतस्तुमतेयोग्यताज्ञानजन्यशाब्दव्यापकस्यतद्धर्मान्यवृत्तिविषयतासंबंधेनज्ञानस्यतद्धर्मभेदरूपसामग्र्यभावात्कर्मत्वत्वेकर्मत्ववतो बाधानापत्तेः। घटोनघटइत्याद्यनुमितेःशाब्दस्यच वारणाय घटत्वावच्छिन्नभेदप्रकारतेत्यादि। पटोन घट इत्यत्र घटत्वावच्छिन्न स्ययोभेदस्तन्निष्ठायाप्रकारतातन्निरूपितायापटनिष्ठायाधर्मितातदवच्छेदकतासंबंधेनशाब्दबोधोऽनुमितिश्चपटत्वेवर्ततेतत्र

शाब्दबोधस्यचवारणायघटत्वावच्छिन्नभेदप्रकारतानिरूपितधर्मितावच्छेदकतासंबंधेनानुमितौशाब्दबोधेचघटत्वा दिभेदस्यहेतुत्वांतरकल्पनमनादेयम्।तद्धर्मभेदस्यैवैककारणतयैवसकलातिप्रसंगवारणसंभवादितिकृतंपल्लवितेन॥

घटत्वादिर्भेदोस्तीति। घटोनघटइत्यत्रतुघटत्वेघटत्वभेदाभावाद्घटत्वावच्छिन्नभेदनिष्ठप्रकारतानिरूपिताधर्मितावच्छेदक तासंबंधेनानुमितिशाब्दबुद्धौ अत्रापियोग्यताज्ञानजन्यशाब्दव्यापकस्यतद्धर्मान्यवृत्तिविषयतासंबंधेनज्ञानस्ययातद्धर्मभेदरू पासामग्रीतदभावादेवघटत्वेघटभेदानुमितिशाब्दबोधवारणसंभवेघटत्वभेदस्यपृथक्कारणत्वंनकल्पनीयमितिभावः। तद्धर्म भेदस्यैवैकेतिघटत्वभेदत्वेनपटभेदत्वेनयाकारणतातथैवघटोघटःपटःपटइत्यत्रशाब्दमात्रजनकपदसमभिव्याहाररूपाकांक्षायो ग्यतानासत्तिज्ञानबलादापाद्यमानशाब्दबोधवारणसंभवादित्यर्थः॥ । इतिव्युत्पत्तिवादेऽभेदान्वयविवरणम्॥ ॥ ८॥

व्यु॰टी॰ भेदान्वयबोधप्रकारं वक्तुमुपक्रमते ॥ भेदान्वयबोधश्च प्रातिपदिकार्थधात्वर्थयोरित्यादिना ॥ तण्डुलं पचतीत्यादौ प्रातिपदिकार्थतण्डु कृ:
३५ लस्याम्प्रत्ययार्थकर्मत्वेन सहान्वयः आधेयतया तण्डुलवती कर्मतेति बोधात्। एवं चंद्र इव मुखमित्यादौ चंद्रस्य निरूपितत्वसंबंधेन
इवनिपातार्थसादृश्येन सममन्वयः। एवं धात्वर्थपाकस्यानुकूलतासंबंधेनाख्यातार्थकृत्या सममन्वयः। एवं न कलंजं भक्षयेदित्या
दौ धात्वर्थभक्षणेन तिङर्थबलवदनिष्टाननुबंधित्वाद्यभावस्यानुयोगितासंबंधेनान्वयः। बलवदनिष्टाननुबंधित्वविशिष्टेष्टसाधन
त्वाद्यभाववत्कलंजभक्षणमिति शाब्दबोधात्। गुरुमते तु कलंजभक्षणाभावविषयकमपूर्वमिति बोधः। अपूर्वं च विध्यर्थः कलंज

भेदान्वयबोधश्च प्रातिपदिकार्थधात्वर्थयोः प्रत्ययार्थेन क्वचिन्निपातार्थेन च सममेव जायते न त्वन्येन। सत्यपि पदार्थोपस्थिति
योग्यताज्ञानादिरूपकारणकलापे राजा पुरुषः भूतलं घट इत्यादौ पुरुषाद्यंशे राजभूतलादेः स्वत्वाधेयतासंबंधेन ॥ ६ ॥

भक्षणाभावरूपनियोजकनियोज्यमिति यावत्। सममेवेत्येवकारार्थमाह। न त्वन्येनेति। ननु प्रत्ययनिपातातिरिक्तेन प्रातिपदिकार्थे
न धात्वर्थेन चेत्यर्थः। राजा पुरुषः भूतलं घट इत्यादाविति। स्वत्वसंबंधेन राजवान्पुरुषः आधेयतासंबंधेन भूतलवान् घट इत्येवान्वयबोधादि
त्युत्तरेणान्वयः॥ तण्डुलः पचति चैत्रः पच्यत इत्यादौ कर्मत्वकर्तृत्वादिसंबंधेन तण्डुलचैत्रादौ पाकादेरन्वयबोधादित्यन्वयः। कर्तृत्वसंबं
धेन पाकवान् तण्डुलः कर्मत्वसंबंधेन पाकवांश्चैत्र इति शाब्दानुदयादित्यर्थः। ननु चैत्रः पचतीत्यत्र कर्तृत्वसंबंधेन पाकवांश्चैत्र इति भेदसंबं एम
धेनान्वयसंभवे धात्वर्थनिपातातिरिक्तप्रातिपदिकार्थयोर्भेदेन साक्षादन्वयबोधस्याव्युत्पन्नत्वमिति व्युत्पत्तिर्न कल्पनीया व्युत्पत्त्यनुरो ३५

धेनचाख्यातस्यसार्थकत्वंचनकल्पनीयमेवंतण्डुलःपच्यतेइत्यत्रापितण्डुलेकर्मतासंबंधेनपाकादेरन्वयसंभवेएतद्व्युत्पत्तिकल्पनंतद
नुरोधेनचाख्यातस्यकर्मतार्थकल्पनंनकर्तव्यमतआह।तण्डुलःपचतिचैत्रःपच्यतइत्यादि।तथाचयथाचैत्रःपचतीत्यत्रकर्तृतासं
बंधेनचैत्रेपाकान्वयःस्यादेवंतण्डुलःपच्यतेइत्यत्रयथाकर्मतासंबंधेनतण्डुलेपाकान्वयःतथाचैत्रःपच्यतेइत्यत्रापिकर्तृतासंबंधेन
चैत्रेपाकान्वयःस्यात्तद्वारणायोक्तव्युत्पत्तिकल्पनंतदनुरोधेनचाख्यातस्यकृतिकर्मत्वार्थकल्पनंचावश्यकमितिभावः।ननुतण्डुलवि
शेष्यककर्मत्वसंसर्गकपाकप्रकारकबोधेयगेवसाधुर्नतुशप्।एवंचैत्रादिविशेष्यककर्तृत्वसंसर्गकपाकादिप्रकारकबोधेशबेवसाधु

तण्डुलःपचतिचैत्रःपच्यतेइत्यादौकर्मत्वकर्तृत्वादिसंबंधेनचैत्रतण्डुलादौपाकादेःस्वकर्मकत्वस्वकर्तृकत्वादिसंबंधे
नपाकाद्यंशेवातण्डुलचैत्रादेरन्वयाबोधात्॥

॥नेतुयकृइत्यतःतण्डुलःपचतिचैत्रःपच्यतइत्यत्रशाब्दापत्तिवारणेउक्तव्युत्प
त्तिकल्पनंतदनुरोधेनचाख्यातस्यसार्थकत्वकल्पनंचनिर्युक्तिकमतआह॥स्वकर्मकत्वस्वकर्तृकत्वादिति॥तथाचयैवतण्डुलं
पचतीत्यादौतण्डुलप्रकारकस्वकर्मकत्वसंसर्गकपाकविशेष्यकबोधेशप्समभिव्याहाररूपाकांक्षानियामिकासैवतण्डुलःपच
तीत्यत्रापिअस्तीतितण्डुलप्रकारकपाकविशेष्यकतण्डुलकर्मकत्वसंसर्गकःशाब्दबोधःस्यादेवंचैत्रेणपच्यतइत्यादौचैत्रप्रकारक
स्वकर्तृकत्वसंसर्गकधात्वर्थपाकविशेष्यकशाब्दबोधप्रयोजकसमभिव्याहाररूपाकांक्षायाःचैत्रःपच्यतइत्यत्रापिसत्वादुक्तशाब्दबो
॥धापत्तिस्तद्वारणायव्युत्पत्तिमाह॥

सु.टी. निपातातिरिक्तप्रातिपदिकार्थयोर्भेदेनसाक्षादन्वयबोधस्याव्युत्पन्नत्वादिति॥ प्रथमाव्युत्पत्तिः राजापुरुषः भूतलं घट इत्यादौ स्वत्वाधेय कु.
३६ त्वसंबंधेन शाब्दबोधवारणाय। क्रियाधात्वर्थः तादृशं निपातातिरिक्तं प्रातिपदिकं। तदर्थश्चेति द्वंद्वः। धात्वर्थनिपातातिरिक्तनामार्थयोर्भे
देनसाक्षादन्वयबोधोऽव्युत्पन्न इति द्वितीयाव्युत्पत्तिः। साच तण्डुलः पचति चैत्रः पच्यते इत्यादि शाब्दबोधवारणाय। तथाच तण्डुले कर्मतारू
पभेदसंबंधेन नपाकान्वयः। तण्डुलस्याधेयतया द्वितीयाद्यर्थकर्मत्वे तस्य निरूपकत्वसंबंधेन विक्लित्त्यनुकूलव्यापारे धात्वर्थे तस्य चाख्याता
र्थकृतौ तस्याश्च प्रथमान्तार्थे चैत्रेऽन्वय इति चैत्रः तण्डुलं पचति इत्येव प्रयोगः साधुरेव चैत्रस्याधेयतया तृतीयार्थकृतौ कृतेर्जन्यतया विक्लित्त्य

निपातातिरिक्तप्रातिपदिकार्थयोः। क्रियातादृशप्रातिपदिकार्थयोश्च भेदेन साक्षादन्वयबोधस्याव्युत्पन्नत्वात्॥ विभक्त्यर्थ
मंतराकृत्य तयोरप्यन्वयबोधात्साक्षादिति॥

॥ नुकूलफूत्कारादिरूपव्यापारे तस्य च विक्लित्तौ फले आख्यातार्थे तस्याश्चाधेयतासं
बंधेन कर्मणि तण्डुले चैत्रवृत्तिकृतिजन्यव्यापारजन्यफलशालितण्डुल इति शाब्दधीः। फलव्यापारश्च पृथगर्थौ इति मते फलस्य द्वेधा
भानं विशिष्टार्थता मते आश्रयता आख्यातार्थः। एवं चैत्रेण पच्यते तण्डुल इत्येव प्रयोगः साधुः। एवं व्युत्पत्त्यंगीकारे विभक्तीनामपि सार्थकत्व
मिति भावः। विभक्तौ साक्षात्पदकृत्यमाह॥ विभक्त्यर्थमंतराकृत्य तयोरप्यन्वयबोधात्साक्षादिति॥ तयोरपि धात्वर्थातिरिक्तप्रातिप
दिकार्थयोरपि। विभक्त्यर्थकर्मत्वद्वारा कर्मणस्तण्डुलस्य पाकेऽन्वय इत्यर्थः। विशिष्टान्वये तण्डुलस्य कर्मत्वं यत्रान्वेति तत्र तण्डुलो राम
पि कर्मतयान्वेतीति भावः। साक्षाद्विभक्त्यर्थमद्वारीकृत्य नामार्थधात्वर्थयोर्नान्वयबोध इत्यर्थः॥ ६ ॥ ० ॥ ६ ॥ ० ३६

निपातातिरिक्तत्वविशेषणादिति। भूतलेन घट इत्यस्य घटप्रतियोगिताकाभावो भूतलवृत्तिरित्यर्थः। ननु भूतलवृत्तित्वप्रतियोगिताकाभाववानुयोगी घट इत्यर्थः। तथासति केत्यधिकरणाकांक्षापत्तेः। पटेन घट इत्यस्य घटप्रतियोगिताकाभाववान्पट इत्यर्थः घटादेरित्यादिनाप्रतियोगितयान्वयिनो भूतलवृत्तित्वपटयोर्ग्रहः। नञर्थो अभावेनासंताभावेन भेदेन चेत्यर्थः। घटादेर्नेतथाभावेन सह— प्रतियोगितयाऽन्वयोपीति योजना मुखं चंद्र इवेत्यादौ चंद्रप्रतियोगिकसादृश्यानुयोगिमुखमिति बोधात्। प्रतियोगितयाऽनुयोगितया चान्वयोपीति योजना।८

निपातातिरिक्तत्वादि विशेषणात् भूतलेन घटः घटेन पट इत्यादौ घटादेर्नञर्थाभावेन मुखं चन्द्र इवेत्यादौ मुखचंद्रादीनामिवार्थसादृश्यादिना। न कलंजं भक्षयेदित्यादौ नैयायिकमतेन नञुपस्थाप्येन बलवदनिष्टाननुबंधित्वविशिष्टइष्टसाधनत्वादिरूपविध्यर्थत्वाभावेन। धात्वर्थभक्षणादेरनुयोगितया। गुरुमते तु विध्यर्थापूर्वांशविशेषणतयान्वितेन नञुपस्थाप्याभावेन धात्वर्थभक्षणादेः प्रतियोगितयान्वयेपि न क्षतिः।९। एवमपि न कलंजं भक्षयेदित्यादौ नैय्यायिकमतेन कलंजभ

क्षयेदित्यस्य। तथा च कलंजकर्मकं भक्षणं बलवदनिष्टाननुबंधित्वविशिष्टसाधनत्वविशिष्टकृतिसाध्यत्वाभाववत् इति बोधात् विधिलिङः धात्वर्थमुख्यकः बोधः स्वीक्रियते अन्यत्र तु आख्यातार्थविशेष्यक इति बोध्यं। गुरुमते त्विति। कलंजभक्षणाभावविषयकमपूर्वमित्याख्यातार्थमुख्यविशेष्यको बोध इति। ननु धात्वर्थे निपातातिरिक्तनामार्थयोरभेदेन साक्षादन्वयबोधस्य व्युत्पन्नत्वादिति नियमात्। घटसंसर्गावच्छिन्ननामार्थनिष्ठप्रकारतानिरूपितविशेष्यतासंबंधेन शाब्दबुद्धिं प्रति विभक्तिनिपातान्यतरजन्योपस्थितित्वेन का

॥कथंराजपुरुषइत्यादिसमासस्थलेराजप्रकारकपुरुषविशेष्यकस्वत्वसंसर्गकबोधइत्यतआह॥राजपुरुषइति।समासस्थलेति।
नभेदेन।नस्वत्वसम्बन्धेनान्वयः।किंतुतेनसमं।विभक्त्यंतार्थनामार्थेनसमं।विशिष्टे।राजनिरूपितत्वविशिष्टे।लाक्षणिकंयत्तद्राजादिपद
मित्यर्थः॥एवंमुखंचंद्रइत्यादिरूपकस्थलेइति।नतत्रव्यभिचारः।मुखंचंद्रइतिरूपकस्थलीयशाब्दबोधेव्यतिरेकव्यभिचारःतत्रभेदसंबं

राजपुरुषइत्यादिसमासस्थलेतुपुरुषादिपदार्थेनसमंराजादिपदार्थस्यनभेदान्वयबोधःकिन्तुतेनसमंविभक्त्यन्तार्थविशि
ष्टलाक्षणिकराजादिपदोपस्थाप्यराजसंबंध्यादेरभेदान्वयबोधएवेतिनदोषःएवंमुखंचन्द्रइत्यादिरूपकस्थलेचंद्रादिप
दस्यचंद्रादिसदृशेलक्षणयाचंद्रादिसदृशाभेदान्वयबोधएवनतुसादृश्यादिसंबंधेनचन्द्रादेर्मुखाद्यन्वयइतिनतत्रव्यभि
चारःकेचित्तुरूपकस्थलेचंद्रादिपदस्यचंद्रादिसदृशेनलक्षणाकिन्तुतत्रमुख्यार्थचंद्रादेरेवाभेदभ्रमोमुखादौमुखंनचंद्रइ
त्यादिविशेषदर्शनदशायांचनतत्रशाब्दोऽभेदप्रत्ययःअपितुशब्दजन्यविशकलितपदार्थोपस्थितिमूलकोमानसएवा
हार्याभेदभ्रमइत्याहुः॥(धेनशाब्दबोधरूपकार्यमेवनजायते अतःप्रत्ययनिपातजन्योपस्थितिरूपकारणस्यमुख्येअभावेपिन

व्यतिरेकव्यभिचारइतिभावः।केचित्त्विति।रूपकस्थलेचंद्रादिपदस्यचंद्रसदृशेनलक्षणेति।अयंभावः।पूर्वमतेसदृशलक्षणयातूभयत्रशा
ब्दबोधसाम्येउपमारूपकयोरवैलक्षण्यप्रसंगः।सादृश्यमुपमाभेदउपमेवतिरोभूताभेदारूपकमित्यनेतद्रूपकभेदोयंउपमानोपमेययोरितिका
व्यप्रकाशादिविरोधश्चेति।मुख्यार्थचंद्रादेरेवाभेदभ्रमोमुखादौ।तथासतिचंद्रादिगताल्हादकत्वादिधर्मप्रतीतिरपिमुखादौनिर्बाधेति।

आहार्यभेदभ्रमइति॥

बाधकालीनइच्छाजन्यज्ञानमाहार्यं। आहुरित्यस्वरसः तद्बीजंतु शब्दान्वयव्यतिरेकसिद्धत्वेप्रतीतौ शाब्दं प्रत्येमिनतु साक्षात्करोमीत्यनुभवविरोधश्चेति। केचित्तु तादात्म्यान्नीलसंबंधिनः नामार्थयोर्नान्वयबोधइति। तादात्म्यातिरिक्तएवभेदसंबंधः। तथाचनिपातातिरिक्तनामार्थयोर्भेदेनान्वयबोधइतिव्युत्पत्तेरत्रैवतात्पर्यमितिभावः। नीलोघटइत्यत्रस्ववृत्तिनीलत्वादिसंबंधेन। स्वंनीलरूपाश्रयः। तद्वृत्तिनीलत्वंनीलरूपमेवतेनसंबंधेनघटेन्वयः। एवंचंद्रइवेत्यत्रस्ववृत्तिआल्हादकत्वादिसंबंधेन। स्वंचंद्रस्तद्वृत्तीत्यर्थः। तादृशान्वयबोधेपि। मुखंचंद्रइत्या

परेतु तादात्म्यातिरिक्तसंबंधेननामार्थयोर्नान्वयबोधः तादात्म्यंच प्रकृतेतद्वृत्तिधर्मवत्त्वम्‌। एवंचनीलोघटइत्यादौ स्ववृत्तिनीलत्वादिमत्त्वसंबंधेनघटाद्यंशेनीलपदार्थस्यैवम्‌ मुखंचंद्रइत्यादौ स्ववृत्त्याल्हादकत्वादिमत्त्वसंबंधेनमुखादौचंद्रादेरन्वयबोधः तादृशार्थान्वयबोधेपिसमानविभक्तित्वंतंत्रमित्यतोनातिप्रसंगइतिवदंति। अथराजापुरुषइत्यादौपदार्थोपस्थित्यादिसत्त्वेनकथंनभेदान्वयबोधः सामग्र्याः कार्यजननेउक्तनियमभंगरूपायाः प्रयोजनस्येतरकिंचित्करत्वात्सामग्रीसत्त्वेअवश्यंकार्यमितिनियमात्‌॥ (((ल्हादकत्वसंबंधेनचंद्रान्वयबोधेपि। अतः समानविभक्तित्वस्यानियामकत्वान्नीलस्यघटइत्यादिभिन्नविभक्तिस्थलेनघटेनीलाभेदरूपातिप्रसंगइत्यर्थः। आल्हादजनकत्वंतच्च मुखचंद्रयोर्भिन्नमेव। अन्यवृत्तिधर्मस्यान्यसंबंधतायांकारेनीलपटपरनीलरूपस्यघटितनीलोघटइत्यादिवाक्यप्रामाण्यापत्तिरत्रास्वरसोवदंतीत्यनेनसूचितः। अथराजापुरुषइत्यादावितिपदसमभिव्याहारसामग्र्याः स्वत्वसंबंधेनराजवान्पुरुषइतिशाब्दधीजननेनिपातातिरिक्तनार्थयोर्भेदेनान्वयोअव्युत्पन्नइतिनियमस्यभंगोनबाधकइत्य

सु॰टी॰ नचतत्रभेदान्वयबोधौपयिकाकांक्षाविरहाच्छाब्दसामग्र्येवासिद्धेतिवाच्यमिति।राज्ञःपुरुषइत्यत्रभेदेनशाब्दबोधफलोदयादाकांक्षास्ति
३९ ।राजापुरुषइत्यत्रतुभेदेनशाब्दानुदयाद्विलक्षणाकांक्षानास्तीतिनेत्रेनिमील्यविस्तरंवक्तुंशंकेतिभावः।समभिव्याहाररूपाकांक्षायास्त
त्रापिसत्त्वादिति।राजापुरुषइत्यादिपदसमभिव्याहाररूपाकांक्षायोग्यतादिज्ञानसत्त्वाद्भेदेनान्वयधीःस्यादितिनेत्रेनिमील्यसमाधानम

नचतत्रभेदान्वयबोधौपयिकाकांक्षाविरहाच्छाब्दसामग्र्येवासिद्धेतिवाच्यम्समभिव्याहाररूपाकांक्षायास्तत्रापिसत्त्वात्नच
तादृशाकांक्षायास्तत्रसत्त्वेपिराजादिप्रकारकभेदान्वयबोधेराजादिपदार्थप्रकारकराजादिपदाव्यवहितोत्तरङसपदत्वादि
रूपानुपूर्वीविशेषरूपायाआकांक्षायाअपिप्रयोजकत्वात्तदभावादेवनतत्रशाब्दसामग्रीतिवाच्यम् संबंधादिविशेष्यक
राजादिप्रकारकान्वयबोधएवतादृशाकांक्षाज्ञानस्यहेतुतयापुरुषादौराजादिपदार्थप्रकारकान्वयबोधापत्तौतादृशाकां
क्षाज्ञानरूपकारणविरहस्याकिंचित्करत्वात्।अत्रकेचित्।नामार्थप्रकारकभेदान्वबोधंप्रतिसमानविशेष्यताप्रत्यास
त्याप्रत्ययजन्योपस्थितेर्हेतुत्वकल्पनात्नामार्थप्रकारकभेदान्वयबोधेविशेष्यतयाप्रत्ययार्थस्यैवभानंनतुनामार्थस्य।

पीति।नचतादृशाकांक्षायास्तत्रसत्त्वेपि।राजपुरुषइतिसमभिव्याहाररूपाकांक्षासत्त्वेपिराजप्रकारकपुरुषविशेष्यकभेदसंसर्गक
शाब्दधीरित्यर्थः।तादृशाकांक्षाज्ञानरूपकारणविरहस्याकिंचित्करत्वादिति।राजपदोत्तरङसपदत्वरूपाकांक्षाज्ञानंराजप्रकार
कषष्ठ्यर्थस्वत्वविशेष्यकशाब्दबोधएवकारणं।नतुराजप्रकारकपुरुषविशेष्यकबोधइतिकारणविरहोअकिंचित्करोनराजप्र

कारकपुरुषविशेष्यकशाब्दाभावप्रयोजकइत्यर्थः।
।अत्रकेचिदिति॥

राज्ञःपुरुषइत्यत्रनिरूपितत्वसंबंधेनराजवत्स्वत्वमितिबोधात्विशेष्यतासंबंधेनराजास्वत्वेप्रकारः।तत्रास्वत्वे।विशेष्यतासंबंधेनङस्प्र
त्ययजन्योपस्थितिर्हेतुरप्यस्ति।राजापुरुषइत्यत्रविशेष्यतासंबंधेनप्रत्ययजन्योपस्थितिर्नास्तीतिकथंपुरुषेविशेष्यतासंबंधेनराजप्र
कारकबोधआपाद्यतेतिभावः।नचसंबंधादेरपिनामार्थतयेति।राज्ञःपुरुषइत्यत्रस्वत्वप्रकारकआश्रयतासंसर्गकःपुरुषविशेष्यको
बोधोभवतिसोपिनस्यात्।षष्ठ्यर्थःस्वत्वमपिसंबंधरूपनाम्नःस्वत्वरूपनाम्नोर्थोभवतीतिङसर्थस्वत्वप्रकारकोपिबोधोनामार्थप्रका

तत्रविशेष्यतासंबंधेनप्रत्ययजन्योपस्थितेरसत्वात्।नचसंबंधादेरपिनामार्थतयातत्प्रकारकान्वयबोधेपुरुषादिपदा
र्थस्यविशेष्यतयाभानानुपपत्तिःतत्तन्नामपदजन्यतत्तन्नामार्थप्रकारकशाब्दबोधत्वावच्छिन्नंप्रतिप्रत्ययजन्योपस्थितित्वेन
हेतुत्वेपिराजसंबंधःप्रमेयःराज्ञःपुरुषइत्येतादृशवाक्यद्वयजन्यवाक्यार्थद्वयान्वयबोधेपुरुषस्यराजसंबंधविशेष्यतयाभा
नानुपपत्तिरितिवाच्यम्॥

रकोभवतिसचबोधःपुरुषविशेष्यतयाऽस्तितत्रपुरुषेविशेष्यतयाप्रत्ययजन्योपस्थितिर्नास्तीतिभावः।अनुप
पत्तिमुद्धरति।तत्तन्नामपदजन्येति।तथाचराज्ञःपुरुषइत्यत्रस्वत्वोपस्थितिङसप्रत्ययजन्यानतुसंबंधपदादिजन्येतिनायंशाब्दबोधःका
र्यतावच्छेदकाक्रांतेतिनपुरुषेप्रत्ययजन्योपस्थितिरपेक्षितेतिभावः।एवंवारणेपिपुनरनुपपत्तिमुपपादयति।राजसंबंधःप्रमेयःराज्ञःपुरु
षइतिवाक्यद्वयजन्येति॥तथाचसमूहालंबनात्मकोयोराजस्वत्वप्रकारकपुरुषविशेष्यकबोधःसंबंधरूपतत्तन्नामपदजन्यइतिका
र्यतावच्छेदकाक्रांतःसचनस्यात्।पुरुषेविशेष्यतासंबंधेनप्रत्ययजन्योपस्थितिरूपहेत्वभावादितिभावः॥

समाश्रयते। प्रत्ययाधीनतत्तत्पदार्थोपस्थित्यजन्येति। राज्ञः पुरुष इत्यादौ ङस्प्रत्ययाधीनायाः स्वत्वसंबंधरूपतत्तत्पदार्थोपस्थितिस्तेषां संबंध कृ:
रूपतत्तदर्थप्रकारकशाब्दबोधजन्य एवेति पदार्थोपस्थित्यजन्यशाब्दत्वद्वयकार्यतावच्छेदकानाक्रांते राजसंबंधवान् पुरुष इति शाब्दे पुरुष
प्रत्ययजन्योपस्थितिर्नापेक्षितेति भावः। राज्ञ इत्यत्र तु ङस्प्रत्ययाधीनाया संबंधरूपतत्तत्पदार्थोपस्थिती राजपदजन्योपस्थितिजन्या राज
रूपतदर्थप्रकारकः ङस्प्रत्ययार्थस्वत्वविशेष्यको निरूपितत्वसंबंधेन राजवत्स्वत्वमित्याकारको बोधस्तद्विशेष्ये स्वत्वे विशेष्यतासंबं
धेन ङस्प्रत्ययजन्योपस्थितिहेतुरस्तिस्वत्ववानित्यत्र स्वत्वोपस्थितिस्वत्वरूपनामजन्या न प्रत्ययजन्येति। प्रत्ययानधीनस्वत्वपदार्थो

प्रत्ययाधीनतत्तत्पदार्थोपस्थित्यजन्यतत्तदर्थप्रकारकशाब्दत्वावच्छिन्नं प्रत्येव प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यास
त्त्या हेतुत्वोपगमात्। अथैवमपि यत्र राजा पुरुष इत्यत्र पुरुषपदाधीनपुरुषोपस्थितौ प्रत्ययवशात्कश्चित्प्रत्ययार्थोपि विषयीभूतः
तत्र प्रत्ययजन्यतथाविधसमूहालंबनोपस्थितेर्विशेष्यतासंबंधेन पुरुषेपि सत्त्वात्तस्य राजप्रकारकान्वयबोधे विशेष्यतया
भानापत्तिर्दुर्वारैव॥ पस्थित्यजन्यस्वत्वरूपतत्तदर्थप्रकारकशाब्दत्वावच्छिन्नं विशेष्यतासंबंधेन प्रत्ययार्थसंबंधिनि जायते तत्र
संबंधविशेष्यतया मतुप्प्रत्ययजन्योपस्थितिहेतुरस्तीति॥ पुनरापत्तिं नशंकते। अथैवमिति। यत्र। राजा पुरुष इत्यत्र। पुरुषपदात्समू
हालंबनरूपपुरुषोपस्थितौ ङस्प्रत्ययवशाद्यः कश्चिदेकत्वादिरूपः प्रत्ययार्थो विषयीभूतः पुरुषः एकत्वं चेत्येवं रीत्या समूहाल राम
वनोपस्थितौ भातः तत्र प्रत्ययजन्यसमूहालंबनोपस्थितिरूपकारणस्य विशेष्यतासंबंधेन पुरुषेपि सत्त्वात्। तस्य पुरुषस्य॥ ३९

राजप्रकारकभेदान्वयबोधेपिविशेष्यतयास्वत्वसंबंधेनराजवान्पुरुषइतिबोधेमानापत्तिरित्यर्थः। नचप्रत्ययजन्यतावच्छेदकीभूतवि
शेष्यतासंबंधेनोपस्थितेर्हेतुत्वोपगमान्नानुपपत्तिरितिमूलं। तत्तुप्रत्ययार्थविशेष्यकोपस्थितिंप्रतिनतत्प्रत्ययत्वेनतदर्थज्ञानंहेतुत्वेनवाकार स्य
णताप्रत्ययस्यकारणताज्ञानरूपव्यापारानुबंधिनी। एवंपुरुषनिष्ठविशेष्यतासंबंधेनपदार्थोपस्थितिंप्रतिज्ञायमानपुरुषपदत्वेनकार
णता। तथाचराजापुरुषइत्यत्रसुप्रत्ययजनकतावच्छेदकीभूतविशेष्यतासंबंधेनसुप्रत्ययजन्योपस्थितिःपुरुषनिष्ठसुप्रत्ययार्थेए

नचप्रत्ययजन्यतावच्छेदकीभूतविशेष्यतासंबंधेनोपस्थितेर्हेतुत्वोपगमान्नापत्तिःतादृशसमूहालंबनोपस्थितिनिरूपितपु
रुषनिष्ठविशेष्यतायानान्नएवजन्यतावच्छेदकत्वादितिवाच्यम्· ज्ञानभेदेनविशेष्यताभेदाभावात् यत्रकुत्रचित्प्रत्ययादेवल
क्षणादिनापुरुषाद्युपस्थितिस्तत्रतादृशोपस्थितिनिरूपितप्रत्ययजन्यतावच्छेदकीभूतविशेष्यतातःपुरुषादिपदजन्यपुरु
षाद्युपस्थितविशेष्यतायाअभिन्नतयातावताप्युक्तातिप्रसंगवारणासंभवादितिचेन्न·॥ ॥ कत्वंएवनतुपुरुषइति। प्रत्ययाधीन
तदर्थोपस्थितिजन्यराजपुरुषात्तत्तदर्थप्रकारकशाब्दबोधःपुरुषेआपादयितुमशक्यः। नचपुरुषनिष्ठैकत्वएवतादृशसंबंधेन
प्रत्ययजन्योपस्थितिरूपकारणसत्वाद्राजप्रकारकस्वत्वसंसर्गकैकत्वविशेष्यकशाब्दबोधःस्यादितिवाच्यम्पुरुषनिष्ठैकत्वेस्वत्व
संसर्गकरूपयोग्यताज्ञानरूपकारणांतराभावात्। ज्ञानभेदेनविशेष्यताभेदाभावादितिमूलं। एवंचविशेष्यतायाअभिन्नायाइत्यत्रहेतुतयान्वेति
। यत्रकुत्रचित्प्रत्ययादेवलक्षणादिनापुरुषाद्युपस्थितिरिति। राजाऽस्मइत्यत्रङसःपुरुषेलक्षणा। जानातीत्यादौआश्रयपुरुषेलक्षणा।

स्वत्वं ङ-स् पद निरूपित वृत्तिमत् वृत्तिर्द्विविधा वाच्यत्वात्मिका वाचकत्वात्मिका च

मु.टी. द्युपस्थितिस्तत्र पुरुषे या तादृशोपस्थितिनिरूपितजन्यतावच्छेदकीभूत पुरुषनिष्ठविशेष्यता तदपेक्षया पुरुषादिपदजन्यपुरुषाद्युपस्थि
४० तिनिरूपितविशेष्यता या अभिन्नतया तावत्तापि प्रत्ययजन्यतावच्छेदकीभूतविशेष्यता संबंधेन प्रत्ययजन्योपस्थितेर्हेतुतांगीकारे
णापुरुषातिप्रसंगस्य प्रत्ययाधीनतत्सदाद्योपस्थितिजन्यराजारूपतत्सदार्थप्रकारकपुरुषविशेष्यकस्वत्वसंसर्गकबोधप्रसंगस्य वारणा
संभवादिति। तथाविषयभेदेनैव विषयताभेदाद्राजापुरुष इत्यत्र राजप्रकारकपुरुषविशेष्यकस्वत्वसंसर्गकशाब्दबोधवारणाय हि प्रत्ययजन्यो
पस्थितिहेतुतानिर्वाहकविशेष्यतासंबंधेन प्रत्ययजन्यतावच्छेदकीभूतत्वं विशेषणमुपात्तं तच्च तच्छाब्दवारणार्थम्। राजइत्यत्र पुरुषे ङस्प्र
त्ययलक्षणया प्रत्ययजन्योपस्थितिनिरूपिताविशेष्यता प्रत्ययजन्यतावच्छेदिकासैव विशेष्यता राजापुरुष इत्यत्रापि पुरुषेऽस्ति प्रत्ययजन्यताव

स्वजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितविशेष्यताविशिष्टविशेष्यतासम्बन्धेनैवोपस्थितेर्हेतुतया ॥

च्छेदकीभूतविशेष्यतासंबंधेनोपस्थितिरूपहेतोः पुरुषे सत्त्वात्। राजप्रकारकस्वत्वसंसर्गकबोधापत्तिस्तदवस्थेतिभावः॥ स्वजनकज्ञानी
यप्रत्ययवृत्तिप्रकारतानिरूपितेति॥ राज्ञ इत्यत्र ङस्प्रत्ययजन्योपस्थितिः स्वत्वेऽस्ति। अथ च ङस्प्रत्ययजन्योपस्थितिस्तज्जनकज्ञानं स्वत्वं
ङस्प्रत्ययशक्यं शक्तिसंबंधेन ङस्प्रत्ययवत् ज्ञानं पदपदार्थसंबंधः शक्तिः साच शक्तिर्ज्ञाननिरूपिताप्रकारता प्रत्यये तिष्ठति ङस्प्रत्ययनिष्ठा
तन्निरूपिताविशेष्यतापि स्वत्वेऽस्तीति स्वजनकशक्तिज्ञाननिरूपितङस्प्रत्ययनिष्ठप्रकारतानिरूपितविशेष्यतया विशिष्टा भवति। ङ
स्प्रत्ययजन्योपस्थितिनिरूपितास्वत्वनिष्ठाविशेष्यतेति तत्संबंधेन प्रत्ययजन्योपस्थितिरूपकारणसत्त्वात्। स्वत्वे प्रत्ययाधीनतत्सदाद्योपस्थि

राजाप्रुरुषइत्यत्रतुपुरुषपदोत्तरसुप्रत्ययार्थैकत्वपुरुषोभयसमूहालंबनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यतापुरुषेस्ति। स्वंतादृशोपस्थितिः
पुरुषपदोत्तरसुप्रत्ययजन्यैकत्वोपस्थितितज्जनकएकत्वसंबंधेनसुप्रत्ययवदितिभ्रान्तिज्ञानं तन्निरूपितायासुप्रत्ययनिष्ठप्रकारतातन्निरू
पितायाविशेष्यताएकत्वेविशेष्यतायावैयधिकरण्याद्वैशिष्ट्याभावेनोक्तसंबंधेनप्रकारणविरहान्नपुरुषप्रत्ययाधीनतत्तत्पदार्थोपस्थित्यजन्य

उक्तसमूहालंबनोपस्थितिनिरूपितपुरुषनिष्ठविशेष्यतायाश्चतादृशोपस्थितिजनकज्ञानीयप्रत्ययवृत्तिप्रकारतानिरूपितवि
शेष्यतासामानाधिकरण्यविरहान्नापत्तिप्रसंगइतिवदंति। तदसत्। प्रत्ययत्वस्यानुगतानतिप्रसक्तस्यदुर्वचतयाउक्तकार्यका
रणभावकल्पनायाअसंभवात्‌ राजसंबंधः पुरुषइत्यादौसंबंधादिपदेङसपदत्वादिभ्रमदशायांसंबंधादिविशेष्यकराजादि
पदार्थप्रकारकान्वयबोधानुपपत्तेः। राज्ञः पुरुषइत्यादौङसपदादिषुसंबंधादिपदत्वभ्रमदशायांसंबंधांशेराजादिप्रकार
कान्वयबोधापत्तेश्च॥ नचप्रत्ययत्वेनज्ञातन्तत्पदजन्योपस्थितेः कारणत्वादेतद्दोषद्वयस्यनावकाशइतिवाच्यम्‌ राज्ञः पुरुषइत्या
दौषष्ठ्यादेः प्रत्ययत्वाद्यनुपस्थितिदशायामपि॥

॥ राजरूपतत्तदर्थप्रकारकस्वत्वसंसर्गकशाब्दबोधापत्तिरितिभावः॥ उक्तकार्यका
रणभावकल्पनायाअसंभवादिति। प्रत्ययाधीनेत्यादि उक्तशाब्दंप्रतिप्रत्ययजन्योपस्थितित्वेनकारणतानसंभवतीत्यर्थः॥ एतद्दोषद्वयस्यसंबंध
पदेङसपदत्वभ्रमेबोधोजायतेसचनस्यात्‌। ङसोऽभावात्‌। अथङसपदेसम्बंधत्वभ्रमदशायांशाब्दबोधोनजायतेसचस्यात्कारणीभूत
स्यङसपदस्यवस्तुतःसत्वादितिदोषद्वयस्यनावकाशः। प्रत्ययत्वेनज्ञातपदजन्योपस्थितेःकारणत्वात्‌॥ ६ ॥ ६ ॥ ६

सु·टी आनुपूर्वीविशेषप्रकारकज्ञानाधीनतत्पदार्थोपस्थितिसत्वेइति। राज्ञः पुरुष इत्यत्रङः कारोत्तरसुत्वरूपानुपूर्वीमत्ङः स्पदमितिज्ञानं। तत्पदार्थ
४१ र्थोपस्थितौ। ङः स्पदार्थोपस्थितौकारणं। नतुङः स्प्रत्ययोभवतीत्यपिज्ञानं शाब्दबोधेकारणमित्यर्थः। इदंपुनरत्रतत्वमिति। अप्रसिद्धस्यापा
दनासंभवस्तत्वंपदार्थत्वंतात्पर्यविषयोर्थः। यत्रयथाविभक्तेरेवस्वारसिकलक्षणयेति। ननुसुप्विभक्तौनलक्षणा अन्यथासंबंधस्यैवलक्षण
याकर्तृत्वकर्मत्वप्रकारकबोधसंभवेकर्तृकर्मणोः कृतीतिसूत्रप्रणयनंव्यर्थंस्यादतआह। शक्तिभ्रमेणैवेति। अप्रसिद्धएवबोधआपाद्यत

आनुपूर्वीविशेषप्रकारकज्ञानाधीनतदर्थोपस्थितिसत्वेशाब्दबोधास्यप्रत्ययत्वप्रकारकज्ञानविशेषासंभवात् इदंपुनरत्रत
त्वम्। राजापुरुषइत्यादौपुरुषादिविशेष्यकराजादिप्रकारकभेदान्वयबोधस्याऽप्रसिद्धत्वेनापत्तिसंभवः यत्रषष्ठ्यादिविभक्तेरेव
स्वारसिकलक्षणया शक्तिभ्रमेणवापुरुषाद्युपस्थितिस्तत्रतद्विषेष्यकराजादिपदार्थप्रकारकभेदान्वयबोधः प्रसिद्धइतिचेत्तर्हि
तादृशबोधेतथाविधप्रकृतिप्रत्ययानुपूर्वीविशेष्यरूपाकांक्षाज्ञानसहकृततत्तद्विभक्तिजन्यपुरुषाद्युपस्थितिघटितसामग्र्याएव

इतिभावः। समाधत्ते। नहीति। राजाइत्यत्रराजपदोत्तरङःस्पदत्वरूपानुपूर्वीतथाविधप्रकृतिप्रत्ययानुपूर्वीसैवाकांक्षातज्ज्ञानंअथवा
ङःस्स्वरूपविभक्तिलक्षणाशक्तिभ्रमाजन्यापुरुषोपस्थित्यादिसामग्रीतादृशबोधोत्पत्तिनियामिकाराजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्य
कबोधनियामिकासाचराजपुरुषइत्यत्रनास्तिङःस्याद्यभावादितिभावः। अतएवेति। निरस्तमित्यनेनान्वितम्। सत्सुंदरइत्यादिवक्ष्यमाणा राम
याः सामग्र्यभावादेवेत्यर्थः। तथाहिसत्सुंदरइत्यत्रतत्सदसुंदरपदसमभिव्याहारस्तत्पदजन्यास्वत्वसंसर्गकैकपुरुषविशेष्यकोपस्थितिः ४१

ईदृशव्युत्पत्तौतात्पर्यंचेतिसामग्रीचराजापुरुषइत्यत्रनास्तितस्यतदभावादितिभावः।तादृशशाब्दबोधापत्तिः।राजापुरुषइत्यत्रस्वत्वसंसर्गे
कराजप्रकारकपुरुषविशेष्यकशाब्दबोधापत्तिरितिशंकाग्रंथार्थः।आपत्तिमुद्धरति।सत्सुंदरइति।वाक्यार्थशाब्दबोधसामग्र्याइत्यादिना॥राजप
दादिजन्यतादृशविशिष्टार्थोपस्थितिस्तद्धटितासामग्रीतात्पर्यज्ञानादिरूपातदभावादेवापत्त्यभावात्।राजापुरुषइत्यत्रस्वत्वसंसर्गकराजप्रका
रकपुरुषविशेष्यकशाब्दबोधापत्त्यसंभवादित्यर्थः।अथेत्यारभ्यचेत्यंतंशंकाग्रंथः।एतादृशरीत्यापत्तिवारणेसमभिव्याहारविशेषस्यकार

णतादृशबोधोत्पत्तिनियामकतयातदभावादेवनतदापत्तिःअतएवस्वत्वादिसंबंधेनराजादिविशिष्टपुरुषादितात्पर्यकतदादि
पदघटितात्सत्सुंदरइतिवाक्यात्पुरुषादिविशेष्यकस्वत्वादिसंसर्गकराजादिप्रकारकशाब्दबोधस्यचप्रसिद्ध्याराजापुरुषः
सुंदरइत्यादौपदार्थोपस्थितियोग्यताज्ञानादिबलात्तादृशशाब्दबोधापत्तिरित्यपि निरस्तम्।सत्सुंदरइत्यादिवाक्याधीन
शाब्दबोधसामग्र्यांसंसर्गतावच्छिन्नविशेष्यकसुंदरादिपदसमभिव्याहारज्ञानसहकृततदादिपदजन्यतादृशविशिष्टार्थो
पस्थितिघटिततयातदभावादेवापत्त्यभावात्॥अथैतादृशरीत्यापत्तिवारणेराज्ञःपुरुषइत्यादौस्वत्वादिसंबंधेन॥ ६ ॥

णत्वंस्वीकृत्यराजापुरुषइत्यत्रस्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकशाब्दबोधापत्तिवारणेसत्सुंदरइत्यत्रतत्सदेसुंदरपदसमभि
व्याहारस्तादृशबोधकारणंराजापुरुषइत्यत्रषष्ठ्यंतराजपदसमभिव्याहारस्तादृशशाब्दबोधेनियामकः।सचराजापुरुषइत्यत्रनास्तीतिभावः
राज्ञःपुरुषइत्यादौस्वत्वादिसंबंधेनपुरुषादौराजाद्यन्वयबोधस्वीकारेपिक्षतिविरहादिति॥ ६ ॥ ७ ॥ ६ ॥ ७ ॥

षष्ठ्यंतराजपदसमभिव्याहारस्य तादृशबोधनियामकस्याभावात्। राजा पुरुष इत्यत्राभावान्न स्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यक शा
ब्दबोधापत्तिरिति भावः। उक्तव्युत्पत्तिर्निर्युक्तिकेति। निपातातिरिक्तनामार्थयोर्धात्वर्थनामार्थयोश्च भेदेनान्वयबोधस्याव्युत्पन्नत्वमिति निरर्थिकेत्य
र्थः। षष्ठ्यंतराजपदसमभिव्याहारस्य तादृशबोधनियामकस्याभावादेव राजा पुरुष इत्यादितः स्वत्वरूपभेदसंसर्गक शाब्दापत्तिवारणे नामार्थ

पुरुषादौ राजादान्वयबोधस्वीकारेपि क्षतिविरहादुक्तव्युत्पत्तिर्निर्युक्तिका। विभक्तीनां संबंधादिवाचकत्वमपि निर्युक्तिकं नीलो घट इ
त्यादौ विशेषणवाचकपदसमभिव्याहृतविभक्तेरिव सर्वविभक्तीनां साधुत्वमात्रार्थकत्वस्यैवोचितत्वात्। नहि तत्र तथाविधान्वयबो
धोपगमेन स्थलीयसामग्रीबलात् राजा पुरुष इत्यादिष्वपि तथाविधान्वयबोधप्रसंगः संभवति तत् स्थलीयसामग्र्याः षष्ठ्यन्तराज
पदत्वाद्यवच्छिन्नधर्मिकपुरुषादिपदसमभिव्याहाररूपाकांक्षाज्ञानघटिततया तदभावादेव तत्र तादृशसामग्र्या अभावात्। एवं
च राजपुरुष इत्यादिसमासे राजादिपदस्य राजसंबंध्यादिलक्षणास्वीकारोपि व्यर्थः तत्र भेदान्वयबोधस्वीकारेपि क्षतिविरहात् न च
तत्र भेदान्वयबोधाभ्युपगमे तत्स्थलीयसामग्रीबलात् राजा पुरुष इत्यादावपि तादृशान्वयबोधापत्तिरिति वाच्यं ॥ १ योरिति व्युत्पत्तिर्नोगीका

र्यैति भावः। विभक्तीनां संबंधादिवाचकत्वमपि निर्युक्तिकमिति। राज्ञः पुरुष इत्यादितः स्वत्वादिसंबंधेन राजवान् पुरुष इत्यादिबोधसंभवात्। एवं
तण्डुलं पचतीत्यादितः कर्मतासंबंधेन तण्डुलवान् पाक इति बोधसंभवात् नीलो घट इत्यादौ विशेषणविभक्तिवत्सर्वा अपि विभक्तयः प्रयो
गसाधुत्वार्थ एवेत्यर्थः। राजा पुरुष इत्यत्र स्वत्वसंसर्गकबोधसामग्रीविरहमुपपादयति। नहीत्यादिना तथाविधान्वयबोधोपगमे। राज्ञः पुरुष इत्यत्र स्व

तत्स्थलीयसामग्रीवलात्।षष्ठ्यंतराजपदघटितसामग्रीवलात्।राजपुरुषइत्यादावपि।तथाविधान्वयबोधप्रसंगः।स्वत्वसंसर्गकराजप्रकारकान्वयबोधो
हिसंभवतीत्यर्थः।तदभावादेव।षष्ठ्यंतराजपदाभावादेव।तत्र।राजापुरुषइत्यत्र।तादृशसामग्र्याःषष्ठ्यंतपदघटितसामग्र्याअभावादित्यर्थः।एवमिति
यथानामार्थयोरितिव्युत्पत्तौयथापष्ठ्यादिविभक्तीनांसंवंधादिवाचकताव्यर्थातथाराजपुरुषइत्यत्रराजसंबंधिनिलक्षणापिविफलाइत्यर्थः।एवञ्चेतिपाठेष
ष्ठ्यंतनमनिवेश्यराजपुरुषपदसमभिव्याहारस्यभेदान्वयबोधनियामकत्वेचेत्यर्थः।तत्रभेदान्वयस्वीकारेपिक्षतिविरहादिति।तत्रराजपुरुषइतिसमासे।भेदा
न्वयस्वीकारेपि।स्वत्वसंवंधेनराजवान्पुरुषइत्यन्वयस्वीकारेपि।क्षतिविरहात्।राजापुरुषइत्यत्रसमासविभक्तिव्यवधानेनराजपदाव्यवहितापुरुषपदत्वानु
पूर्वीरूपवक्ष्यमाणभेदान्वयबोधनियामकाभावेनराजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकबोधापत्तिरूपक्षतिविरहादित्यर्थः।क्षतिविरहमुपपादयति।नचे
त्यादिना।तत्रराजपुरुषइतिसमासेस्वत्वसंसर्गकोक्तबोधाभ्युपगमेनतत्स्थलीयसमासस्थलीयराजपदपुरुषपदाव्यवधानघटितसामग्रीबलात्राजपुरुषइ
त्यादावपितादृशबोधापत्तिः।स्वत्वसंसर्गकवोधापत्तिर्नहीत्यन्वयः।आपत्त्यभावेहेतुमुपपादयति।तत्स्थलीयशाब्दबोधइति।समासस्थलीयशाब्दइत्यर्थः।त
त्रतादृशवोधसामग्र्याअप्रसिद्धेरिति।तत्रराजपुरुषइत्यत्र।राजापदपुरुषपदाव्यवधानघटितसामग्र्याप्रसिद्धेः।प्रकृत्याविभक्त्याव्यवधानादितिभावः।स्वत्वप्रकारता
वादीसिद्धान्तीशङ्कते।नचेत्यादिनावाच्यमित्यन्तग्रन्थेन।प्रकृतिप्रत्यययोरेवेति।राजस्वत्वमित्यत्रराजप्रकारकनिरूपितत्वसंसर्गकस्वत्वविशेष्यकबोधा।
नुदयात्।राजप्रकारकनिरूपितत्वसंसर्गकस्वत्वविशेष्यकराजकीयस्वत्वमित्याकारकशाब्दबोधंप्रतिराजपदोत्तरङस्प्रत्ययत्वरूपानुपूर्वीज्ञानत्वेनकारणतान
तुराजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानस्यापिराजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकशाब्दबोधंप्रतिकारणताप्रमाणाभावात्।तथा
चानुपूर्वीज्ञानस्याकारणत्वेराजपुरुषइतिसमासेयासामग्रीवर्ततेसाराजपुरुषइत्यत्रापिराजपदजन्यपुरुषपदजन्योपस्थितिघटितयोग्यताज्ञानादिसा
मग्रीअस्तीत्यत्रापिराजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकवोधापत्तिः।तद्वारणायानुपूर्वीविशेषस्यकारणत्वकल्पनगौरवपरमतिरिच्यतेपूर्वपक्षिणः

सिद्धांतिनस्तुराजपुरुषइत्यत्रराजसंबंधिप्रकारकाभेदान्वये लक्षणैवनियामिकातदभावादेवराजापुरुषइत्यत्रनापत्तिरिति तद्वारणायराजपुरुषपदा
व्यवधानघटितानुपूर्वीज्ञानकारणतानकल्प्यतइतिलाघवमितिभावः। स्वत्वसंसर्गवादीप्रतिबंधानुपूर्वीविशेषनिवेशेगौरवमुद्धरति। भवन्म
तेपीत्यादिना। भवन्मतेपि। सिद्धांतिमतेपि। यथाराजपुरुषइति। तत्पुरुषेराजपदस्यलक्षणयाराजसम्बन्ध्यर्थः। तस्य पुरुषेभेदान्वयः तथाच
तस्यलौकिकशाब्दबोधेराजपदाव्यवहितोत्तरपुरुषादिपदत्वरूपानुपूर्वीविशेषज्ञानस्यहेतुतयाः समासस्थलेपुरुषादिपदस्यवि
भक्त्याराजादिपदव्यवहितत्वात्तादृशानुपूर्वीविशेषज्ञानासंभवेनतत्रतादृशबोधसामग्र्या असिद्धेः नचप्रकृतिप्रत्यययोरानु
पूर्वीविशेषरूपस्याकांक्षात्वात्प्रातिपदिकद्वयाव्यवधानघटितोक्तानुपूर्वीविशेषज्ञानस्यहेतुत्वमेवनिष्प्रामाणिकमितिवाच्यम्।
भवन्मतेपिराजपुरुषइत्यादौतादृशसामग्रीबलात् राजपदार्थराजसंबंधिपुरुषपदार्थयोरभेदान्वयबोधस्तादृशसामग्रीबलात्रा
ज्ञःपुरुषइत्यादावपिराजादिपदस्यराजसंबंध्यादौलक्षणाग्रहसत्वेतादृशाभेदान्वयबोधप्रसंगवारणाय तथाविधानुपूर्वीवि
शेषज्ञानस्यसमासजन्यबोधेहेतुताकल्पनस्यावश्यकत्वात्। अस्माभिर्भेदान्वयबोधएवतादृशानुपूर्वीविशेषज्ञानस्यहेतुतायाः
कल्पनीयत्वात्॥ ((राज्ञःपुरुषइतिव्यासेपिराजपदस्यराजसंबंधिनिलक्षणाग्रहकालेतुल्यसामग्र्याराजसंबंध्यभिन्नःपुरुषइतिशा
ब्दापत्तिस्तांवारयितुंसिद्धांतिनापिअभेदसंसर्गकबोधेयथाराजपदपुरुषपदयोरव्यवधानघटितानुपूर्वीविशेषज्ञानकारणताकल्पनेतथापूर्वी
पक्षिणापिराजपुरुषइत्यत्रभेदान्वयबोधेराजपुरुषपदयोरव्यवधानघटितानुपूर्वीज्ञानकारणताकल्प्यतइति॥

नाधिकमिति॥राजपुरुषइत्यत्र प्रथमाव्यवधायिका।राज्ञःपुरुषइत्यत्र तु षष्ठीव्यवधायिका।राज्ञःपुरुषइत्यत्र राजसंबंधित्वस्यार्थः तत्सम्बन्धः ष-
ष्ठ्यर्थः। तथाच राजसंबंधिसंबंधीति बोध उत्पद्यते। स्वारसिकी। इच्छाधीना लक्षणा साचावश्यिका। अस्मन्मते। सिद्धांतिमते।अमी समा-
सः षष्ठीतत्पुरुषः। षष्ठ्यर्थसंबंधविशिष्टार्थे लाक्षणिकपूर्वपदकसमासत्वं षष्ठीतत्पुरुषत्वमिति तात्पर्यम्। भवन्मते तु। पूर्वपक्षिमते तु राज-
पुरुषइति। कर्मधारयइति। राजपदस्य राजसंबंधिनि स्वारसिकलक्षणा साचोभयवादिसिद्धा इति। राजसंबंधित्वपुरुषत्वधर्माभ्यां विभिन्ना-

नचोभयमतएव राजसम्बन्धिनि राजपदस्य स्वारसिकलक्षणाग्रहे राजपुरुषइत्यत्र राजसंबंधिपुरुषयोरभेदान्वयबोधो भवति इ-
यांस्तु विशेषो यदस्मन्मते ऽसौ समासः षष्ठीतत्पुरुषः भवन्मते तु कर्मधारयइति· एवंच पुरुषविशेष्यकाभेदसंसर्गकराजसम्ब-
न्धिप्रकारकबोधे राजपदाव्यवहितोत्तरवर्तिपुरुषपदत्वप्रकारकज्ञानत्वेन हेतुत्वमुभयवादिसिद्धमेव भेदान्वयबोधे ता-
दृशानुपूर्वीज्ञानहेतुताकल्पनमधिकमिति वाच्यम्॥ ६ ॥ ७ ॥ ६ ॥ ७ ॥

भ्यामेकधर्मिबोधकत्वात्कर्मधारयः समास इत्यर्थः। भेदान्वयबोधे तादृशानुपूर्वीज्ञानहेतुताकल्पनमधिकमिति वाच्यमिति मूलम्। स्वारसि-
कलक्षणास्थले राजपुरुषइत्यत्र राजसंबंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्यकशाब्दबोधे राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञा-
नकारणतायाः उभयमतसाम्येपि पूर्वपक्षिमते राजपुरुषइत्यत्र राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकशाब्दं प्रति राजपदाव्यवहितोत्तरपुरु-
षपदत्वरूपानुपूर्वीज्ञानस्य कारणत्वमधिकमित्यर्थः। तथाच गौरवात् भेदसंसर्गकबोधे पूर्वपक्षिणा नांगीकार्यइत्यर्थः।

व्यु॰टी॰ पुनः पूर्वंपक्षी युक्त्यन्तरेण गौरवमुद्धरति। उक्ताभेदान्वयबोध इत्यादिना॥ राजपुरुष इत्यत्र राजपदस्य राजसंबंधिनि निरूढलक्षणया राजसंबन्ध्यभि रं॰
४४ न्नः पुरुष इत्यभेदान्वयबोधे राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानहेतुताया व्यभिचारः। प्रभुजनः प्रभुः पुरुषः इत्यादिपर्यायपदप्रयो
गेपि राजसंबंध्यभिन्नपुरुष इत्याकारकशाब्दबोधोदयेन राजपदोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानकारणाभावात् तद्वारणाय राजपदोत्तरपुरुष
पदत्वरूपा आनुपूर्वीज्ञानाव्यवहितोत्तरराजसंबंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्यकशाब्दबोधं प्रति राजपदोत्तरपुरुषपदत्वानुपूर्वीज्ञा
नत्वेन कारणता एवं नृपपुरुष इत्यत्र नृपपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानोत्तरराजसंबंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्य

उक्ताभेदान्वयबोधे तथाविधानुपूर्वीज्ञानहेतुतायां पर्यायशब्दान्तरघटितानुपूर्वीज्ञानजन्यतथाविधान्वयबोधे व्यभिचारवा
रणाय तादृशानुपूर्वीज्ञानानन्तर्यस्य कार्यतावच्छेदककोटाववश्यं निवेशनीयतया तत्र विषयनिवेशप्रयोजनाभावेन तादृ
शकार्यतावच्छेदकस्यैव भेदान्वयबोधसाधारण्येनानुपूर्वीज्ञानस्य भेदान्वयबोधे हेतुतया अनाधिक्यात्॥ ६ ॥

कशाब्दबोधं प्रति नृपपदाव्यवहितोत्तरपुरुषपदत्वानुपूर्वीज्ञानत्वेन हेतुता तत्र राजपदाव्यवहितोत्तरपुरुषपदनृपानुपूर्वीज्ञानानन्तर
शाब्दबोधत्वावच्छिन्नं प्रति राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानहेतुता इत्येव कार्यकारणभावो वाच्यो न तत्र कार्यतावच्छे
दके राजसंबंधिप्रकारकाभेदसंसर्गकपुरुषविशेष्यकत्वरूपविषयनिवेशोपि कर्तव्यः प्रयोजनाभावात्। किंतु तादृशकार्यतावच्छेदक श्रीः राम
स्यैव राजपदाव्यवहितोत्तरपुरुषपदत्वरूपानुपूर्वीज्ञानानंतरशाब्दत्वस्यैव लाघवान्निवेशः ईदृशज्ञानानंतरशाब्दबोधत्वं च राजप्रका ४४

स्वत्वसंसर्गकपुरुषविशेष्यकशाब्दत्वबोधसाधारणमितिनानुपूर्वीविशेषज्ञानस्यभेदान्वयबोधंप्रतिहेतुताधिकमित्यर्थः। एवंत
ण्डुलंपचतीत्यादावपीइति। कर्मतासंबंधेनतण्डुलवान्पाकइतिबोधःप्रकारत्वेकर्मत्वेद्वितीयाशक्तिःकल्प्याकर्मत्वस्यचतन्निरूपकत्वसं
बंधान्तरंकल्प्यंपाकादौकर्मत्वस्यनिरूपकत्वसंबंधेनान्वयइतिगौरवमित्यर्थः तण्डुलःपचतीत्यादितःकर्मतासंबंधेनतंडुलवान्पाकइ
त्या..निवारणन्तुद्वितीयान्ततण्डुलपदपचतीत्यादिसमभिव्याहारज्ञानस्यकर्मतासंबंधेनतण्डुलवान्पाकइतिशाब्दबोधंप्रतिहेतुताङ्गीकारेणै

एवंतण्डुलंपचतीत्यादावपिपाकादिरूपधात्वर्थेकर्मत्वादिसंबंधेनतंडुलादेरन्वयबोधःस्वीकर्तुमुचितःकर्मत्वादेःपाकाद्यंशे
प्रकारत्वेतत्रतत्रद्वितीयादेःशक्तिकल्पनेनतादृशवाक्यजन्यशाब्दबोधेकर्मत्वादिसंसर्गस्याधिकस्यविषयताकल्पनेचगौरवा
त्‌ तण्डुलंपचतीत्यादिवाक्यजन्यशाब्दबोधसामग्रीवलात्तण्डुलःपचतीत्यादावपितथाविधान्वयबोधापत्तिस्तुनसंभवति
। तादृशान्वयबोधेद्वितीयान्ततण्डुलपदत्वाद्यवच्छिन्नधर्मिकपचतीत्यादिसमभिव्याहारज्ञानस्यहेतुतयातण्डुलःपचती
त्यादौतादृशसामग्र्याअप्रसिद्धेः एवंपचतिचैत्रइत्यादावपिकृतिसंबंधेनपाकादेश्चैत्राद्यंशेन्वयबोधस्वीकारउचितःअ
न्यथोक्तरीत्यागौरवात्॥ ११ वभवतीत्यर्थः॥ तादृशसामग्र्याअप्रसिद्धेरिति। द्वितीयांत तण्डुलपद पचतिपदसमभिव्याहारघटि
तयोग्यताज्ञानादिसामग्र्याःप्रसिद्धेर्नतण्डुलःपचतीत्यतः कर्मतासंबंधेनतण्डुलवान्पाकइतिशाब्दबोधधीरित्यर्थः। एवंपचति
चैत्रइत्यादावपीति। कृतिसंबंधेनपाकवांश्चैत्रइतिशाब्दबोधोंगीकर्तुमुचितः। अन्यथोक्तरीत्यागौरवादिति। आख्यातस्यकृतौशक्तिक

मु·टी राज्ञः पुरुष इत्यत्र षष्ठ्यर्थः स्वत्वं तत्र राजरूपप्रकृत्यर्थस्य निरूपितत्वसम्बन्धेनान्वयः। स्वत्वस्य च पुरुषे समवायेन स्वरूपेण वान्वयः तथाच पुरुषो राजस्वत्ववानिति बोधः। अत्र कृ
४५ स्वत्वसंबन्धेन राजप्रकारकपुरुषविशेष्यकान्वयबोधो न संभवति नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वात्। अन्यथा राजा पुरुष इत्यत्रापि भेदसंबंधेनान्वयबोधः स्यात् अत्र

तत्र तादृशान्वयबोधस्वीकारे तत्स्यलीयसामग्रीबलात् पच्यते चैत्र इति। तत्र। पचति चैत्र इत्यत्र। तादृशान्वयबोधस्वीकारे। कृतिसंबंधेन पाकवांश्चैत्र इति बोधस्वीकारे। तत्स्यलीयसामग्रीबलात्॥ प्रथमान्तचैत्रपदपचतिधातुसमभिव्याहारघटितयोग्यतादिकारणबलात्। कृतिसंबंधेन पाकवांश्चैत्र इति बोधापत्तिवारणन्तु उक्तरीत्यैव संभवति। प्रथमान्तचैत्रपदशप्विकरणविशिष्टाख्यातान्तपचधातुसमभिव्या

तत्र तादृशान्वयबोधस्वीकारे तत्स्यलीयसामग्रीबलात्पच्यते चैत्रः पाकश्चैत्र इत्यादौ नयाविधान्वयबोधापत्तेरप्युक्तरीत्या वारणसंभवादिति। मैवम्·राज्ञः पुरुष इत्यादौ षष्ठ्यादेः स्वत्वादिवाचकत्वमावश्यकम्॥

॥हारकारणतयैव संभवतीत्यर्थः। कर्त्तरि यगात्मनेपदयोरसाधुत्वादाह। पाकश्चैत्र इत्यादावपीति। अत्र यगात्मनेपदयोरभावात्कृतिसंबंधेन पाकवांश्चैत्र इति बोधापत्तिवारणं चैत्रः पचतीति शप्समभिव्याहृताख्यातान्तपचचैत्रसमभिव्याहारकारणतयैव भवतीत्यर्थः। समाधत्ते। राज्ञः पुरुष इत्यादौ षष्ठ्यादेः स्वत्वादिवाचकत्वमावश्यकमिति। तथाच राजस्वत्ववान्पुरुष इत्येव बोधो न तु स्वत्वसंबंधेन राजवान्पुरुष इति बोध इति भावः॥

चपुरुषविशेष्यकस्वत्वसम्बन्धेन राजप्रकारकबोधं प्रति षष्ठ्यंतराजपदसमभिव्याहृतपुरुषपदत्वरूपाकांक्षाज्ञानस्य कारणत्वं स्वीकृत्य राजा पुरुष इति वाक्यात्तादृ राम
शबोधवारणसंभवेपि राजस्वत्वाभाववान्पुरुषः सुंदर इति प्रत्यक्षं प्रति राज्ञः पुरुष इत्याकांक्षाज्ञानघटितशाब्दसामग्र्याः प्रतिबंधकत्वं तादृशवाक्यात्पुरुषविशेष्य ४५

कस्वत्वसंबंधेनराजप्रकारकाऽन्वयबोधस्वीकर्तॄणाऽवश्यंवक्तव्यंतादृशवाक्याद्राजस्वत्वप्रकारकपुरुषविशेष्यकबोधस्वीकर्तॄणानवक्तव्यम्। तादृशप्रसक्तंप्रतिधर्मितावच्छेदकप्रकारकज्ञानविषयाकारणीभूतपुरुषत्वावच्छिन्नविशेष्यकराजस्वत्वाभावप्रकारकनिश्चयकालेराज्ञःपुरुषइतिवाक्यजन्यपुरुषविशेषविशेष्यकराजस्वत्वप्र
कारकशाब्दबोधकारणीभूतपुरुषविशेष्यकराजस्वत्वाभावप्रकारकनिश्चयाभावघटितसामग्र्याऽसत्त्वात्तादृशप्रसक्तस्येतरसकलकारणसमवधानेयादृशा
शाब्दसामग्र्याःसमवधानंतादृशप्रसक्तेएवतादृशसामग्र्याःप्रतिबन्धकत्वात्। नचतादृशशाब्दसामग्रीकालेपुरुषःसुंदरइतिप्रसक्तस्यानुत्पादार्थंअवश्यंभि
न्नविषयकप्रसक्तंप्रतितादृशशाब्दसामग्रीप्रतिबन्धकत्वंवक्तव्यम्। एवंचराजस्वत्वाभाववत्पुरुषविशेष्यकसुंदरत्वप्रकारकप्रसक्तत्वावच्छिन्नंप्रतिराज्ञः
पुरुषइतिवाक्यात्।स्वत्वसम्बन्धेनराजप्रकारकपुरुषविशेष्यकान्वयबोधस्वीकर्तॄणामपिप्रतिबन्धकत्वंनवक्तव्यम्सामान्यधर्मावच्छिन्नंप्रतिप्रतिबंधकत्वेनैवोपपत्तेः
तयाचनामार्थयोर्भेदसम्बन्धेनान्वयबोधस्वीकर्तॄमतेकिंगौरवमितिवाच्यम्। यतःसामान्यतोभिन्नविषयकप्रसक्तंप्रतिराज्ञःपुरुषइतिशाब्दसामग्र्याःप्रतिबंधक
त्वंनसंभवतितादृशशाब्दसामग्रीकालेराजस्वत्वाभाववत्पुरुषविशेष्यकसुंदरत्वप्रकारकप्रसक्तेच्छाकालेराजस्वत्वाभाववान्पुरुषःसुंदरइतिप्रसक्तमेवजाय
तेनतुकेवलंपुरुषःसुंदरइतिप्रसक्तंतादृशेच्छाविषयस्यपुरुषःसुंदरइतिप्रसक्तेश्चासिद्धेः अतोराजस्वत्वाभाववत्पुरुषविशेष्यकसुंदरत्वप्रकारकप्रसक्तंप्रतितादृशप्र
सक्तेच्छाविरहविशिष्टतादृशशाब्दसामग्र्याःप्रतिबन्धकत्वंनामार्थयोर्भेदान्वयवादिनाऽवश्यंवक्तव्यंसम्बन्धस्यषष्ठ्यर्थत्वंस्वीकृत्यराजस्वत्वप्रकारकपुरुषविशेष्य
कान्वयबोधवादिनानवक्तव्यम्इत्येवसम्बन्धस्यषष्ठ्यर्थत्ववादिमतेलाघवंनचस्वत्वस्यषष्ठ्यर्थतावादिमतेराज्ञःपुरुषइत्याकांक्षाज्ञानघटितशाब्दसामग्र्याः
भिन्नविषयकप्रसक्तंप्रतिप्रतिबंधकत्वेकल्पनीयेविभक्तिजन्यस्वत्वोपस्थितिराजस्वत्वाभावप्रकारकनिश्चयाभावादीनांसामग्र्यामंतर्भावःनामार्थयोर्भेदसम्बन्धेना
न्वयबोधवादिनांतुविभक्तिजन्योपस्थितितादृशनिश्चयाभावादीनांसामग्र्यामनंतर्भावइतिलाघवमितिवाच्यम्भवन्मतेपिस्वत्वसम्बन्धावच्छिन्नप्रतियोगिताक
राजाभावव्याप्यराजस्वत्वाभाववानितिनिश्चयस्यस्वत्वसम्बन्धेनराजप्रकारकपुरुषविशेष्यकान्वयबुद्धिंप्रतिप्रतिबन्धकतयातदभावस्यराज्ञःपुरुषइत्याकां
क्षाज्ञानघटितशाब्दसामग्र्यामंतर्भावआवश्यकःषष्ठ्यर्थप्रकारकान्वयबोधवादिमतेतुराजस्वत्वप्रकारकबुद्धिंप्रतिराजस्वत्वाभावप्रकारकनिश्चय
स्यबाधमुद्रयाप्रतिबन्धकत्वाद्राजस्वत्वाभावप्रकारकनिश्चयसामान्याभावएवतादृशसामग्र्यांप्रवेशनीयःननुस्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभा
वव्याप्यराजस्वत्वाभावप्रकारनिश्चयाभावइतिस्वत्वप्रकारकबोधवादिमतेलाघवंतिष्ठत्येवेतिभट्टाचार्येणाभिहितम्। नन्वत्रयथाग॥ ६ ॥

न्या० टी० व्य० णी ४६

जाभाव व्याप्य राजस्वत्वाभावप्रकारकनिश्चयाभावस्य तादृशसामग्र्यामंतर्भावो नास्ति तथा स्वत्वसम्बंधेनान्वयबोधवादिमतेपि राजस्वत्वाभावव्याप्यस्वत्वसम्बन्धाव
च्छिन्नप्रतियोगिताकराजाभावप्रकारकनिश्चयाभावस्य तादृशसामग्र्यामंतर्भावो नास्ति स्वत्वसंबंधेन राजप्रकारकबुद्धिप्रतिबंधकीभूततादृशसंबंधावच्छिन्न
प्रतियोगिताकराजाभावप्रकारकनिश्चयसामान्याभावनिवेशनेनोपपत्तेरिति साम्यमेव न च राजस्वत्वाभावव्याप्य राजाभाववत्तानिश्चयस्य प्रतिबंधकता राजस्व
त्वाभावो राजाभावव्यापक इति निश्चयविशिष्टस्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावप्रकारकनिश्चयत्वेन व्यापकसामानाधिकरण्यरूपव्याप्तिविशिष्टज्ञान
स्य ज्ञानविशिष्टज्ञानत्वेन प्रतिबंधकताया भट्टाचार्येण व्यवस्थापितत्वात् एवं च राजस्वत्वप्रकारकान्वयबोधवादिमते राजस्वत्वाभावधर्मिकस्वत्वसंबंधावच्छिन्नप्रति
योगिताकराजाभावव्यापकत्वनिश्चयविशिष्टराजाभावप्रकारकनिश्चयाभावस्य तादृशसामग्र्यां निविष्ट इति स्वत्वविषयता एकदेव प्रविष्टा स्वत्वसम्बन्धेन राजप्रकारका
न्वयबोधस्वीकर्तृमते तु तादृशसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावधर्मिकराजस्वत्वाभावव्यापकत्वनिश्चयविशिष्टपुरुषधर्मिकराजस्वत्वाभावप्रकारकनिश्चया
भावस्य तादृशसामग्र्यां प्रविष्ट इति स्वत्वविषयतायाः द्विधा प्रवेशे गौरवमिति स्वत्वप्रकारकान्वयबोध एव युक्त इति वाच्यम् एवमपि विभक्तिजन्योपस्थितेस्तादृशसा
मग्र्यामंतर्भावेण एवं भिन्नविषयकप्रसक्तिं प्रति राज्ञः पुरुष इत्याकांक्षाज्ञानघटितसामग्र्याः प्रतिबंधकत्वे कल्पनीये विभक्तिजन्यस्वत्वोपस्थितेः प्रवेश इति गौर
वात् एवं स्वत्वसंबंधाद्राजकीयमिति बाधदशायां पुरुषः स्वत्वसामान्याभाववानिति बाधदशायां वा राज्ञः पुरुष इति वाक्यात्पुरुषविशेष्यकराजस्वत्वप्रकारकान्वयबोधानुत्स
सा तदानीं भिन्नविषयकसामग्रीसत्त्वे भिन्नविषयकप्रसक्तेः तत्सत्त्वे भिन्नविषयकप्रसक्तिं प्रति तादृशसामग्र्याः प्रतिबंधकता कल्पनीये तादृशसामग्र्यां पुरुषविशेष्यकराज
स्वत्वाभावप्रकारकनिश्चयाभावस्यैव स्वत्वविशेष्यकराजकीयत्वाभावप्रकारकनिश्चयाभावस्वत्वसामान्याभावप्रकारकपुरुषविशेष्यकनिश्चयाभावयोरपि प्रवेशः क
र्त्तव्यः तादृशवाक्यात् स्वत्वसंबंधेन राजप्रकारकपुरुषविशेष्यकान्वयबोधस्वीकर्तृमते तु पुरुषविशेष्यकस्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावप्रकारकनिश्चया
भाव एव प्रवेशनीय इति नामार्थयोर्भेदवादिमते लाघवाच्च न च षष्ठ्यर्थस्य प्रकारतावादिमते राज्ञः पुरुष इत्याकांक्षाज्ञानघटितसामग्र्यां भिन्नविषयकप्रसक्तिं प्रति
प्रतिबंधकीभूतायां पुरुषविशेष्यकराजस्वत्वप्रकारकानाहार्यबुद्धित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकताश्रयसामान्याभाव एव निवेशनीयः तादृशप्रतिबंध
कत्वं च स्वत्वं राजकीयं पुरुषः स्वत्वाभाववान् पुरुषः राजस्वत्वाभाववान्वा इति त्रितयसाधारणमिति तादृशनिश्चयान्यतमकालेनाशाब्दसामग्रीति तादृशबाधकाले भिन्न राम
विषयकप्रसक्तेस्तत्तिरबाधितैवेति वाच्यम् तादृशबाधादीनां तादृशप्रतिबंधकत्वेनानुगमे भाविज्ञानमप्रमेत्यप्रामाण्यग्रहोत्तरं स्वत्वं न राजकीयमित्यप्रामाण्यग्रहस्योस ४६

टि॰ तदानींराज्ञःपुरुषइत्याकांक्षाज्ञानघटितशाब्दबोधकारणसत्त्वेपिभिन्नविषयकप्रत्यक्षसामग्रीबलादप्रामाण्यज्ञानोत्पत्तितृतीयक्षणेभिन्नविषयकप्रत्यक्षोत्पत्तिप्रसंगः
तादृशबाधग्रहस्यापिद्वितीयक्षणावच्छेदेनाप्रामाण्यज्ञानाभावविशिष्टतयाप्रतिबंधकत्वेनतस्यचस्वोत्पत्तिक्षणेपिसत्त्वात्तादृशप्रतिबंधकसामान्याभावघटितशाब्द
सामग्र्याःस्वोत्पत्तिद्वितीयक्षणेऽसत्त्वात्।नचतादृशानाहार्यबुद्धित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नप्रतियो
गिताकाभावएवभिन्नविषयकप्रत्यक्षप्रतिबंधकीभूतसामग्र्यामंतर्भावनीयः तथाचतादृशप्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणीभूतंयदप्रामाण्यज्ञाना
भावसहितस्वत्वधर्मिकराजकीयत्वाभावप्रकारकनिश्चयत्वंतदवच्छिन्नप्रतियोगिताकाभावस्यबाधनिश्चयोत्पत्तिकालएवसत्त्वात्तदानंतरक्षणेनभिन्नविषय
कप्रत्यक्षापत्तिरितिवाच्यम् यथाजातिमदभावस्यभूतलेऽसत्त्वेपिजातिमदभावोयंप्रतियोगितावच्छेदकपटत्वावच्छिन्नप्रतियोगिताकाभावोवर्ततेतथास्वत्वंनरा
जकीयमितिअप्रामाण्यज्ञानास्कंदितनिश्चयकालेतादृशप्रतिबंधकसामान्याभावस्यासत्त्वेपितादृशानाहार्यबुद्धित्वव्यापकप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेद
कतापर्याप्त्यधिकरणेप्रामाण्यज्ञानानास्कंदितस्वत्वाभावप्रकारकनिश्चयत्वावच्छिन्नप्रतियोगिताकाभावोवर्ततएवेतिएकबाधसत्त्वेऽपरबाधाभावमादायशाब्दसामग्रीस
मवस्तुनापत्तेर्दुर्वारत्वात्तत्तादृशप्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणत्वावच्छिन्नावच्छेदकताकप्रतियोगिताकाभावएवसामग्र्यांप्रवेशनीयइतिएकबाध
सत्त्वेऽपरबाधाभावमादायनसामग्रीसंवलनमितिवाच्यम् अप्रामाण्यज्ञानाभावनिष्ठावच्छेदकतायाज्ञानत्वनिष्ठावच्छेदकतायाश्चसम्बन्धभेदेनावच्छेदकतावच्छेद
कभेदेनचभिन्नतयाकस्याऽपिअवच्छेदकतायास्तादृशप्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणाऽप्रामाण्यज्ञानाभावज्ञानत्वादिसमुदायवृत्तित्वाभावात्तादृश
प्रतिबंधकतावच्छेदकतापर्याप्त्यधिकरणत्वावच्छिन्नावच्छेदकताप्रतियोगिताकाभावनिवेशासम्भवात् अत्रकेचित्तुराज्ञःपुरुषइत्यत्रराजपुरुषयोर्भेदान्वय
वादिमतेपियत्रषष्ठ्याःस्वत्वेशक्तिभ्रमस्तत्रतादृशवाक्यात्पुरुषविशेष्यकराजस्वत्वप्रकारकशाब्दबोधोजायतइतितन्मतेतादृशाकांक्षाज्ञानघटितशाब्दसामग्रीद्वि
धाएकाविभक्तिजन्यस्वत्वोपस्थितिराजस्वत्वाभावप्रकारकपुरुषविशेष्यकनिश्चयाभावादिघटिताअपराचविभक्तिजन्यस्वत्वोपस्थित्यादिघटिताइतिद्विविधसा
मग्र्याएवशाब्दबोधप्रयोजकत्वंभिन्नविषयकप्रत्यक्षप्रतिप्रतिबंधकत्वभेदान्वयबोधवादिनाकल्पनीयंनामार्थयोर्भेदान्वयास्वीकर्तृमतेराज्ञःपुरुषइतिवाक्या
त्कदाचिदपिस्वत्वसम्बन्धेनराजप्रकारकपुरुषविशेष्यकान्वयबोधानुत्पादान्नतादृशाकांक्षाज्ञानघटितसामग्रीभेदान्वयबोधोपयिकीकिंतुराजस्वत्वप्रकारक
बोधोपयिक्येवेतिएकविधतादृशसामग्र्यामेवतादृशशाब्दबोधप्रयोजकत्वंचकल्पनीयमितिमहल्लाघवमित्याहुः॥ ६ ॥

अन्यथापुरुषोनराज्ञइत्यादौपुरुषेराजस्वत्वाद्यभावबोधानुपपत्तिरिति॥अन्यथास्वत्वसंसर्गकबोधाङ्गीकारेस्वत्वंहिनवृत्तिनियामकं वृत्त्यनियामकस्वत्वसंबन्धोनइतिप्रतियोगितावच्छेदकः नञोऽसत्त्वेयेनसम्बन्धेनयत्रान्वयस्तत्सम्बन्धावच्छिन्नप्रतियोगिताकाभावए वनञाबोध्यइतिनियमः तेननञास्वत्वसंसर्गावच्छिन्नप्रतियोगिताकराजाभाववान्पुरुषइतिबोधयितुंनशक्यते॥तस्मात्स्वत्वंषष्ठ्यर्थः ।तत्सम्बन्धश्चाश्रयतासाचवृत्तिनियामिकातेनाश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकराजस्वत्वाभाववान्पुरुषइतिबोधः।अतएवस्वामित्वादि

अन्यथापुरुषोनराज्ञइत्यादौपुरुषेराजस्वत्वाद्यभावबोधानुपपत्तेः॥नहितत्रस्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभा वएवप्रतीयतेनतुराजस्वत्वाद्यभावइतिसंभवतिस्वत्वादिसंबन्धस्यवृत्त्यनियामकतयाप्रतियोगितानवच्छेदकत्वेनन त्सम्बन्धावच्छिन्नप्रतियोगिताकाभावाप्रसिद्धेः अतएवस्वामित्वादिकंपरिसज्यस्वत्वादेःषष्ठ्यर्थत्वंनवीनाः स्वीकुर्व न्तिस्वामित्वादेःषष्ठ्यर्थत्वेतस्यनिरूपकतासम्बन्धेनस्वांशेन्वयसंभवेपितादृशसम्बन्धस्यवृत्त्यनियामकतयासं सर्गाभावप्रतियोगितानवच्छेदकत्वेनतत्सम्बन्धावच्छिन्नाभावस्यनञाप्रत्यायनासम्भवात्॥

,, दिकंपरित्यज्येति।अतएव निरूपकतासम्बन्धस्यवृत्त्यनियामकत्वादेव।चैत्रस्यधनमित्यत्रस्वत्वंषष्ठ्यर्थः।तत्सम्बन्धआश्रयतारूपोवृत्तिनियामकः धनंचैत्रस्यस्वत्ववदिति बोधः।यदिस्वामित्वंषष्ठ्यर्थस्तदानिरूपकत्वसम्बन्धेनस्वामित्वसत्त्वेपिधनंस्वामीभवतीतिप्रतीत्यभावान्निरूपकत्वसम्बन्धोनवृत्तिनियाम कइतिभावः।स्वांशे।स्वत्वाश्रयेधनांशे।यदित्वाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकस्वामित्वाभावएवप्रतीयतेइत्युच्यते।तदाचैत्रीयधनेपि

आश्रयतासम्बन्धेनधनेस्वामित्वाभावात्।नचनञ्समभिव्याहारस्थलानुरोधेनषष्ठ्यादेःस्वत्वादिवाचकत्वेपिराज्ञःपुरुषइत्यादौषष्ठ्याद्यर्थस्य
संसर्गमर्यादयेति।तस्य।स्वत्वस्य।तत्संसर्गभानकल्पने।स्वत्वसंसर्गस्याश्रयस्यचविषयताकल्पनेगौरवात्।स्वत्वप्रकारकबोधेत
त्समभिव्याहारएवनियामकः नञोऽभावेस्वत्वसंसर्गकएवबोधइत्यर्थः।पूर्वपक्षि—मतमनूद्यदूषयन्ति॥एवंसतीति।नञंविनाए

आश्रयतासम्बन्धाद्यवच्छिन्नाभावबोधस्यैतादृशसमभिव्याहारस्थलेऽभ्युपगमेचैत्रादिसम्बन्धिनिधनेपिआश्रतासम्ब
न्धावच्छिन्नप्रतियोगिताकचैत्रवृत्तिस्वामित्वाभावसत्वात्नेदंचैत्रस्येतिप्रयोगापत्तिः।नचनञ्समभिव्याहारस्थलानुरो
धेनषष्ठ्यादेःस्वत्वादिवाचकत्वेपिराज्ञःपुरुषइत्यादौषष्ठ्याद्यर्थस्यसंसर्गमर्यादयाभानमुचितम्।तत्प्रकारत्वोपगमे
तत्सम्बन्धस्याधिकस्यभानकल्पनेनगौरवात्।नञ्समभिव्याहारस्यैवतत्प्रकारकबोधनियामकत्वाभ्युपगमेनसामग्री
विरहात्।तत्प्रकारकबोधस्यतदसमभिव्याहारस्थलेऽसंभवादितिवाच्यम्।एवंसतिनञ्पदंविनायादृशसमभिव्याहा
रस्थलेयत्रधर्मिणियेनसम्बन्धेनयस्यविशेषणतयाभानंतत्रनञ्समभिव्याहारेतत्रधर्मिणितत्सम्बन्धावच्छिन्नप्रति
योगिताकतदभावःप्रतीयतेइतिसर्वजनानुभवस्यापलापापत्तेः॥ ((राज्ञःपुरुषइतिसमभिव्याहारस्थलेइत्यर्थः।पुरुषेधर्मिणि।आश्र
यत्वसम्बन्धेन।यस्य।षष्ठ्यर्थस्वत्वस्य।विशेषणतयाभानं।तत्रैतस्यराज्ञःपुरुषइतिसमभिव्याहारस्थलेइत्यर्थः।तत्र।नञ्समभिव्याहारे॥
धर्मिणि।पुरुषेधर्मिणि।तत्सम्बन्धावच्छिन्नप्रतियोगिताकतद्धर्माभावः।आश्रयत्वसंसर्गावच्छिन्नप्रतियोगिताकस्वत्वाभावः।प्रतीयतेइति

सर्वसिद्धनियमस्य पूर्वपक्षिमते ऽपलापापत्तिः यतः नञ्विनिर्मोके स्वत्वसंसर्गकराजप्रकारकपुरुषविशेष्यकबोधः स्वीक्रियते तेन नञ्समभि
व्याहारस्थले च आश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकराजस्वत्वाभावप्रकारकः पुरुषविशेष्यको बोधः स्वीक्रियत इत्युक्तनियमापला
पः प्रतियोग्यभावान्वयेतुल्ययोगक्षेमाविति सर्वसंमतो नियमः पूर्वपक्षिणापलप्यत इत्यर्थः। पुनः प्रकारान्तरेण स्वत्वसंसर्गवादं निरस्य
ति॥ राज्ञः पुरुष इत्यादिवाक्यजन्याप्रामाण्येति॥ पूर्वपक्षिमते राज्ञः पुरुष इत्यत्र राजप्रकारकस्वत्वसंसर्गकः पुरुषविशेष्यको बोधो जाय
ते सत्र पुरुषो न राज इत्यतो जायमानं आश्रयतासंसर्गावच्छिन्नषष्ठ्यर्थराजस्वत्वावच्छिन्नप्रतियोगिताकाभावप्रकारकं अभावीय

राज्ञः पुरुष इत्यादिवाक्यजन्याप्रामाण्यज्ञानानास्कंदितबोधदशायां पुरुषो न राज्ञ इत्यादिवाक्यादपि शाब्दबोधापत्तेः
स्वत्वाभावबुद्धौ स्वत्वसंसर्गज्ञानस्य विरोधित्वे मानाभावात्· स्वस्य नियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वेपि
राज्ञः पुरुष इत्यादौ राजस्वत्वादेः प्रकारताभ्युपगमः समुचितः॥ ऽऽस्वरूपसंसर्गकं पुरुषविशेष्यकं बोधं न प्रतिबध्नाति। समा
नप्रकारकसमानसंसर्गकज्ञानस्य ग्राह्याभावावगाहितया विरोधित्वात् इह तु न तथा विरोधित्वं प्रकारसंसर्गभेदादिति भावः स्वत्वाभाव
बुद्धौ। आश्रयतासंसर्गावच्छिन्नस्वत्वावच्छिन्नप्रतियोगिताकाभावबुद्धौ। राजप्रकारकस्वत्वसंसर्गकज्ञानस्य विरोधित्वे मानाभावा
दित्यर्थः स्वस्य नियामकसम्बन्धस्याभावप्रतियोगितावच्छेदकत्वेपि। इत्यपिना अनवच्छेदकपक्षे पुरुषो न राज्ञ इत्यत्र दोषोद्धरस्तदुद्धारेपीत्य
र्थः। स्वत्वसंसर्गावच्छिन्नराजत्वावच्छिन्नप्रतियोगिताकराजाभाववान् पुरुष इति बोधोपपादनादिति भावः। राज्ञः पुरुष इत्यादौ राजस्वत्वादेः

अन्यथातादृशसमभिव्याहारज्ञानघटितेति। अन्यथास्वत्वबोधानंगीकारे। तादृशसमभिव्याहारज्ञानघटितशाब्दसामग्रीकाले। राज्ञः पुरुष इत्याकारकषष्ठ्यन्तराजपदसमभिव्याहृतप्रथमान्तपुरुषपदसमभिव्याहारज्ञानघटितयोग्यतासत्तिज्ञानादिरूपशाब्दसामग्रीकाले। विशिष्टवैशिष्ट्यावगाहीति। राजस्वत्वाभावविशिष्टे पुरुषे सुन्दरत्ववैशिष्ट्यावगाहि। प्रत्यक्षवारणाय तत्र विशिष्टवैशिष्ट्यप्रत्यक्षे तादृशसामग्र्याः। षष्ठ्यन्तराजपदप्रथमान्तपुरुषपदसमभिव्याहृतयोग्यताज्ञानादिसामग्र्याः। राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकबोध

अन्यथातादृशसमभिव्याहारज्ञानघटितशाब्दसामग्रीकाले राजस्वत्वाभाववान्पुरुषः सुन्दर इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षवारणाय तत्र तादृशसामग्र्याः प्रतिबंधकताकल्पनाधिक्येन गौरवात्। अस्मन्मते तादृशसमभिव्याहारघटितसामग्र्या राजस्वत्वाभाववान्पुरुष इत्यादिबाधाभावघटिततया तत्सत्त्वे विशेष्यतावच्छेदकादिप्रकारकनिश्चयरूपकारणविरहादेव तथाविधविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षोत्पत्त्यसंभवेन तादृशसामग्र्यास्तत्र प्रतिबन्धकत्वस्याकल्पनात्॥ ६ ॥

जनिकायाः पूर्वं यस्मिन्मते प्रतिबंधकताकल्पनाधिक्येन गौरवादित्यर्थः। अस्मन्नये। स्वत्वप्रकारताभ्युपगममते॥ तादृशसमभिव्याहारज्ञानघटितसामग्र्याः॥ राज्ञः पुरुष इति समभिव्याहारघटितायाः राजस्वत्वप्रकारकबोधजनकयोग्यताज्ञानादिरूपसामग्र्याः॥ राजस्वत्ववान्पुरुष इति शाब्दबोधस्य बाधः राजस्वत्वाभाववान्पुरुष इति निश्चयरूपः तदभावघटिततया। तत्सत्त्वे। राजस्वत्वाभाववान्पुरुष इत्याकारको यो बोधस्तदभावघटितषष्ठ्यन्तराजपदसमभिव्याहृतप्रथमान्तपुरुषपदज्ञानघटितयोग्यताज्ञानादिरूपसामग्रीसत्त्वे। राजस्वत्वाभावरूपविशेष्यतावच्छेदकादिप्रका

राजस्वत्वाभाववान्पुरुषः सुन्दर इत्याकारकविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षोत्पत्तिसंभवेन तादृशसामग्र्याः स्वत्वप्रकारकबोधजनकराज्ञः पुरुष इतिस कुं
मभिव्याहारज्ञानघटितयोग्यताज्ञानादिरूपसामग्र्याः प्रतिबंधकत्वाकल्पनादित्यर्थः। नन्वेकविशिष्टे ऽपरवैशिष्ट्यमिति बोध एव विशेष्यतावच्छे
दकप्रकारकनिश्चयापेक्षा सिद्धांतिमतेपि स्वत्वाभावसौन्दर्य्ययोरेकत्रद्वयमितिरीत्या बोधप्रतिबंधकत्वे कल्पनीये राजस्वत्वाभाववान्पुरुषः सु
न्दर इत्याकारकविशिष्टवैशिष्ट्यबोधसाधारणराजस्वत्वाभावसौन्दर्योभयप्रकारकपुरुषविशेष्यकप्रत्यक्षरूपैकधर्मावच्छिन्नप्रतिबध्यता
निरूपितषष्ठ्यन्तराजपदसमभिव्याहृतप्रथमान्तपुरुषपदज्ञानघटितयोग्यताज्ञानादिरूपसामग्रीत्वेनैकप्रतिबंधकत्वकल्पनयैव पूर्वप
क्षिणो मम ापि निर्वाह इत्याह॥ अन्यादृशप्रत्यक्षस्यत्लीयप्रतिबन्धकतया च नत्वन्मते निर्वाह इति। एकत्र द्वयमितिरीत्या राजस्वत्वाभाव

अन्यादृशप्रत्यक्षस्यत्लीयप्रतिबन्धकतया च नत्वन्मते निर्वाहः अन्यत्रान्यविधप्रत्यक्षेच्छानामुत्तेजकतया

सौन्दर्योभयप्रकारकपुरुषविशेष्यकराजस्वत्वाभाववान्पुरुषः सुन्दर इत्याकारकाज्ज्ञानादन्यादृशं यत्प्रत्यक्षं तत्स्यत्लीयाया एकविशि
ष्टे ऽपरवैशिष्ट्यमिति बोधसाधारणी राजस्वत्वाभावसौन्दर्योभयप्रकारकपुरुषविशेष्यकप्रत्यक्षरूपैकधर्मावच्छिन्नप्रतिबध्यतात
न्निरूपिताया षष्ठ्यन्तराजपदसमभिव्याहृतप्रथमान्तपुरुषपदज्ञानघटितयोग्यताज्ञानादिरूपसामग्रीत्वरूपैकधर्मावच्छिन्नाप्रतिबं
धकतातया च नत्वन्मते स्वत्वसंसर्गतावादिपूर्वपक्षिमते निर्वाह इत्यर्थः। पूर्वपक्षिमते निर्वाहाभावमुपपादयति॥ अन्यत्रान्यविधप्रत्यक्षे
च्छानामेवोत्तेजकतयेति। अन्यत्रैकविशिष्टे ऽपरवैशिष्ट्यमितिरीत्या जायमानात्राजस्वत्वाभाववान्पुरुषः सुन्दर इत्याकारकज्ञानीयप्रतिब

स्मिन् एकत्रद्वयमितिरीत्याजायमानपुरुषराजस्वत्वाभाववान् सुन्दरश्चेति ज्ञानप्रतिबन्धकत्वे। अन्यविधप्रसक्तेच्छानामेव एकत्रद्वयमि
तिरीत्याराजस्वत्वाभाववान् पुरुषः सुन्दरइत्याकारकं ज्ञानं जायतामित्याकारिकेच्छानामेवोत्तेजकतयाराज्ञः पुरुषइति शाब्दसामग्रीप्रतिबं
धकतायाउत्तेजकतयाएकत्रद्वयमितिरीत्याराजस्वत्वाभाववान् पुरुषः सुन्दरइति प्रत्यक्षं जायतामित्याकारिकेच्छाविशिष्टराज्ञः पुरुषइ
तिशाब्दसामग्रीनिष्ठप्रतिबन्धकतानिरूपितप्रतिबध्यतावच्छेदकंनैकंराजस्वत्वाभावसौन्दर्योभयप्रकारकपुरुषविशेष्यकप्रत्यक्षत्वं। किन्तु
स्वत्वाभावसौन्दर्योभयप्रकारतानिरूपितपुरुषनिष्ठैकविशेष्यताशालिप्रत्यक्षत्वंप्रतिबध्यतावच्छेदकंतच्चैकविशिष्टेऽपरवैशिष्ट्यमितिरीत्या

तादृशेच्छायामसत्यांचोपदर्शितविशिष्टवैशिष्ट्यबोधत्वप्रकारेच्छाबलादुपदर्शितविशिष्टवैशिष्ट्यबोधोपपत्तये। अन्यादृशवि
षयतायाएवप्रतिबध्यतावच्छेदकत्वोपगमावश्यकत्वात्॥

''जायमानराजस्वत्वाभावावच्छिन्नपुरुषनिष्ठविशेष्यतानिरूपितसौन्दर्य
निष्ठप्रकारताशालिनिज्ञानेनास्तिइत्यर्थः। तादृशेच्छायामसत्यां॥ एकत्रद्वयमितिज्ञानंजायतामितीच्छायामसत्यां। राज्ञःपुरुषइतिशाब्दसाम
ग्रीकालेइतिशेषः॥ उपदर्शितविशिष्टवैशिष्ट्यबोधत्वप्रकारकेच्छाबलात्॥ राजस्वत्वाभावविशिष्टपुरुषेसौन्दर्यवैशिष्ट्यावगाहिप्र
त्यक्षोपपत्तये। अन्यादृशविषयतायाएवतत्रप्रतिबध्यतावच्छेदकत्वेनोपगमावश्यकत्वादितिमूलम्॥ राजस्वत्वाभावसौन्दर्योभयप्रकारतानि
रूपितपुरुषनिष्ठविशेष्यताएवतत्रएकत्रद्वयमितिरीत्याज्ञानंजायतामि तीच्छाविरहविशिष्टराज्ञःपुरुषइतिशाब्दसामग्री प्रतिबंधकत्वेनथाच
प्राचां मतेराजपुरुषइत्यत्रराजवान्पुरुषइतिशाब्दधीस्तद्वाधोराजाभाववान्पुरुषइत्याकारकस्तदभावघटिताषष्ठ्यंतराजपदसमभिव्या ६९

व्यु·टी· ५० पुरुषपदजन्योपस्थितिघटितयोग्यताज्ञानादिरूपशाब्दसामग्रीतत्काले राजस्वत्वाभाववान्पुरुषः सुन्दर इति विशिष्टवैशिष्ट्यप्रत्यक्षनियामकराज रू
स्वत्वाभाववान्पुरुष इति विशेष्यकतावच्छेदकप्रकारकनिर्णयसंभवेन एकविशिष्टेऽपरवैशिष्ट्यमिति रीत्या प्रत्यक्षापत्तिसंभवेन शाब्द
सामग्र्याः प्रतिबंधकताधिक्यमिति॥ नवीनमते तु राजस्वत्ववान्पुरुष इति शाब्दधीस्तत्सामग्री राजस्वत्वाभाववान्पुरुष इति बाधनिर्णयाभाव
घटितत्वेन राजस्वत्वाभाववान्पुरुषः सुन्दर इत्याकारकप्रत्यक्षजनकराजस्वत्वाभाववान् इति विशेष्यतावच्छेदकप्रकारकनिर्णयरूपकार
णाभावादेव प्रत्यक्षापत्तेरसंभवेन शाब्दसामग्रीप्रतिबन्धकतानकल्प्यत इति लाघवमिति भावः। न च स्वत्वादेः प्रकारतामतेऽपीति। नवीनमतेऽ

न च स्वत्वादेः प्रकारतामतेऽपि स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टपुरुषादिवैशिष्ट्यबोधे तथा
विधसामग्र्याः प्रतिबंधकताधिक्येन गौरवम्। तत्संसर्गतामते॥

पीत्यर्थः। स्वत्वादिसंबन्धावच्छिन्नप्रतियोगिताकराजाद्यभावविशि
ष्टपुरुषादिवैशिष्ट्यबोधे राजाभाववान्पुरुषः सुन्दर इति प्रत्यक्ष इत्यर्थः। तथाविधसामग्र्याः। राजस्वत्वाभाववानिति शाब्दनियामकराजः पुरुष इत्या
दिसामग्र्याः। प्रतिबंधकताधिक्येन गौरवमिति। नवीनमते राजाभाववान्पुरुष इति विशेष्यतावच्छेदकप्रकारकनिर्णयघटितायाः राजाभाववान्
पुरुषः सुन्दर इति प्रत्यक्षसामग्र्याः राजस्वत्वाभाववान्पुरुषः सुन्दर इति प्रत्यक्षसामग्र्या राजस्वत्वाभाववान्पुरुष इति बाधाभावघटितायाः राज
स्वत्ववान्पुरुष इति शाब्दसामग्र्याश्चायुगपत्संभवेन प्रत्यक्षापत्तिसंभवेनेदृशप्रत्यक्ष एतादृशशाब्दसामग्रीप्रतिबंधकताकल्पनगौरवमधिक राम ५०
मित्यर्थः। स्वत्वसंसर्गतावादी प्राचीनमते शाब्दसामग्रीन प्रत्यक्षप्रतिबंधिका इत्युपपादयति। तत्संसर्गतामते इत्यादिना। स्वत्वसंसर्गतावादिप्राचांम

तादृशसामग्र्याः। राजप्रकारकस्वत्वसंसर्गकपुरुषविशेष्यकशाब्दसामग्र्याः। राज्ञः पुरुष इत्याकारिकायाः। स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिता कराजाद्यभाववत्तानिश्चयाभावघटिततयातत्सत्त्वे॥ स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभाववत्तानिश्चयाभावसत्त्वे। कारणविरहादेवतथाविधप्रत्यक्षस्य वारणसम्भवादितिवाच्यमिति। स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभाववत्तानिश्चयरूपस्य विशेष्यतावच्छेदकप्रकारकनिर्णयस्य राजाभाववान्पुरुषः सुन्दर इति प्रत्यक्षकारणस्य विरहादेव॥ प्रत्यक्षवारणसम्भवात्॥ एकविशिष्टेऽपरवैशिष्ट्यरीत्या राजाभाववान्पुरुषः सुन्दर इति प्रत्यक्षवारणसम्भवादित्यर्थः। उक्तप्रत्यक्षसामग्र्युक्तशाब्दबोधसामग्र्योर्यौगपद्यसम्भवात्

तादृशसामग्र्याः स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभाववत्तानिश्चयाभावघटिततयातत्सत्त्वे कारणविरहादेवतथाविधप्रत्यक्षस्य वारणसम्भवादितिवाच्यम्। मन्मते तादृशप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबंधकताधिक्येऽपि।

प्राचीनमतेन प्रत्यक्षं प्रति शाब्दसामग्री प्रतिबंधिकेति भावः॥ अथ नवीनः स्वत्वप्रकारतावादी ईदृशप्रत्यक्षं प्रति ईदृशशाब्दसामग्रीप्रतिबंधकताधिकामङ्गीकृत्य प्रकारान्तरेण लाघवमुपपाद्य साम्यमुपपादयति॥ मन्मते तादृशप्रत्यक्षं प्रति तथाविधसामग्र्याः प्रतिबंधकताधिक्येपीति मन्मते॥ स्वत्वप्रकारतावादिनव्यमते। तादृशप्रत्यक्षं प्रति॥ स्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववान् पुरुषः सुन्दर इति प्रत्यक्षं प्रति। तथाविधसामग्र्याः॥ राजस्वत्ववानितिशाब्दबोधनियामकराज्ञः पुरुष इति सामग्र्याः। नवीनमते प्रतिबंधकताधिक्येपीत्यर्थः॥ राजाभावराजसत्त्वयोर्यौगपद्यमसंभवेन प्रत्यक्षशाब्दसामग्र्योर्मेलनसम्भवादनुभवसिद्धशाब्दसामग्रीप्रत्यक्षं प्रति प्रतिबन्धिकेति भावः॥ ६ ॥ ७ ॥

निरूपितत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टस्वत्वादिवैशिष्ट्यबोधे तथाविधसामग्र्याः प्रतिबन्धकत्वाकल्पनेन तदंशे साम्यादिति ।। निरूपितत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाद्यभावविशिष्टं स्वत्वं प्रमेयमस्मिन् बोधे स्वत्वं राजाभाववदिति विशेष्यतावच्छेदकप्रकारकनिर्णयः कारणं विशेष्यं स्वत्वं विशेष्यतावच्छेदको राजाद्यभावः तद्विशिष्टे प्रमेयत्ववैशिष्ट्यं भासते। तथाविधसामग्र्याः। षष्ठ्यन्तराजपदसमभिव्याहृतपुरुषपदजन्योपस्थितियोग्यताज्ञानादिरूपशाब्दसामग्र्याः ।। बाधाभावघटितायाः प्रतिबन्धकत्वाकल्पनेन तदंशे साम्यादित्यर्थः। नवीनमते राज्ञः पुरुष इत्यत्र राजवत्स्वत्ववान्पुरुषः इति शाब्दबोधः। तस्य शाब्दबोधस्य स्वत्वं राजाभाववदिति बाधः राजाभाववत्स्वत्वमित्याकारकबाध एव च। राजाभाववत्स्वत्वं प्रमेयमिति विशिष्टवैशिष्ट्यप्रत्यक्षसामग्री। तथा च राजवत्स्वत्ववान्पुरुष इति शाब्दबोधसामग्री। राजाभाववत्स्वत्वमित्याकारकबाधाभावघटिता इति शाब्दसामग्रीकाले राजाभाववत्स्वत्वमित्याकारकशाब्दबोधरूपराजाभाववत्स्वत्वं प्रमेयमित्याकारकप्रत्यक्षकारणाभावादेव न तत्प्रत्यक्षमिति न शाब्दसामग्री नवीनमते प्रत्यक्षप्रतिबंधिका इति भावः। तदंशे साम्यादिति। यथा स्वत्वप्रकारतावादिनवीनमते। राजाभाववान्पुरुषः सुंदरः इति प्रत्यक्षे शाब्दसामग्रीप्रतिबंधिका तथा स्वत्वसंसर्गतावादिप्राचीनमतेपि राजाभाववत्स्वत्वं प्रमेयमिति प्रत्यक्षे शाब्दसामग्रीप्रतिबन्धकताधिका इति तदंशे राजाभाववान्पुरुषः सुन्दर इति प्रत्यक्षे प्राचीनमते शाब्दसामग्रीप्रतिबन्धकताधिकांशेन नवीनमतस्य साम्यात् इति प्रतिबंदिरूपमुत्तरमित्यर्थः ।।

निरूपितत्वादिसंबंधावच्छिन्नराजाद्यभावविशिष्टस्वत्वादिवैशिष्ट्यबोधे तथाविधसामग्र्याः प्रतिबंधकताऽकल्पनेन तदंशे साम्यात्

प्रतिबंधात्अनुत्तरत्वादाह। तथाच पूर्वोक्तराजस्वत्वाभाववान्पुरुषः सुन्दर इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षंप्रतिराज्ञः पुरुष इत्यादिशाब्दसाम
ग्र्याः प्रतिबन्धकत्वकल्पनंसंसर्गतावादिमतेऽधिकमितीति। तथाचोभयमतसाम्येसतीत्यर्थः। प्राचीनमतेराज्ञः पुरुष इत्यादितः राजस्वान्पुरु
ष इति बोधस्तस्य च बाधो राजाभाववान्पुरुष इति। एतद्बाधाभावघटिता शाब्दसामग्री। अथच राजस्वत्वाभाववान्पुरुषः सुन्दरः इति विशिष्टवैशि
ष्ट्यप्रत्यक्षं तत्सामग्री राजस्वत्वाभाववान्पुरुष इति विशेष्यतावच्छेदकप्रकारकनिर्णयघटिता तथाच प्रत्यक्षसामग्री शाब्दसामग्र्योः यौगप
द्यसंभवात् शाब्दबोधसामग्री प्रत्यक्षंप्रतिप्रतिबंधिका कल्प्यते इति संसर्गतावादी प्राचीनमते शाब्दसामग्रीप्रतिबन्धकताधिका प्रयुक्तगौ

तथाच पूर्वोक्तराजस्वत्वाभाववान्पुरुषः सुन्दर इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षंप्रतिराज्ञः पुरुष इत्यादिसामग्र्याः प्रतिबन्धकत्वकल्पनं संसर्गतावादिनां मतेऽधिकमिति।

((एवमिति स्वत्वप्रकारतावादिनवीनमते तु राज्ञः पुरुष इत्यादितः रा
जस्वत्ववान्पुरुष इति बोधस्तस्य बाधो द्विविधः एको राजाभाववत्स्वत्वमित्याकारको द्वितीयस्तु राजस्वत्वाभाववान्पुरुष इत्याकारकस्तत्राद्ये
मतद्वये साम्यमुक्तं द्वितीये शाब्दसामग्र्याः प्रत्यक्षंप्रति प्रतिबन्धकता न कल्प्यते। तथाहि राज्ञः पुरुष इत्यादितः राजस्वत्ववान्पुरुष इति
शाब्दबोधः तस्य बाधो राजस्वत्वाभाववान्पुरुष इत्याकारकः स एव च विशेष्यतावच्छेदकप्रकारकनिश्चयरूप तया राजस्वत्वाभाववान्पुरुषः
सुन्दर इति प्रत्यक्षे कारणं शाब्दबोधसामग्री च राजस्वत्वाभाववान्पुरुष इति यो बाधः तदभावघटिता तथाच बाधतदभावयोर्यौगपद्यासंभवा
त्तथा शाब्दबोधसामग्रीकाले प्रत्यक्षसामग्र्यभावादेव न प्रत्यक्षोत्पत्तिसंभव इति नवीनमते शाब्दसामग्र्याः प्रत्यक्षंप्रति ॥ ६ ॥ ६ ॥

प्रतिबन्धकतानकल्पनीया प्राचीनेन तु शाब्दसामग्र्याः प्रतिबन्धकताधिका कल्पनीयेति पूर्वोक्तदोषो दुरुद्धर एवेति भावः। यस्मिन् धर्मिणि यो धर्मः विद्यते तस्मिन्धर्मिणि तदभावो बाधः तज्ज्ञानप्रतिबन्धकः प्रकृते च यत्र यो धर्मो भासते तत्र धर्मिणि तद्धर्माभावनिश्चयो बाधो ग्राह्यः। संसर्गतावादी प्राचीनः नव्यमते पुनः शंकान्तरेण शंकते॥ नच स्वत्वादेः प्रकारतामते घटप्रत्यक्षादिकं प्रतीत्यादिना॥ तादृशसामग्रीप्रतिबन्धकतायाम्। राज्ञः पुरुष इत्यादिवाक्यघटितयोग्यताज्ञानाकाङ्क्षापदार्थोपस्थित्यादिशाब्दसामग्र्यां निष्ठायां घटादिभिन्नविषयकप्रत्यक्षादिनिष्ठप्रतिबध्यतानिरूपितप्रतिबन्धकतायामित्यर्थः॥ विभक्तिजन्यस्वत्वाद्युपस्थितिनिवेशाधिक्येन॥ स्वत्व

नच स्वत्वादेः प्रकारतामते घटप्रत्यक्षादिकं प्रति तादृशसामग्रीप्रतिबन्धकतायां विभक्तिजन्यस्वत्वाद्युपस्थितिनिवेशाधिक्येन राजस्वत्वाभाववान्पुरुष इत्यादिबाधाद्यभावनिवेशाधिक्येन च गौरवम्।

संसर्गतामते विभक्तिः साधुत्वार्थिका तात्पर्यग्राहिका वा न स्वत्वाद्यर्थिकेति। नवीनमते स्वत्वाद्युपस्थितिनिवेशाधिक्येनेत्यर्थः। राजस्वत्वाभाववान्पुरुषः इत्यादिबाधाभावनिवेशाधिक्येन च गौरवमिति। प्राचीनमते राजवान् पुरुष इति शाब्दबोधः तद्बाधोपि राजाभाववान् पुरुष इति। तदभावोपि अल्पपदार्थघटितो राजाभावाभाववान् पुरुष इत्याकारकः। नवीनमते स्वत्वं षष्ठ्यर्थ इति राजस्वत्ववान् पुरुष इति शाब्दधीः। तद्बाधो राजस्वत्वाभाववान् पुरुष इति तद्बाधोपि राजस्वत्वाभावाभाववान्पुरुष इत्याकारको बहुपदार्थघटित इति बाधाभावगौरवमित्यर्थः॥

एतन्मतेताद्दशोपस्थितितथाविधबाधाभावादीनांतथाविधवाक्यजन्यशाब्दबोधंप्रसहेतुतयाताद्दशवाक्यघटितसामग्रीप्रतिबन्धकतायांतेषाम
निवेशादितिवाच्यमिति। एतन्मते। स्वत्वसंसर्गतामते। ताद्दशोपस्थितिः। विभक्तिजन्यस्वत्वाद्युपस्थितिः। तथाविधबाधाभावादीनां। राज
स्वत्वाभाववान्पुरुषइत्यादिकोवाबहुपदार्थघटितोबाधस्तदभावादीनांगुरुभूतानामित्यर्थः। प्राचीनमतेतुषष्ठ्यानस्वत्वमर्थइतिनस्वत्व
निवेशः। राजाभाववान्पुरुषइतिबाधाभावनिवेशान्नगुरुभूतबाधाभावोपीतिलाघवमितिभावः। तथाविधवाक्यजन्यशाब्दबोधंप्रसहेतु
तया। राज्ञःपुरुषइतिवाक्यजन्यप्राचीनमतसिद्धराजवान्पुरुषइत्याकारकशाब्दबोधंप्रतिषष्ठीजन्यस्वत्वोपस्थितिराजस्वत्वाभाववान्
पुरुषइत्याकारकगुरुभूतबाधाभावादीनांचाहेतुतया। ताद्दशवाक्यघटितसामग्रीप्रतिबन्धकतायां। राज्ञःपुरुषइतिवाक्यघटिताकांक्षायो

**अस्मन्मतेताद्दशोपस्थितितथाविधबाधाभावादीनांतथाविधवाक्यजन्यशाब्दबोधंप्रसहेतुतयाताद्दशवा
क्यघटितसामग्रीप्रतिबन्धकतायांतेषामनिवेशादितिवाच्यम्।** ((ग्यताज्ञानराजाभाववान्पुरुषइतिबाधाभावघटितसाम
ग्रीनिष्ठायांप्रतिबन्धकतायां। तेषांषष्ठीजन्यस्वत्वोपस्थितियोग्यताज्ञानराजस्वत्वाभाववान्पुरुषइतिबाधाभावादीनामनिवेशात्। किंतुलघुभूतानांरा
ज्ञःपुरुषइतिवाक्यघटकराजपदपुरुषपदतज्जन्योपस्थितिराजाभाववान्पुरुषइतिबाधाभावादीनांनिवेशादितिभावः। अथस्वत्वप्रकारतावादी
नवीनःसंसर्गतावादीप्राचीनोपन्यस्तंघटप्रत्यक्षनिष्ठप्रतिबध्यतानिरूपितराज्ञःपुरुषइत्यादिवाक्यघटिताकांक्षायोग्यताज्ञानपदार्थोपस्थित्या
दिशाब्दसामग्रीनिष्ठप्रतिबंधकतायांषष्ठीविभक्तिजन्यस्वत्वाद्युपस्थितिनिवेशाधिक्यप्रयुक्तंगौरवमुररीकुर्वाणोराजस्वत्वाभाववान्पुरुषइत्यादि

भवन्मतेपीत्यादिना। भवन्मतेपि। स्वत्वसंसर्गतावादिमतेपि। तद्वत्ताज्ञानेतदभाववत्ताज्ञानं प्रतिबन्धकं एवंतद्वत्ताज्ञानेतदभावव्याप्यवत्ताज्ञानं
चप्रतिबंधकमिति। प्राचीनमतेस्वत्वसम्बन्धेनराजवान्पुरुषइतिशाब्दबोधेस्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभाववान्पुरु
षइति ज्ञानंप्रतिबन्धक। एवंस्वत्वादिसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावव्याप्योराजस्वत्वाभाववत्त्वान्पुरुषइत्यादिनिश्चयः। त
दभावव्याप्यवत्तानिश्चयमुद्रया॥ राजाभावव्याप्यवत्तानिश्चयत्वेनमुद्रारीतिः प्रकृतेनिश्चयत्वरूपोधर्मइतियावत्। तादृशवाक्यजन्य
शाब्दधीविरोधितया। राज्ञःपुरुषइत्यादिवाक्यजन्यराजवान्पुरुषइत्याकारकशाब्दधीविरोधितया॥ तादृशनिश्चयाभावस्य। स्वत्वादिसम्ब

भवन्मतेपिस्वत्वसम्बन्धावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वत्वाभाववान्पुरुषइत्यादिनिश्चय
स्यतदभावव्याप्यवत्तानिश्चयमुद्रयातादृशवाक्यजन्यशाब्दधीविरोधितयातादृशनिश्चयाभावस्यतथाविध
सामग्रीप्रतिबंधकतायांनिवेशनस्याधिक्येनलाघवानवकाशात्।

न्धावच्छिन्नप्रतियोगिताकराजाभावव्याप्यराजस्वत्वाभाव
वान्पुरुषइत्याद्याकारकनिश्चयाभावस्य। तथाविधसामग्रीप्रतिबंधकतायां। राजवान्पुरुषइति शाब्दस्यसामग्रीराज्ञःपुरुषइतिवाक्यघटितयोग्य
ताज्ञानादिरूपातन्निष्ठाभिन्नविषयकघटप्रत्यक्षादिनिष्ठप्रतिबध्यतानिरूपितप्रतिबंधकतायां। निवेशनस्याधिक्येनलाघवानवकाशादिति। प्राची
नमतेराज्ञःपुरुषइत्यतोराजवान्पुरुषइतिबोधः तत्रराजाभाववान्पुरुषइतिनिश्चयोग्राह्याभावावगाहितयाप्रतिबन्धकः राजाभावव्याप्योरा
जस्वत्वाभाववत्त्वान्पुरुषइतिनिश्चयोपितदभावव्याप्यवत्ताज्ञानमुद्रयाप्रतिबन्धकः उभयोःप्रतिबंधकयोरभावः शाब्दसामग्रीनिविष्टघटप्रत्यक्षादि

प्रतिबंधकद्वयाभाववद्द्वयघटितशाब्दसामग्री प्रतिबंधिकेति प्राचीनमते लाघवानवकाशादित्यर्थः। नवीनमते लाघवमाह॥ मन्मत इत्यादिना। स्वत्वप्रकारतावादिनवीनमते। राजस्वत्ववान् पुरुष इति शाब्दबोधांगीकारेण राजस्वत्वाभाववान् पुरुषः इत्येकविधबाधस्यैव ग्राह्याभावावगाहितया प्रतिबंधकतया राजस्वत्वाभाववान् पुरुष इत्याद्येकविधबाधाभावविशिष्टशाब्दसामग्री घटप्रत्यक्षप्रतिबंधिका न तु प्रतिबंधकाभावद्वयनिवेश इति नवीनमते लाघवमिति भावः। राजस्वत्वाभाववान् पुरुष इत्यादिबाधाभावनिवेशेनैव। शाब्दसामग्रीप्रतिबंधकतायां निवेशेनैव। एवकारेण राजाभाववान् पुरुष इति बाधाभावनिवेशवारणम्। तादृशनिश्चयकाले। राजस्वत्वाभाववान् पुरुष इत्यादिबाधनिश्चयकाले

मन्मते राजस्वत्वाभाववानित्यादिबाधकाभावनिवेशेनैव तादृशनिश्चयकाले प्रत्यक्षाभ्युपपत्तेस्तदभावानिवेशात्। यत्तु राज्ञः पुरुष इत्यादौ राजस्वत्ववान् पुरुष इत्याद्यन्वयबोधोपगमे राजकीयं स्वत्वं राजस्वत्ववान् पुरुष इत्याकारकद्विविधानुमितेरेव तदतिरिक्ताविषयकत्वेन तादृशानुमितिं प्रति प्रत्येकं तादृशवाक्यघटितसामग्र्याः प्रतिबन्धकत्व

प्रत्यक्षाभ्युपपत्तेः। भिन्नविषयकघटादिप्रत्यक्षाद्युपपत्तेः। बाधनिश्चयकाले बाधाभावविशिष्टशाब्दसामग्री नास्तीति न शाब्दबोधः शाब्दसामग्रीरूपप्रतिबंधकस्याभावाच्च घटप्रत्यक्षोपपत्तिरिति भावः। तदभावानिवेशादिति। शाब्दसामग्र्या ग्राह्याभावावगाहितया राजस्वत्वाभाववान् पुरुष इत्यादिबाधाभावनिवेशेपि तदभावव्याप्यवत्ताबुद्ध्या प्राचीनमत इव नवीनमते राजाभावव्याप्य राजस्वत्वाभाववान् पुरुष इत्यादिबाधाभावानिवेशादित्यर्थः। यत्त्विति। राज्ञः पुरुष इत्यादौ राजस्वत्ववान् पुरुष इत्याद्यन्वयबोधोपगमे राजकीयं स्वत्वं राजवत्स्व ॥

त्वमिति। स्वत्वोद्देश्यकाराजविधेयिकानुमितिरेका एवं राजवत्स्वत्ववान्पुरुषइतिराजवत्स्वत्वविधेयिकापुरुषोद्देश्यकानुमितिर्द्वितीया इति द्विविधानुमितेरेवतदतिरिक्ताविषयकत्वेनराजस्वत्ववान्पुरुषइतिशाब्दबोधविषयातिरिक्तविषयकत्वेनसमानविषयकत्वेनानुमितेर्दुर्बल तयाराजकीयंस्वत्वंराजस्वत्ववान्पुरुषः इत्याकारकद्विविधानुमितिंप्रतिप्रत्येकंएकामेकामनुमितिंप्रति तादृशवाक्यघटितसामग्र्याः राज्ञः पुरुषइतिवाक्यघटितयोग्यताज्ञानबाधाभावादिसामग्र्याः। प्रतिबन्धकताद्वयम्। प्रतिबध्यभेदेनप्रतिबध्यताद्वयनिरूपितप्रतिबन्धकताद्वयमित्यर्थः। अस्मन्नयेच। स्वत्वसंसर्गतावादीप्राचीनमतेच॥ तादृशानुमित्योः॥ राजकीयंस्वत्वंराजस्वत्ववान्पुरुषइत्यनुमित्योः। तथाविधवाक्यजन्याद्राजकीयःपुरुषइत्यादिशाब्दबोधातिरिक्तविषयकतया। राज्ञःपुरुषइतिवाक्यजन्यात् राजवान्पुरुषइतिशाब्दबोधात् अतिरिक्त

अस्मन्मतेचतादृशानुमित्योस्तथाविधवाक्यजन्याद्राजकीयःपुरुषइत्येतादृशबोधादतिरिक्तविषयकतयातत्रतादृशसामग्र्याः प्रतिबन्धकत्वकल्पनंनास्ति॥

विषयकतयाशाब्दबोधेराजापुरुषश्चद्वौविषयौराजकीयस्वत्वंराजवान्पुरुषइत्यनुमित्योराजापुरुषश्चविषयौस्वत्वंचाधिकंविषयइत्यनुमित्योरधिकविषयतयाभिन्नविषयेअनुमितिसामग्र्याः प्रबलत्वेनानुमितिरेवजायत इति। तत्र। राजकीयंस्वत्वंराजस्वत्ववानित्यनुमितौ। तादृशसामग्र्याः। राजवान्पुरुषइति शाब्दजनकराज्ञःपुरुषइतिवाक्यघटितयोग्यताज्ञानादिसामग्र्याः। प्राचीनमते प्रतिबन्धकत्वकल्पनंनास्ति। नवीनानांतुराजस्वत्ववान्पुरुषइति शाब्दविषयराजस्वत्वपुरुषविषयकत्वेनराजवत्स्वत्वंराजस्वत्ववान्पुरुषः इत्यनुमित्योः समानविषयकतयादुर्बलत्वेनशाब्दसामग्रीप्रतिबन्धकताकल्पनमधिकमितिभावः॥

ननुप्राचीनमतेपिराजपुरुषोसंसर्गतयास्वत्वंचविषयाः इत्युक्तानुमित्योः समानविषयकतयाशाब्दसामग्रीप्रतिबध्यत्वमस्तुणमेवेति चेन्न। शा
ब्दबोधे राजापुरुषः संसर्गतयास्वत्वंविषयाः अनुमित्योस्तुराजापुरुषोस्वत्वंस्वत्वसंसर्गश्चाधिकइत्यतिरिक्तविषयकत्वेनानुमित्योः प्राची
नमते शाब्दसामग्र्या प्रतिबध्यत्वेनलाघवादितिभावः यद्वाविषयपदेनात्रप्रकारविशेष्यावेवगृह्येतेनसंसर्गोपीतिनदोषः। तथाविधानुमि
तितथाविधशाब्दसामग्र्योः सत्वोरनुमितेरेवोत्पत्तेरिति। राजकीयंस्वत्वंराजस्वत्ववान्पुरुषइत्यनुमित्योः सामग्रीसत्वेराजवान्पुरुषइतिशा
ब्दसामग्रीसत्वेचअनुभवबलादनुमितेरेवोत्पत्तेर्नानुमितिंप्रति शाब्दसामग्रीप्रतिबन्धिकेति प्राचीनमतेलाघवमितिभावः। यद्यप्यत्रराजव

तथाविधानुमितितथाविधशाब्दसामग्र्योश्चसत्वोरनुमितेरेवोत्पत्तेः अपितुराजकीयःपुरुषइत्याकारकस्वत्वसंसर्ग
कैकविधानुमितिंप्रत्येवतादृशसामग्र्याः प्रतिबन्धकत्वमेकंकल्पनीयमितिलाघवमिति। तदप्यकिञ्चित्करम् भवन्म
((तेयत्रयादृशानुमितिःस्वीक्रियते।

स्वत्वंराजस्वत्ववान्पुरुषइति अनुमितिरेवानुभवसिद्धातदानुमितिसामग्र्योः शाब्दंप्रतिप्रतिबंधक ((
इतिप्रतिबंधकभेदात्प्रतिबध्यप्रतिबन्धकभावद्वयंतथापिराजवान्पुरुषइतिशाब्दंप्रतिशाब्दविषयभिन्नविषयकानुमितिसामग्रीत्वेन
सामग्र्योरेकमेवप्रतिबंधकत्वमितिध्येयम्। अपितुराजवान्पुरुषइत्याकारकस्वत्वसंसर्गैकविधानुमितिंप्रत्येवतादृशसामग्र्याः रा
जवान्पुरुषइतिशाब्दजनकराज्ञः पुरुषइतिवाक्यघटितयोग्यताज्ञानादिसामग्र्याः प्रतिबन्धकत्वमेकंकल्पनीयमितिप्राचीनमतेलाघवमि
तिभावः। स्वत्वप्रकारतावादीनवीनः प्रतिबन्ध्यास्वमतंव्यवस्थापयति। भवन्मतइत्यादिना। भवन्मतेस्वत्वसंसर्गतावादिप्राचीनमते। यत्रयादृशा

मु·टी असम्मन्मतेपि। स्वत्वप्रकारतावादिनवीनमतेपि। तत्रतादृशानुमितेः। स्वीकरणीयतया। यत्रराज्ञःपुरुषइतिसामग्रीकालेप्राचायादृशीराजवत्स्व
५५ त्वंराजवत्स्वत्ववान्पुरुषइत्याकारकानुमितिःस्वीक्रियतेनवीनेनापिस्वीक्रियतेइतिनव्यमतेपि अनुमितिंप्रतिनशाब्दसामग्रीप्रतिबंधिकेति
मतद्वयेपिसाम्यमित्यर्थः। स्वत्वसंसर्गकराजवान्पुरुषइतिसमानविषयकानुमितिम्प्रतियथाप्राचीनमतेराज्ञःपुरुषइतिवाक्यघटितस्वत्व
संसर्गकराजप्रकारकयोग्यताज्ञानादिशाब्दसामग्रीप्रतिबन्धिकातथानवीनमतेपिराजवान्पुरुषइतिभिन्नविषयकानुमितिंप्रत्यपिस्व
त्वप्रकारकशाब्दजनकराज्ञःपुरुषइतिवाक्यघटितस्वत्वप्रकारकयोग्यताज्ञानादिरूपशाब्दसामग्रीमणिमंत्रादिन्यायेनप्रतिबंधिकाइतिय

अस्मन्मतेपितत्रतादृशानुमितेःस्वीकरणीयतयानुमितौशाब्दसामग्र्याःप्रतिबन्धकत्वसाम्यात्। उपदर्शितस्थलेभवद्भि
रनुमितिःस्वीक्रियतेअस्माभिरपिस्वीक्रियतेकुतःप्रतिबन्धकताद्वयकल्पनमिति।

((त्रप्राचीनेनत्वयाऽनुमितिर्नस्वीक्रियतेतत्र
नवीनेनमयाप्यनुमितिर्नस्वीक्रियतेइत्यनुमितौशाब्दसामग्र्याःप्रतिबन्धकतासाम्यादित्यर्थः॥राजवत्स्वत्वंराजस्वत्ववान्पुरुषइत्यनुमिति
द्वयमुभयमतेपिजायतेइत्युभयमतेपिनशाब्दसामग्रीप्रतिबन्धिकेतिसाम्यम्। इदमुपलक्षणंयत्रनस्वीक्रियतेऽनुमितिःप्राचातत्रनव्येना
पिनस्वीक्रियतेइत्यस्वीकारेपिसाम्यमित्यर्थः। यत्रयादृशंतत्रतादृशसामान्यपदैरुक्तमर्थंस्पष्टयति। उपदर्शितइत्यादिना। राजवत्स्वत्वंराजस्व
त्ववान्पुरुषइत्यनुमितिद्वयंभवद्भिःप्राचीनैःस्वीक्रियतेतदनुमितिद्वयमस्माभिर्नवीनैःस्वीक्रियतेइतिकुतोहेतोरनुमितिद्वयनिष्ठप्रतिबध्य
तानिरूपितशाब्दसामग्रीनिष्ठप्रतिबन्धकताद्वयंसंभवेत्। उक्तानुमितिद्वयास्वीकारेएवहिशाब्दसामग्र्यांप्रतिबन्धकताद्वयापादकोऽनुमितिद्वया राम ५४

स्वीकारेतत्कारणाभावादेवप्रतिबंधकताद्वयापादनं
खपुष्पवदितिभावः।

ननु प्राचीनमते भिन्नविषयकतयानुमितिसामग्र्याः प्राबल्यमित्यनुमितिरेव न शाब्दबोध इति शाब्दसामग्र्याः अनुमितिप्रतिबंधकत्वं नास्तीति
लाघवम्। नवीनमते तु समानविषयकतयानुमितिसामग्री दुर्बलेति अनुमितिर्न भवतीत्यनुमितिं प्रति शाब्दसामग्र्याः प्रतिबन्धकत्वं कल्प
नीयमिति गौरवमित्यत आह॥ भवतापि तादृशशाब्दं प्रतीति॥ प्राचीनेनापि तादृशशाब्दं प्रति राजवान्पुरुष इति शाब्दं प्रति। राजकीयं स्वत्वं रा
जस्वत्ववान्पुरुष इत्यनुमितिद्वयसामग्रीद्वयस्य प्रतिबन्धकताया वाच्यतया साम्याच्चेति। प्राचीनमते शाब्दबोधो न जायत इति शाब्दं प्रत्यनु
मितिद्वयसामग्रीद्वयं यया प्रतिबंधकं तया नवीनमतेप्यनुमितिर्न जायत इति अनुमितिद्वयं प्रति शाब्दसामग्री प्रतिबंधिकेति मतद्वये साम्यमि

भवतापि तादृशशाब्दं प्रति तादृशानुमितिद्वयसामग्रीद्वयस्य प्रतिबन्धकताया वाच्यतया साम्याच्च। एवं राजपुरुष इत्यादिसमा
सवाक्यात्स्वत्वसंसर्गकशाब्दबोधस्वीकारे तादृशशाब्दबोधसामग्र्याः स्वत्वसंसर्गेण राजविशिष्टपुरुषतात्पर्यज्ञानादि
घटिताया भिन्नविषयकप्रत्यक्षादिकं प्रति प्रतिबन्धकत्वाधिक्येन गौरवात्। तत्र राजसंबंधिप्रकारकाभेदान्वयबोधस्वीका
((कार एवोचितः

त्यर्थः। अत्रैतच्छाब्दं प्रति द्विविधानुमितिसामग्र्योरेतच्छाब्दबोधविषयभिन्नविषयकानुमितिसामग्रीत्वेनैका प्रति
बन्धकता प्राचीनमते एवं राजवान्पुरुष इति अनुमितिं प्रति राजवान्पुरुष इति शाब्दसामग्रीत्वेन प्रतिबंधकता एका प्राचीनमते बोध्या अ
थ नवीनो भूयः प्राचीनमतं दूषयति। एवं राजपुरुष इत्यादिसमासवाक्यादि त्यादिना। तादृशशाब्दसामग्र्याः। स्वत्वसंसर्गकराजप्रकारकपु
रुषविशेष्यकशाब्दबोधजनकराजपदाव्यवहितोत्तरपुरुषपदज्ञानजन्योपस्थित्यादिघटितसामग्र्याः तयाविधतात्पर्यज्ञानादिघटितायाप

रविषयकप्रत्यक्षादिप्रतिबंधकताधिक्येन गौरवाद्
तो: तत्र राजपुरुष इति समासे।

सु॰ टी॰ राजसम्बन्धिनोऽभेदान्वयबोध उचितः। नच भवन्मतेपि। राजसम्बन्ध्यभेदान्वयवादिनव्यमतेपि। राजसम्बन्ध्यभेदान्वयबोधसामग्र्याः प्रतिब
५६ न्धकत्वाधिक्येन गौरवं समानमिति वाच्यम्। राजपदस्य राजसम्बन्धिनि। स्वारसिकलक्षणाग्रहकाले अभेदसंबंधे न राजसम्बन्धिविशि
ष्टपुरुषे तात्पर्यग्रहसत्वे भवन्मतेपि। स्वत्वसंसर्गतावादिप्राचीनमतेपि। कर्मधारयत्वेनाभिधानात्। राजपुरुष इत्यादिकाल्। तथाविध
समासवाक्यात्तादृशबोधस्वीकारस्य। राजसम्बन्ध्यभेदबोधस्वीकारस्य। आवश्यकतया तादृशसामग्रीप्रतिबन्धकतायाम्। अभेदस
म्बन्धेन राजसम्बन्धिप्रकारकपुरुषविशेष्यकशाब्दबोधजनकराजपुरुष इति समासवाक्यघटितयोग्यताज्ञानादिसामग्रीप्रतिबंधकतया

नच भवन्मतेपि तादृशाभेदान्वयबोधसामग्र्याः प्रतिबंधकताधिक्येन गौरवमिति वाच्यम्। राजपदस्य राजसंबन्धिनि स्वा
रसिकलक्षणाग्रहदशायाम् अभेदसम्बन्धेन राजसम्बन्धिविशिष्टपुरुषे तात्पर्यग्रहसत्वे भवन्मतेपि कर्मधारयत्वेनाभि
मतात्तथाविधसमासवाक्यात्तादृश शाब्दबोधस्वीकारस्यावश्यकतया तादृशसामग्रीप्रतिबन्धकतायामुभयमतसिद्ध

नवीनप्राचीनोभयमतसिद्धत्वादित्यर्थः। राजपुरुषसमासे राजपदे राजसम्बन्धिनि लक्षणा नवीनमते निरूढा लक्षणा। स्वारसिकत्वे
च्छाधीना प्रयोजनवति लक्षणा तु प्राचीनमतेपि सम्भवतीति। अत्र राजपुरुष इत्यत्र प्राचीनमते विभक्त्यर्थस्वत्वादिसंसर्गकशाब्दबोधज
नकसमासत्वं तत्पुरुषत्वमिति लक्षणात्तत्पुरुषः। यदा तु राजपदस्य राजसम्बन्धिनि स्वारसिकलक्षणा तदा पदार्थद्वयाभेदबोधकस राम
मासत्वं कर्मधारयत्वमिति लक्षणात्कर्मधारयः समासः। नवीनमते यत्र वाक्यावस्थायां समासावस्थायां चाभेदबोधस्तत्र कर्मधारयो यथा नी ५६

नीलोऽसत्त्वमित्यत्रराज्ञःपुरुषइतिवाक्यावस्थायांराजसंबंधवान्पुरुषइतिभेदबोधःनिपातातिरिक्तनामार्थयोरभेदान्वयनियमबलाद्राजसंब
न्धिनिनिरूढलक्षणाग्रहेऽभेदबोधेऽपिनकर्मधारयःसंज्ञावाक्यदशायांभेदबोधजनकान्नवीनमतंदूषयितुं।यत्त्वित्यारभ्यतदसदित्यंतम
तमुपन्यस्यति।यत्त्विति।दधिपश्येत्यत्रलुप्तद्वितीयास्मरणेनकर्मत्वमुपस्थाप्यतेदधिनिष्ठकर्मतानिरूपकदर्शनाश्रयस्त्वमितिशाब्दधीरेव
राजपुरुषइत्यत्रलुप्तषष्ठीस्मरणेनसंबंधबोधः।तथाचराजनिरूपितस्वत्वाश्रयःपुरुषइतिबोधः।एवंसंबंधिनिनिरूढलक्षणास्वीकृत्याभेदा

यत्तुदधिपश्यइत्यादौलुप्तद्वितीयाविभक्तिस्मरणेनदधिकर्मकदर्शनबोधवद्राजपुरुषइत्यादावपिलुप्तषष्ठीविभक्तिस्मर
णेनराजसम्बन्धप्रकारकभेदान्वयबोधनिर्वाहेराजसम्बन्धिनिनिरूढलक्षणांस्वीकृत्याभेदान्वयबोधापगमोनिरर्थकःन
चषष्ठीतत्पुरुषादिस्थलेऽपिलुप्तविभक्तिस्मरणएवचेदन्वयबोधस्तदाऋद्धस्यराजमातंगाइत्यादिप्रयोगापत्तिः।तत्रमातं
गादौराजादीनामन्वयबोधोपपत्तयेराजादिपदोत्तरषष्ठ्यादिविभक्त्यनुसन्धानस्यावश्यकत्वेनसमानविभक्तिकत्व
याराजादौऋद्धादिपदार्थस्याभेदान्वयबोधसम्भवादितिवाच्यम्।यतस्तत्रऋद्धराजादीनामभेदान्वयबोधानुपपत्त्यानाभियुक्ता

न्वयांगीकारोऽव्यर्थः।शंकते।नचेति।ऋद्धस्यराजमातंगाइत्यापत्तिः।राजसम्बन्धवंतोमातंगाइतिअन्वयबोधार्थः।राजपदोत्तरषष्ठीस्मर
णमावश्यकमतःसमानविभक्तिकऋद्धराजपदाभ्यामभेदबोधःस्यादित्यर्थः।समाधत्ते।यतः।तत्र।ऋद्धस्यराजपुरुषइतिवाक्ये।ऋद्ध
राजादीनामभेदान्वयानुपपत्त्यानाभियुक्तानामप्रयोगइति।प्रामाणिकानांऋद्धस्यराजमातंगाइत्यस्याप्रयोगेऽभेदान्वयानुपपत्तिर्नकारणं॥

समानविभक्तिकऋद्धराजपदाभ्यांऋद्धस्यराज्ञोमातंगाइत्यत्रेवऋद्धस्यराजमातंगाइत्यत्रापियोग्यतयाभेदान्वयबोधस्तांनाम।अपितु
समासघटकपदसापेक्षतयाराजपदस्यासामर्थ्यातिदेशात्समासासाधुत्वेनेति।समर्थःपदविधिरितिसूत्रेणसमर्थानामेवपरस्पर
साकांक्षाणामेवसमासोविहितःसामर्थ्यंसमासेएकार्थीभावलक्षणमेकार्थीभावश्चविशिष्टैकार्थविशेष्यकबोधजनकत्वमिति
।नक्षधवखदिरौहित्रापंचषट्इत्यादावव्याप्तेः।किन्तुसमासाघटकपदनिराकांक्षत्वेसतिपरस्परसमासघटकपदसाकांक्षत्वंस
मर्थत्वंऋद्धस्यराजपुरुषइत्यत्रसमासघटकऋद्धपदसापेक्षतयाराजपदस्यासामर्थ्यातिदेशात्।सापेक्षमसमर्थंवद्भवतीत्यतिदे
शबलात्।तथाचऋद्धस्यराजपुरुषइत्यत्राभियुक्ताभ्युपगतसमासासाधुत्वनिर्वाहार्थोपात्तसमासघटकपदनिराकांक्षत्वरूपविशे

अपितुसमासाघटकपदसापेक्षतयाराजपदस्यासामर्थ्यातिदेशात्समासासाधुत्वेन।तत्सापेक्षत्वंचतदर्थान्वितस्वार्थपर त्वम्

षणवललभ्यंसमासासाधुत्वमिहातिदेशिकंगौणम्।अतिदेशोहिमुख्यव्यवहारः यथागौरश्वःपुरुषोहस्तीतिनिराकांक्षाणांनसमासोसाधु
त्वेयेहापिमुख्येव्यवहारइति।एवंचऋद्धस्यराजमातंगाइत्यस्याप्रयोगेसमासासाधुत्वमेवहेतुरित्यर्थः।तदुक्तंसविशेषणानांवृत्तिर्नवृ
त्तस्यविशेषणयोगोनेति।विशेषणसहितानांविशेषणानामेववृत्तिर्नलुप्तविशेषणानांविशेष्याणामपितेनसविशेषणानांमातंगानांराजरू
पविशेषणेनसहसमासउपपन्नःएवंवृत्तस्यविशेषणस्यविशेषणतायोगोनेत्यर्थः।ननुवृत्तस्यविशेषणस्यतेनसुंदरराजमातंगाइत्य
स्यसुन्दरविशेषणस्यमातंगेविशेष्येन्वयःसमासघटकेतदभिप्रायकमेव।सविशेषणस्यराजपदस्यविशेषणस्यतेनऋद्धराजमातंगाइत्यु

ऋद्धविशेषणयुक्तस्यविशेषणस्यसमासरूपावृत्तिर्न।एवंचतस्यसमस्तस्यराज्ञोविशेषणस्यऋद्धस्येतिविशेषणयोगोऽपिनेतितदर्थः। तत्सापेक्षत्वंतदर्थान्वितस्वार्थपरत्वंसमासघटकऋद्धपदार्थान्वितोयःस्वार्थोराजपदार्थस्तत्परत्वात्समर्थपदस्यतत्तदर्थान्वितस्वार्थपरंराजपदन्तत्वंराजपदेऽस्ति॥स्वार्थश्चस्वीयवृत्तिग्रहविशेष्यः।स्वंराजपदम्।तच्छक्तिग्रहोराजाराजपदशक्यइत्याकारकस्तद्विशेष्योराजा।तसदन्तदर्थान्वितःस्वार्थोराजपदार्थः।सचराजपदशक्तिग्रहविशेष्यइत्यर्थकरणादेव।शरैःशातितपत्रश्चैत्रस्यदासभार्येत्यादौनसमस्यमानशातितदासपदादेःसापेक्षतातदर्थैकदेशशातनदासत्वादावेवशरकरणकत्वनिरूपितत्वादीनामन्वयादितिमूलम्।तत्पदंसमासघटकं

स्वार्थश्चस्वीयवृत्तिग्रहविशेष्यः।अतएवशरैःशातितपत्रश्चैत्रस्यदासभार्येत्यादौनसमस्यमानशातितदासपदादेःसापेक्षता।तदर्थैकदेशशातनदासत्वादावेवशरकरणकत्वचैत्रनिरूपितत्वादीनामन्वयात्।तदर्थान्वितेस्वत्राभेदान्वयोवानिवेशनीयइति॥

तृतीयापदंतदर्थः।शरकरणकत्वम्।तदन्वितस्वार्थः।शातितपदशक्तिग्रहविशेष्यःशातनकर्मपत्रादिकंनभवतिकिन्तु शातितपदार्थैकदेशशातनक्रियैवभवति।शरकरणकत्ववतीयाशातनक्रियातत्कर्मपत्रंयस्येत्यर्थात्।एवञ्चैत्रस्यदासभार्येत्यत्रतत्पदंसमासाघटकपदंचैत्रस्येतिषष्ठीपदंतदर्थोनिरूपितत्वंतदन्वितःस्वार्थःदासपदशक्तिग्रहविशेष्योदासोनभवतिकिन्तुदासपदार्थैकदेशोदासत्वसेवारूपचैत्रनिरूपितत्ववद्दासत्वंतद्वतीभार्येत्यर्थात्तेननसमस्यमानशातितदासपदादेःसमासाघटकशरैरितिचैत्रस्येतिपदसापेक्षत्वंयेनासामर्थ्यात्समासोनस्यादित्यर्थः।तदर्थान्वितेस्वत्राभेदान्वयोवानिवेशनीयइतीति।तदर्थेसमासाघटकऋद्धपदार्थेऽभेदस

व्यु॰टी॰ तत्सत्त्वंराजपदेस्तीतिसमासाघटकपदसापेक्षतयाराजपदस्यासामर्थ्यात्समासोनस्यादित्यर्थः।शरैःशातितपत्रइत्यत्रसमासाघटक

५९ शरैरितिपदंतत्सदर्थःशरकरणकत्वंतत्रशरकरणकत्वेभेदेनान्वितःस्वार्थशातितपदार्थैकदेशःशातनंनशरकरणकत्वरूपं

भवतिकिंतुशरकरणकत्ववद्भवतीतिनसमासाघटकपदसापेक्षत्वेनासामर्थ्यात्समासोनस्यादित्यर्थः।एवंचैत्रस्यदासभार्येत्यत्रा

पिचैत्रनिरूपितत्वेदासस्याभेदोनास्तिकिन्तुचैत्रनिरूपितदासत्ववतीभार्येत्यर्थान्नदोषः।अस्मिन्पक्षेस्वार्थपदेनस्वीयवृत्तिग्रह

विशेष्योनग्राह्यःकिन्तुवृत्तिग्रहविषयोयथायथप्रकारोवाविशेष्योवाग्राह्यः।यत्त्वित्यादिनोक्तंमतंदूषयतिस्वारसिकलक्षणाग्रहस्य

त्त्वानुरोधेनतादृशसमभिव्याहारज्ञानादेः।राजपदाव्यवहितोत्तरपुरुषपदज्ञानादेः।।तथाविधबोधजनकतायाः।।राजसम्बन्धीपुरुष

तदसत्स्वारसिकलक्षणाग्रहस्थलानुरोधेनतादृशसमभिव्याहारज्ञानादेस्तथाविधबोधजनकतायाःक्लृप्तत्वात्तत्रनि

रूढलक्षणास्वीकारेगौरवाभावात्।नचस्वारसिकलक्षणाग्रहस्थलेतत्रतादृशान्वयबोधस्योभयवादिसिद्धत्वेपि॥ (इतिबोधज

नकतायाःक्लृप्तत्वात्।सिद्धत्वात्।तत्रराजपुरुषघटकराजपदे।निरूढलक्षणास्वीकारेगौरवाभावादिति।अत्रायंभावः।राजसंबंधीपुरुषइति

बोधेराजपुरुषइत्यानुपूर्वीविशेषरूपसमभिव्याहारज्ञानंकारणंतत्रचवृत्त्यापदजन्यापदार्थोपस्थितिःसहकारिणीवृत्तिश्चशक्तिःशक्यसंबंध

रूपालक्षणाचतत्रशक्तिलक्षणान्यतररूपवृत्तिज्ञानस्यपदार्थोपस्थितिद्वाराशाब्दबोधंप्रतिकारणतायांलक्षणानिष्ठस्वारसिकत्वनिरूढत्वज्ञानमपि

कारणंभवतियेनगौरवंभवेदितिस्वारसिकत्वनिरूढत्वाविशिष्टलक्षणाज्ञानंकारणमितिशंकते।नचेति।स्वारसिकलक्षणाग्रहस्थलेतादृशा राम ५८

न्वयबोधस्य।राजसंबंधीपुरुषइत्यन्वयबोधस्यानवीनप्राचीनोभयमतसिद्धत्वेपि॥

निरूढलक्षणामते॥ निरूढलक्षणावादिनवीनमते॥ सम्बन्धितातात्पर्यस्य। राजपदस्य राजसम्बन्धिबोधेतात्पर्यस्य। अनादित्वकल्पनागौरवमिति॥ स्वरसवतुः स्वरसः इच्छा तदधीनालक्षणास्वारसिकीलक्षणाएवं अनादितात्पर्यवस्तुरिच्छातद्विषयीभूतोर्थोराजसम्बन्धीतन्निष्ठाशक्यसम्बन्धरूपालक्षणानिरूढलक्षणा॥ एवञ्चस्वारसिकनिरूढयोर्लक्षणयोः साम्येपिनिरूढलक्षणाघटकतात्पर्येअनादित्वंविशेषणमधिकमितिगौरवमित्यर्थः। तथाचराजपुरुषइत्यत्रलुप्तविभक्तिस्मरणेनराजस्वत्ववान्पुरुषइतिबोधः समुचितोनतुनिरूढलक्षणयाऽभेदसम्बन्धेनराजसम्बन्धीपुरुषइतिबोधइतिशंकाशयइति। समाधत्ते। राजपुरुषइत्यादिवाक्यजन्यशाब्दबोधात्पूर्वंनियमतो

निरूढलक्षणामतेसंबन्धितातात्पर्य्यस्यानादित्वकल्पनागौरवंअनादितात्पर्य्यविषयीभूतार्थनिष्ठलक्षणायाएवनिरूढलक्षणात्वादितिवाच्यम्। राजपुरुषइत्यादिवाक्यजन्यशाब्दबोधात्पूर्वंनियमतोलुप्तविभक्तिस्मरणकल्पनापेक्षयातात्पर्यस्यानादित्वकल्पनायांगौरवविरहादिति॥

॥ लुप्तविभक्तिस्मरणकल्पनापेक्षयातात्पर्यानादित्वकल्पनायाङ्गौरवविरहादिति॥ नियमतः तादृशशाब्दबोधकार्यात्पूर्वकालेकारणीभूतंलुप्तविभक्तिस्मरणंकल्पनीयम्। यदायदायंशाब्दबोधः तदातदात्पूर्वक्षणेलुप्तविभक्तिस्मरणमितिनियमतः अनन्ताविभक्तयः ङस् ओस् आम् रूपाराज्ञः राज्ञोः राज्ञांवापुरुषइतितात्पर्यवशाच्छाब्दबोधसंभवात्। नपुंसकात्स्वमोर्लुगितिसूत्रेणानन्ताः विभक्तिलोपाः तासामनन्तानिस्मरणानितेषांसम्बन्धोपस्थितिंप्रत्यनन्तानिकारणत्वानिकारणताशरीरंयावानन्यथासिद्धत्वव्याप्तिस्वरूपेनियमघटितत्वाच्चातिगुरुतत्वगौरवम्॥ नलुप्तविभक्तिस्मरणकल्पनाधीनमित्यभिप्रेत्योक्तंलुप्तवि

यति। तात्पर्यानादित्वकल्पनायां गौरवविरहादिति॥ तात्पर्यविषयीभूतार्थे शक्यसम्बन्धरूपलक्षणासिद्धेर्वा तात्पर्यपरमनादित्वरूपधर्ममात्र
कल्पनं नाधिकं। पूर्वमते लुप्तविभक्तिस्मरणाद्द्वयोर्धर्मिणोर्धर्मोऽपि कल्पनीयाइति धर्मिकल्पनातो धर्मकल्पना लघीयसीति न तात्पर्यानादि
त्वकल्पने गौरवमिति भावः। अनादित्वं च स्वज्ञानजन्यशाब्दबोधध्वंसकालीनस्वज्ञानजन्यशाब्दबोधसामान्यकत्वम्। स्वं तात्पर्यज्ञानजन्यो यः शाब्द
बोधः राजसम्बन्धीपुरुष इति शाब्दबोधः तद्ध्वंसकालीनस्वज्ञानजन्यं स्वतात्पर्यज्ञानजन्यं शाब्दबोधमात्रं यस्य स्वस्य तात्पर्यस्य तत् तात्पर्ये स्व
ज्ञानजन्यशाब्दबोधध्वंसकालीनस्वज्ञानजन्यशाब्दसामान्यकं तत्त्वं तात्पर्येऽस्तीत्यर्थः। अत्र तात्पर्ये चैत्रीयं मैत्रीयं विशिष्य न ग्राह्यं किन्तु तात्पर्यत्वे
न तात्पर्यमात्रं ग्राह्यम्। तथा च तात्पर्यज्ञानजन्यः सर्वोपि शाब्दबोधः पूर्वपूर्वतात्पर्यज्ञानजन्याये शाब्दबोधास्तद्ध्वंसकालीनो भवतीति सर्वम
पि तात्पर्यं स्वज्ञानजन्यं शाब्दबोधध्वंसकालीनस्वज्ञानजन्यशाब्दबोधसामान्यकं भवति। स्वारसिकलक्षणास्थले तु चैत्रीयप्राथमिकतात्पर्य
ज्ञानजन्यप्राथमिकः शाब्दबोधः चैत्रीयप्राथमिकतात्पर्यज्ञानजन्यशाब्दबोधः ध्वंसकालीनो न भवतीति क्रमे अनादित्वं नास्ति। निरूढल
क्षणास्थले तु सर्वेपि तात्पर्यज्ञानजन्याः शाब्दबोधाः पूर्वपूर्वतन तात्पर्यज्ञानजन्यशाब्दबोधध्वंसकालीनाः भवन्त्येवेति तात्पर्यस्यानादित्वमस्ति
अत्र प्राथमिकत्वं कस्मिन्नपि तात्पर्ये नास्ति पूर्वपूर्वतन तात्पर्यसत्त्वादिति भावः। यत्र राजपदस्य राजसम्बन्धिनि स्वारसिकलक्षणाग्रहस्त
त्र तादृशबोधस्य राजसम्बन्धिभिन्नपुरुष इति बोधस्योभयमतसिद्धतया। तादृशसमभिव्याहारस्य राजपुरुष इति समभिव्याहारस्य राजसंबंधि
नि पुरुषबोधे कारणताया क्लृप्ततयैव निर्वाहे सर्वत्र लुप्तविभक्तिस्मरणकल्पने मानाभावादिति क्वचित्पुस्तके उत्तोलितः पाठः स च गतार्थत्वात्सु
न रुक्तः। दृस्या राजसम्बन्धि उपस्थितिं विना राजपुरुष इत्याकारकसमभिव्याहारमात्रेण राजसंबन्ध्यभिन्नः पुरुष इति शाब्दबोधासंभवाच्च न तद्युक्तम्

नचैवमिति। एवंलुप्तविभक्तिस्मरणंविनैवनिरूढलक्षणयानिर्वाहेइत्यर्थः। धात्वर्थेनदर्शनेनसमम्। तस्यदधिकर्मकस्य। अभेदान्वयसंभवा
त्। तत्रापि। दधिपदेपि॥ लुप्तविभक्तिस्मरणंनकल्पनीयमितिशंकाग्रन्थः। समाधत्ते। दध्यादिपदस्यदधिकर्मकादौलक्षणाग्रहे। तस्यदधिपद
स्य। द्वितीयेतरा विभक्तिः। प्रथमातृतीयादिः। तद्भ्रमदशायां। दधिकर्मपश्यतीत्यादिवत् उक्तस्थलेपिदधिपश्यतीत्यत्रापिप्रथमातृती

नचैवंदधिपश्यतीत्यादावपिदध्यादिपदस्यदधिकर्मकादौलक्षणांस्वीकृत्यधात्वर्थेनसमंतस्याभेदान्वयबोधोपपा
दनसंभवात्तत्रापिलुप्तविभक्तिस्मरणकल्पनमनुचितमितिवाच्यम्। दध्यादिपदस्यदधिकर्मकादौलक्षणाग्रहदशा
यामपितस्यद्वितीयेतरविभक्त्यंतत्वभ्रमदशायांदधिकर्मकःपश्यतिदधिकर्मकेणपश्यतीत्यादाविवउक्तस्थलेपिद
धिकर्मकदर्शनान्वयबोधानुदयात्भवन्मतेदधिकर्मकःपश्यतीत्यत्रदधिपश्यतीतिस्थलीयदधिपदोत्तरपश्यतिपदत्व
रूपाकांक्षाज्ञानादिघटितसामग्रीसत्वाद्दधिकर्मकदर्शनान्वयस्यापत्तेर्द्वितीयांतदध्यादिपदत्वावच्छिन्नधर्मिकतादृशधा
त्वादिसमभिव्याहारज्ञानस्यतादृशान्वयबोधेहेतुतायाआवश्यकत्वात्। दधिपश्यतीत्यादौलुप्तद्वितीयानुसंधानस्याव
श्यकत्वात्।

यांतत्वभ्रमदशायांदधिकर्मकदर्शनबोधानुदयात्। दधिपदस्यदधिकर्मकेलक्षणा। तत्रचप्रथमातृतीयादिभ्रमेदधिकर्मकःपश्यति॥
दधिकर्मकेणपश्यतीत्यादावपिदधिपश्यतीत्युक्तस्थलेपिदधिकर्मकदर्शनान्वयबोधानुदयात्। हेतोःद्वितीयान्तदध्यादिपदसमभिव्याहृतपश्यतीत्यु
पस्थितित्वेनदधिकर्मकदर्शनान्वयबोधंप्रतिहेतुतायाआवश्यकत्वात्। दधिपश्यतीत्यादौलुप्तद्वितीयानुसंधानस्यावश्यकत्वात्॥ दधिपश्यतीत्यत्रे
वराजपुरुषइत्यत्रापिनविभक्त्यनुसन्धानस्यावश्य
कत्वम्।

मु॰टी॰ राजसम्बन्धिपुरुषइतिबोधंप्रतिराजपदाव्यवहितोत्तरपुरुषपदत्वज्ञानत्वेनकारणत्वात्तृतीयांतत्वभ्रमस्थलेतुतृतीयाव्यवधानात्राजप
६० दाव्यवहितोत्तरत्वंपुरुषपदेनास्तीतिकारणाभावादेवनराजसम्बन्धीपुरुषइतिबोधापत्तिरितिनषष्ठ्यनुसन्धानापेक्षेत्याह। राजसम्बन्धिपुरु
षइत्याद्यन्वयबोधेचेत्यादिना॥ राजपुरुषइत्यादाविवदधिपश्यतीत्यादौदधिपदाव्यवहितोत्तरपश्यतिपदज्ञानत्वेनकारणतानसम्भवति

राजसम्बन्धिपुरुषाद्यन्वयबोधेचराजादिपदाव्यवहितोत्तरपुरुषादिपदत्वप्रकारकज्ञानस्यहेतुतायाःस्वारसिकलक्षणाग्रहस्य
लानुरोधेनावश्यकल्पनीयतयाराजपुरुषइत्यादौराजादिपदस्यतृतीयाद्यंतत्वभ्रमदशायांराजसम्बन्धिपुरुषाद्यन्वयबोधापत्त्य
संभवात्। तृतीयादिविभक्त्याव्यवधानात्दधिपश्यतीत्यादौदधिपदाव्यवहितोत्तरत्वप्रकारकधातुपदज्ञानस्यहेतुतायाअक्लृ
प्तत्वात्। पश्यतिदधिपश्यतिचैत्रोदधिइत्यादावपिदधिकर्मकदर्शनान्वयबोधात्। तादृशज्ञानहेतुतायाअशक्यकल्पनीयत्वाच्चे
ति। तण्डुलंपचतीत्यादौतण्डुलादिपदस्यैवतण्डुलादिकर्मकेलक्षणाविभक्तिस्तुसाधुत्वार्थाएवंराज्ञःपुरुषइत्यादावपिराजादिपदस्य
सम्बन्ध्यादौलक्षणाविभक्तिःसाधुत्वार्थातत्तद्विभक्त्यंतसमभिव्याहारस्यनतल्लाक्षणिकार्थबोधनियामकत्वान्नातिप्रसङ्गः

पश्यतिदधिपश्यतिचैत्रोदधिइत्यादौव्यभिचारात्तस्माद्द्वितीयानुसंधानमावश्यकमित्याह। दधिपश्यतीत्यादौदधिपदाव्यवहितोत्तरत्वप्रकार
कधातुपदज्ञानस्यहेतुतायाअक्लृप्तत्वादिति। शङ्कतेतण्डुलंपचतीत्यादौइत्यारभ्यइतितुचिंतनीयमित्यंतेनग्रन्थेन ।नातिप्रसंगइति। तण्डुलं राम
पचतीत्यत्रतण्डुलकर्मकबोधेद्वितीयासमभिव्याहारोनियामकःराजपुरुषइत्यत्रराजसम्बन्धिपुरुषइतिबोधेषष्ठीसमभिव्याहारोनियामकइतिद्वितीया ६०

मपिआहाराभावान्नतण्डुलःपचतीत्यत्रतण्डुलकर्मकेतण्डुलपदेलक्षणेतिनातिप्रसंगइत्यर्थः।केवलंप्रकृतियोगोस्तितण्डुलःप्रमेयइत्यत्रकेव
लप्रकृतिप्रयोगोनास्तीतिप्रकृतौलक्षणाप्रमेयइत्येतदुक्तंविभक्तेरेवप्रकृत्यर्थविशेषितस्वार्थेतण्डुलकर्मकेतिलक्षणेतितुनसंभवतीति॥समा
धत्ते॥राजादिपदस्यराजसम्बन्ध्यादिशक्तत्वाभ्रमदशायामिवतदर्थेलक्षणाग्रहदशायामपिराजसंबन्धिनःपुरुषइत्यादाविवराजसम्बन्धी
पुरुषइत्याद्यन्वयबोधस्यसर्वानुभवसिद्धत्वादिति॥शक्तिभ्रमस्थलेस्वारसिकलक्षणायांचराजपदस्यराजसम्बन्धिअर्थःषष्ठ्या

विभक्तेरेवप्रकृत्यर्थविशेषितस्वार्थेलक्षणेतितुनसंभवति।विभक्तेःकुत्रापिशक्तेरक्लृप्ततयातत्रशक्यसम्बन्धरूपलक्षणाया
असंभवात्।तण्डुलःप्रमेयइत्यादौविभक्त्यर्थामिश्रितस्यैवप्रकृत्यर्थस्यभानात्।प्रकृतिशक्तेःस्वार्थेक्लृप्ततयातत्रलक्ष
णासंभवादितितुचिंतनीयम्।राजादिपदस्यराजसंबन्ध्यादौशक्तत्वभ्रमदशायामिवतदर्थेलक्षणाग्रहदशायामपिरा
जसंबन्धिनःपुरुषइत्यादाविवराजसंबंधिसंबन्धीपुरुषइत्याद्यन्वयबोधस्यसर्वजनानामनुभवसिद्धत्वात्। अत्रसंबन्धोऽर्थः

तथाचराजपुरुषःइत्यत्रराजसम्बन्धिसंबन्धवानितिबोधात्षष्ठ्यासंबन्धबोधकत्वावश्यकत्वेननिरर्थकत्वंनास्तीत्यर्थः।राजसम्बन्धिनःपु
रुषःइतिदृष्टान्तःराजसम्बन्धिपदोत्तरषष्ठ्याःसम्बन्धोऽर्थःराजसंबन्धिसम्बन्धवान्पुरुषइतिबोधात्।पचतिचैत्रइत्यत्रकृतिसंबन्धेनपा
कवांश्चैत्रइतिधीःनपचतिइत्यत्रकृतिसंबन्धावच्छिन्नप्रतियोगिताकपाकाभाववांश्चैत्रइतिशाब्दबोधोवक्तव्यःसचनसंभवतिकृ
तेरेत्वनियामकत्वात्इत्यतःकृतिराख्यातार्थःआश्रयताचवृत्तिनियामकसंबन्धइतिपाकानुकूलकृतिमांश्चैत्रइतिबोधः॥ ॥

 नपचतिइत्यत्राश्रयतासम्बन्धावच्छिन्नकृत्यभाववांश्चैत्रइतिबोधइत्याह॥ पचतिचैत्रइत्यादावपीत्यादिना॥ पुनः शंकते। अथैवमित्यारभ्य
 चेदित्यंतेनग्रन्थेन। एवमपिकृतिसम्बन्धस्यत्वस्यनियामकतयानपचतिचैत्रइत्यत्रशाब्दबोधानुपपत्तिः आख्यातस्यकृत्यर्थकतयाख्याता
र्थोपपादनेपिचैत्रोनजानातीत्यत्रवृत्तिनियामकआश्रयतासम्बन्धावच्छिन्नप्रतियोगिताकज्ञानाभाववांश्चैत्रइतिबोधसंभवादाख्यात

पचतिचैत्रइत्यादावपिकृतिसम्बन्धेनपाकादेश्चैत्राद्यंशेविशेषणत्वोपगमेचैत्रोनपचतीत्यादावन्वयबोधानुपपत्तिर्दुरुद्धरा।
कृतिसंबन्धस्यापित्वस्यनियामकतयातत्संबन्धावच्छिन्नप्रतियोगिकाभावस्याप्रसिद्ध्यातद्बोधनासंभवात्। अथैवमपिचै
त्रोजानातीत्यादौचैत्राद्यंशेज्ञानादेराश्रयतासंबन्धेनान्वयबोधोपगमेक्षतिविरहः आश्रयतासंबन्धस्याभावप्रतियोगितावच्छे
दकतयानजानातीत्यादावाश्रयतासंबन्धावच्छिन्नप्रतियोगिताकज्ञानाद्यभावस्यैवभानसंभवात्। तथाचतत्राख्या
तस्याश्रयत्वार्थकत्वंनिर्युक्तिकम्। नचधात्वर्थज्ञानादेराश्रयतासंबंधेनचैत्रादिरूपप्रातिपदिकार्थेसाक्षात्प्रकारकत्वोपगमे
ज्ञानंचैत्रइत्यादावपितथान्वयबोधापत्तिरितिवाच्यम्। (स्याश्रयत्वार्थकत्वंनिर्युक्तिकमित्यर्थः॥ नचधात्वर्थज्ञानादेरिति। साक्षादि

ति। आश्रयत्वरूपमाख्यातार्थमद्वारीकृत्यधात्वर्थज्ञानादेराश्रयतासम्बन्धेनचैत्राद्यंशेप्रकारत्वेज्ञानंश्चैत्रइत्यादावपिज्ञानवांश्चैत्रइत्यन्वय
बोधापत्तिः पदार्थोपस्थितियोग्यताज्ञानादिसामग्रीसत्त्वात्। तथाचैतदापत्तिवारणायनधात्वर्थज्ञानादेः साक्षाच्चैत्रादिप्रातिपदिकार्थे
प्रकारतासंबन्धेनान्वयः किन्तुज्ञानरूपधात्वर्थस्याख्यातार्थाश्रयत्वे। तस्यचचैत्रे। ज्ञानाश्रयत्ववांश्चैत्रइतिबोधाद्आख्यातस्याश्रयतार्थकत्वमा

पुनरपिपूर्वपक्षीसिद्धान्तिशंकामुद्धरति॥तादृशान्वयबोधइति॥ज्ञानवांश्चैत्रइतिज्ञानप्रकारकचैत्रविशेष्यकाश्रयतासंसर्गकबोधेआख्यातांत
धातुसमभिव्याहारज्ञानस्यहेतुत्वात्॥जानातीत्येकवचनान्तधातुसमभिव्याहृतप्रथमाएकवचनान्तचैत्रादिपदजन्योपस्थितित्वेनकारणत्वा
दित्यर्थः।तथाचज्ञानवांश्चैत्रइत्यत्राख्यातांतधातुसमभिव्याहाराभावान्नज्ञानवांश्चैत्रइतिबोधापत्तिराख्यातस्याश्रयत्वार्थकल्पनंनिर्यु
क्तिकमितिभावः।भवतोप्याश्रयताप्रकारकबोधेतादृशसमभिव्याहारज्ञानहेतुतायाआवश्यकत्वादितिमूलं।भवतोपि।आख्यातस्या
श्रयतार्थकतावादिसिद्धान्तिनोपि।आश्रयताप्रकारकबोधेज्ञानाश्रयत्ववांश्चैत्रइतिबोधे॥तादृशसमभिव्याहारज्ञानहेतुतायाः॥जानातिचै

तादृशान्वयबोधेआख्यातांतधातुसमभिव्याहारज्ञानस्यहेतुत्वात्।भवतोप्याश्रयताप्रकारकबोधेतादृशसमभिव्याहारज्ञान
स्यहेतुतायाआवश्यकत्वात्।यत्तुपचतिचैत्रइत्यादौपाककृतिमांश्चैत्रइत्याकारकाख्यातार्थप्रकारकशाब्दबोधस्स्यात
त्राख्यातजन्यकृत्युपस्थितेर्हेतुत्वकल्पनमावश्यकम्।

११ त्रइत्याकारकाख्यातैकवचनान्तज्ञाधातुसमभिव्याहृतप्रथमैकवचना
न्तचैत्रपदज्ञानस्यज्ञानवांश्चैत्रइत्यादिशाब्दंप्रतिहेतुतायाः॥आवश्यकत्वात्।अन्यथाजानन्तिचैत्रइत्याकारकबहुवचनान्तज्ञाधातुएक
वचनान्तचैत्रपदसमभिव्याहारस्थलेपिआश्रयताप्रकारकशाब्दबोधापत्तेः।पदजन्यपदार्थोपस्थित्यादिसामग्रीसत्त्वादितिपूर्वपक्षिणोपिस
मभिव्याहारज्ञानकारणतानाधिकेतिनाख्यातस्याश्रयत्वमर्थइतिभावः॥आख्यातस्यसार्थकतांव्यवस्थापयति।यत्त्वित्यारभ्यतदृष्यस
दित्यन्तग्रन्थेन।आवश्यकमिति।कृतिप्रकारकसमवायसंसर्गकबोधंप्रतिसमवायेनाख्यातजन्यकृत्युपस्थितित्वेनकारणतेत्युभयमतसिद्धत्वेनार

व्यु०टी० तथा च तत्तदर्थविशेषान्निवेश्येति। पचतीत्यत्र कृत्युपस्थितित्वेन कारणतेत्युभयमते जानातीत्यत्र आश्रयत्वोपस्थितित्वेन नश्यतीत्यत्र नाशप्रतियो
६२ गित्वोपस्थितित्वेन आत्मनिष्ठप्रत्यासत्त्या कारणतास्वीकारे शक्यलक्ष्यसहस्रार्थभेदेनाख्यातजन्योपस्थितिकारणताबाहुल्यमित्यर्थः। विशेषा
न्। अनिवेश्य विषयनिष्ठप्रत्यासत्त्यैव पचतीत्यादौ विशेष्यतासम्बन्धेन धात्वर्थपाकप्रकारकान्वयबोधं प्रति विशेष्यतासम्बन्धेनाख्यातरूपप्रत्य
यजन्योपस्थितित्वेन कारणतास्वीकारे लाघवमित्यर्थः। अनुकूलतासम्बन्धेन पाकवती कृतिरिति बोधाद्विशेष्यतया शाब्दबोधप्रत्ययजन्योपस्थि

तथा च तत्तदर्थविशेषान्निवेश्यात्मनिष्ठप्रत्यासत्त्या पदार्थोपस्थितेर्हेतुत्वकल्पने शक्यलक्ष्यसहस्रार्थभेदेनाख्यातजन्योपस्थि
तेः कारणताबाहुल्यमित्यर्थविशेषाननिवेश्य धात्वर्थप्रकारकान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्यै
व हेतुत्वमुपेयते। तथा च तादृशकारणबाधेन चैत्रादेर्धात्वर्थज्ञानविशेष्यतया भानं न संभवति यदि च धातुत्वप्रत्ययत्वादीना
मननुगतानां दुर्निर्वचतया नैतादृशानुगतकार्यकारणभावकल्पनं संभवतीति मन्यते॥ (१) सोः कृतौ सत्त्वादिति भावः। तादृशकारणताबा
धेनेति। चैत्रो जानातीत्यत्र चैत्रे विशेष्यतासंबन्धेनाख्यातरूपप्रत्ययजन्योपस्थितेरभावेन चैत्रो ज्ञानवानिति बोधो न संभवतीत्यर्थः। ननु धात्वर्थप्रकार
कान्वयबोधं प्रति प्रत्ययजन्योपस्थितेः समानविशेष्यताप्रत्यासत्त्या उक्तहेतुत्वं तदोपपद्येत यदि धातुत्वं प्रत्ययत्वं चानुगतं भवेत्तदेव तु भ्वा
दिगणपठितत्वे सति क्रियावाचकत्वं धातुत्वमिति दूषितमन्यत्र एवं प्रकृत्युत्तरविधीयमानत्वं प्रत्ययत्वमित्यपि बहुपरवड्यस्य च बहुजादिप्र एम
त्ययेऽव्याप्तमित्याशयेनाह। धातुत्वप्रत्ययत्वादीनामननुगतानां दुर्निर्वचतया तादृशानुगतकार्यकारणभावकल्पनं संभवतीति मन्यत इति मूलम् ६२

तथाचधात्वर्थप्रकारकान्वयबोधेप्रत्ययजन्योपस्थितेःकारणत्वात्॥चैत्रोजानातीत्यादौज्ञानवांश्चैत्रइतिबोधेप्राचीनमतेबाधकाभावइत्या
ख्यातस्यनिरर्थकत्वंतद्वस्थमितिभावः॥यत्तुमतेभूयोप्याख्यातस्यार्थकत्वमुपपादयति।तद्दापीत्यादिना।तद्दापि।धातुत्वप्रत्ययत्वादीनामननुग
ततयाधात्वर्थप्रकारकान्वयबोधेप्रत्ययजन्योपस्थितेःकारणत्वेपि।यत्रज्ञाधातोरेवपाकादौलक्षणा।तत्रजानातीत्यादिवाक्यात्पाककृत्यादि
प्रकारकान्वयबोधोत्पत्त्येतिमूलम्।यत्र।यद्यपिपाकप्रकारककृत्यादिविशेष्यकबोधोत्पत्त्येत्येववक्तुमुचितःनतुउत्तचैत्रविशेष्यककृतिप्रका
रकबोधोवक्तुमुचितःपूर्वमुक्तत्वात्।धात्वर्थप्रकारकान्वयबोधेतदव्यवहितोत्तरतिप्ज्ञानजन्यकृत्युपस्थितेर्विशेष्यतासम्बन्धेनहेतुत्वा

तद्दापियत्रज्ञाधातोरेवपाकादौलक्षणातत्रजानातीत्यादिवाक्यात्पाककृत्यादिप्रकारकान्वयबोधोत्पत्त्याज्ञाधात्वर्थप्रकार
कान्वयबोधेतदव्यवहितोत्तरतिप्त्वादिप्रकारकज्ञानजन्योपस्थितेःसमानविशेष्यत्वप्रत्यासत्त्याहेतुतायास्तत्रकल्पनी
यतयातादृशकारणबाधाच्चैत्रोजानातीत्यादौचैत्रादेर्ज्ञानविशेष्यतयाभानानुपपत्तिर्दुर्वारैवेति॥ ॥दित्युपसंहाराच्चातयापिकृतिप्रकार
कएवनधात्वर्थप्रकारकःचैत्रविशेष्यकोबोधइतिवक्तुंपूर्वोक्तस्यवारणायतथोक्तमिति॥ज्ञाधातुत्वतिप्त्वादीनामननुगततयायत्रधातोरेवपा
कगमनज्ञानाद्यनेकव्यापारेषुलक्षणातत्रलक्षणायांसत्यांचैत्रोजानातीत्यादिवाक्यात्पाकगमनाद्यनुकूलकृत्यादिप्रकारकान्वयबोधोत्पत्त्याविशे
शेष्यतासम्बन्धेनज्ञाधात्वर्थप्रकारकान्वयबोधेकृतौजायमानेज्ञाधात्वव्यवहितोत्तरतिप्त्वतत्त्वादिप्रकारकंतिप्तत्त्वादिविशेष्यकंज्ञानमात्र ६
जन्योपस्थितेः।कृत्युपस्थितेः।विशेष्यतासम्बन्धेनकृतौसत्त्वेनहेतुतायाःतत्रचैत्रोजानातीत्यादिवाक्यस्थलेकल्पनीयतयातादृशकारणताबा

मु॰टी॰ ६३ ज्ञाधातूत्तरतिपूजन्योपस्थितिरूपकारणस्य विशेष्यतासम्बन्धेन चैत्रेऽभावाच्चैत्रो जानातीत्यत्र ज्ञानवांश्चैत्र इत्याकारकशाब्दबोधानुपप
त्तिर्दुर्वारैवेत्यर्थः। ज्ञाधातोः पाकगमनादिलक्षणायामाख्यातनिष्ठप्रत्यासत्त्याकारणतास्वीकारे पूर्वोक्तरीत्या पाकगमनाद्यनेकार्थविशेषणंनिवेश्य
कारणतायांगौरवं। विषयनिष्ठप्रत्यासत्त्या कारणत्वे तु ज्ञाधातुज्ञानजन्योपस्थितिविषयत्वेन पाकगमनाद्यनेकधातुलक्ष्यार्थोन्निवेश्य विशे
ष्यतासम्बन्धेन कृतौ जायमाने ज्ञाधात्वर्थपाकगमनादिप्रकारकबोधे तिपूत्वतस्त्वादिप्रकारकतिपूत्वसादिविशेष्यकज्ञानजन्योपस्थितेः कृ
त्युपस्थितेर्विशेष्यतासम्बन्धेन कृतौ सत्वात् पाकगमनाद्यनुकूलायाकृतिः तद्वांश्चैत्र इति बोधो न तु आश्रयतासम्बन्धेन ज्ञानवांश्चैत्र इति
बोधः कारणीभूततिपूजन्योपस्थितेर्विशेष्यतासंबन्धेन चैत्रे बाधात् किन्तु ज्ञाधातुसमभिव्याहृततिपूजन्योपस्थितेर्लक्षणया आश्रयत्वे विशेष्यता

तदप्यसत्। प्रत्ययान्तरार्थविशेष्यकशाब्दबोधे व्यभिचारवारणाय तादृशोपस्थितिवैशिष्ट्यस्य तादृशोपस्थितिजन्यतावच्छेद
ककोटौ अवश्यं निवेशनीयतया॥

॥संबन्धेन सत्वात् ज्ञाधात्वर्थज्ञाननिष्ठप्रकारतानिरूपिताश्रयत्वनिष्ठविशेष्यत्वाभिन्नप्रकारतानिरूपि
तचैत्रनिष्ठमुख्यविशेष्यताशालिज्ञानाश्रयत्ववांश्चैत्र इति बोधो जायते इत्यारेण तस्य सार्थक्यमक्षुण्णमेवेति। अथैवमपीत्यादिपूर्वपक्षी भूयोपि
धात्वर्थप्रकारकचैत्रविशेष्यकबोधमुपपादयति। तदप्यसदित्यादिना॥ प्रत्ययान्तरार्थविशेष्यकबोधे व्यभिचारवारणायेति। जानन्नुज्ञातात्यादौ ज्ञा
नप्रकारकआश्रयविशेष्यकबोधे शत्राद्यर्थे आश्रये जायते तत्र तिपूज्ञानजन्योपस्थितेरभावाद्व्यभिचारः। तद्वारणाय तादृशोपस्थितिवैशिष्ट्यस्य टि॰ एम
।तिपूज्ञानजन्यकृत्युपस्थितिवैशिष्ट्यस्य। तादृशोपस्थितिकार्यतावच्छेदककोटौ अवश्यं निवेशनीयतया। आख्यातजन्यकृत्युपस्थितिरूपकार ६३

ज्ञाधात्तुलस्यार्थपाकादिप्रकारकशाब्दत्वरूपकार्यतावच्छेदकं निवेशनीयतयेत्यर्थः। तथा चाख्यातार्थकृत्युपस्थितिसव्यवहितोत्तरज्ञानं धात्वर्थपाकादिप्रकारकशाब्दबोधत्वावच्छिन्नं प्रति ज्ञाधातूत्तराख्यातजन्यकृत्युपस्थितित्वेन कारणमिति। जानन्ज्ञाताइत्यादिस्थलीयो बोधः। तिप्ज्ञानजन्यकृत्युपस्थित्यनुत्तरत्वात्कार्य्यतावच्छेदकाक्रान्त एव न भवतीति न व्यभिचार इति॥ तदनुत्तरशाब्दबोधे। तिप्ज्ञानजन्यकृत्युपस्थित्यनुत्तरशाब्दबोधे। तिप्ज्ञानजन्यकृत्युपस्थितिकार्यतावच्छेदकानाक्रान्ते चैत्रो जानातीत्यादिवाक्यसहकृतपदार्थोपस्थितियोग्यताज्ञानादिरूपस्वसामग्रीवशसंपन्ने आश्रयतासंसर्गकचैत्रविशेष्यकज्ञानप्रकारकज्ञानवांश्चैत्र इति शाब्दबोधः। तादृशकारणबाधस्य। ज्ञाधातूत्तरतिप्ज्ञानजन्योपस्थिति

तदनन्तरशाब्दबोधे चैत्रादेर्ज्ञानादिविशेष्यतयाभाने तादृशकारणबाधस्याकिंचित्करत्वात्। तादृशानुपूर्वीघटकज्ञाधातुजन्यज्ञानाद्युपस्थितिचैत्रादिरूपविशेष्योपस्थितियोग्यताज्ञानादिघटितसामग्र्या आश्रयतासंसर्गकशाब्दबोधजनने बाधकाभावात्॥

(१)रूपकारणबाधस्य अकिंचित्करत्वादिति॥ कारणतावच्छेदकावच्छिन्नाभावो हि योगक्षेमसाधारणबोधस्याकिंचित्करः कारणरीत्या कार्यतावच्छेदकावच्छिन्नाभावे नियामकः। प्रकृते च तिप्ज्ञानजन्यकृत्युपस्थितिः कारणमेव न भवति तिप्जन्यज्ञानकृत्युपस्थित्यनुत्तरत्वात्॥ ज्ञानवांश्चैत्र इति शाब्दबोधः कार्यतावच्छेकाक्रान्तोपि इति तिब्ज्ञानजन्यकृत्युपस्थित्यभावस्य ज्ञानवांश्चैत्र इत्याकारकशाब्दबोधाभावानियामकत्वादित्यर्थः। तथा चाख्यातनिरर्थकमिति भावः। ज्ञानवांश्चैत्र इति शाब्दसामग्रीमुपपादयति। तादृशानुपूर्वीघटकज्ञाधातुजन्यज्ञानाद्युपस्थितीति॥ चैत्रो जानातीत्यानुपूर्वीघटकज्ञाधातुजन्यज्ञानाद्युपस्थितिरित्यर्थः॥ ६ ॥ ६ ॥

न्यु·टी· नवीनआश्रयतासंसर्गतावादिप्राचीनमते शंकते। नचैतदित्यादिवाच्यमित्यन्तेन। प्राचीनमते आश्रयतासंसर्गकयोग्यताज्ञानकारणताया दि
६४ प्राचीनमते॥ आश्रयतासंसर्गकशाब्दाभावात् न आश्रयतासंसर्गकरूपयोग्यताज्ञानकारणतेति लाघवमिति भावः। अथाश्रयतावादी स्वमते गौ
रवमुद्धरति। आश्रयतासंबन्धेनज्ञानविशिष्टचैत्रादितासर्यकादिति॥ सर्वनाम्नः। सइस्येवरूपात्तदादेः। एवं संकेतितशब्दान्तराद्वा। यदा मया घट इ
तिवक्तव्यं तदा त्वयाश्रयतासंबन्धेनज्ञानवांश्चैत्रो बोद्धव्य इति वक्तुः सपदा संकेतः इच्छाकृता तादृशघयादिशब्दात्तदादिसर्वनामभिन्नाद्वा
द्र सर्थः। तादृशसम्बन्धेन॥ आश्रयतासंबन्धेन। ज्ञानादिप्रकारकचैत्रादिविशेष्यकशाब्दबोधस्य। सइस्तत्र सांकेतिकघट इत्यत्र च प्रथमैकवचने

नचैतन्मते आश्रयतासंबन्धेनज्ञानादिप्रकारकशाब्दबोधे तादृशयोग्यताज्ञानहेतुत्वान्तरकल्पनाधिक्यम्। आश्रयतासंब
न्धेनज्ञानविशिष्टचैत्रादितासर्यकात्सर्वनाम्नः सांकेतिकशब्दान्तराद्वा तादृशसंबन्धेन ज्ञानादिप्रकारकचैत्रादिविशेष्यक
शाब्दबोधस्य सर्वमत एव प्रसिद्धावपि तादृशशाब्दबोधे पदार्थान्तरभाननैयत्येन तन्निश्चितयोग्यताज्ञानस्य तत्र हेतुताया आवश्यक

पस्थाप्यैकत्वसंसर्गबोधस्य। एकोज्ञानवानित्याकारकस्य। सर्वमत एव सिद्धावपीत्यनेनाश्रयतासंसर्गकयोग्यताज्ञानकारणता सर्वमतसिद्ध
त्वान्न प्राचीनमतेऽधिकेति सूचितमिति न गौरवमिति भावः। अथेति वादी आश्रयतासंसर्गमते भूयोपि गौरवमावेदयति। तादृशशाब्दबो
ध इति। तादृशशाब्दबोधे तादृशतात्पर्यकसर्वनामसांकेतिकमेकघटादिशब्दान्यतरजन्यो ज्ञानवांश्चैत्र इति शाब्दबोधे प्रथमाद्युपस्थि राम
तैकत्वरूपपदार्थान्तरविषयत्वनियमेनेत्यर्थः। अन्यथा पदार्थेतराभाने पदार्थयोः संसर्गबोधरूपशाब्दबोधपदवाच्यतानन॥ ६॥ ६४

स्यात्किन्तु नामार्थमात्रोपस्थितिपदाभिधेयः सा तथा च तन्मिश्रितयोग्यताज्ञानस्य स[illegible]ति सर्वनाम्नः घट इति साङ्केतिकशब्दस्य स योऽर्थः
आश्रयतासंबन्धेन ज्ञानवांश्चैत्र इत्यर्थस्तदपेक्षया पदार्थान्तरं सङ्गति घट इति प्रथमापदार्थ एकत्वं तन्मिश्रितं तद्विषयकं यत्तु योग्यता
ज्ञानं ज्ञानवानेकश्चैत्र इति योग्यताज्ञानं तस्य तत्र पूर्वनामसांकेतिकपदजन्यबोधे हेतुताया आवश्यकत्वात् सर्वमतसिद्धत्वादित्यर्थः। यद्वा
तन्मिश्रितस्य एकत्वविशिष्टस्य ज्ञानवच्चैत्रस्य यद्योग्यताज्ञानं तस्येत्यर्थः। ज्ञानादिविशिष्टचैत्रादिमात्रविषयकयोग्यताज्ञानस्य ज्ञानादिविशि
ष्टचैत्रादिविषयकशाब्दबोधहेतुतायाः कुत्राप्यक्लृप्तत्वादिति मूलम्। तथा च चैत्रो जानातीत्यत्र आश्रयतासम्बन्धेन ज्ञानवांश्चैत्र इति शाब्दबोधं प्र

ज्ञानादिविशिष्टचैत्रादिमात्रविषयकयोग्यताज्ञानस्य ज्ञानादिविशिष्टचैत्रादिविषयकशाब्दबोधे हेतुतायाः कुत्राप्यक्लृप्तत्वा
दिति वाच्यम्। भवन्मतेपि ज्ञानाश्रयताप्रकारकचैत्रादिविशेष्यकशाब्दबोधे तथाविधयोग्यताज्ञानहेतुताया आधिकात्

ति ज्ञानादिविशिष्टचैत्रादिमात्रविषयकयोग्यताज्ञानं हेतुरिति संसर्गतावादि प्राचीनमत एव गौरवमित्यर्थः। कुत्रापि। सर्वनामसंकेतितश
ब्दस्थले चैत्रो जानातीत्यादावपीत्यर्थः। आश्रयतासंसर्गतावादी गौरवसाम्यमाह। भवन्मतेपीति॥ आश्रयताप्रकारकबोधवादिनवीनम
तेपि॥ तथाविधयोग्यताज्ञानहेतुतायाः॥ ज्ञानाश्रयत्वप्रकारकचैत्रादिविशेष्यकयोग्यताज्ञानहेतुतायाः॥ नवीनमते आधिक्यादित्यर्थः तथा
चाश्रयतासंबन्धेन ज्ञानवांश्चैत्र इति बोधे नवीनानङ्गीकृत आश्रयतासंबन्धेन ज्ञानवांश्चैत्र इति योग्यताज्ञानकारणतासंसर्गतावादिप्राचीनमते
धिका यथा तथा ज्ञानाश्रयत्ववांश्चैत्र इति बोधे प्राचीनानङ्गीकृतज्ञानाश्रयत्ववांश्चैत्र इति योग्यताज्ञानकारणता नवीनस्याधिकेत्युभयमतसाम्येपि ॥

आश्रयतासंसर्गमतेलाघवमाह। आश्रयतासंसर्गकज्ञानीयकारणतावच्छेदकस्येति। तस्यचलघुशरीरतया इत्यनेनान्वयः। संसर्गतामतेयोग्यताज्ञानेज्ञानंचैत्रआश्रयताइतिनयोविषयाःप्रकारतामतेतु योग्यताज्ञानेज्ञानंआश्रयता आश्रयतायाःस्वरूपसंबन्धश्चेतिचत्वारोविषया इतिनवीनमतेगौरवमित्यर्थः। आश्रयतासंसर्गकंज्ञानंशाब्दबोधः। तदीयतन्निरूपितायाकारणतातदवच्छेदकस्य आश्रयतासंसर्गेणज्ञानवांश्चैत्र इत्याकारकशाब्दनिरूपिताश्रयतासंसर्गकज्ञानप्रकारकचैत्रविशेष्यकज्ञानवांश्चैत्रइत्याकारकयोग्यताज्ञानत्वस्येत्यर्थः॥ तदीयसंसर्गविषयताघटिततत्प्रकारज्ञानकारणतावच्छेदकापेक्षया॥ तदीयः आश्रयत्वीयः ज्ञानाश्रयतानिरूपितःयः संसर्गः स्वरूपसं

आश्रयतासंसर्गकज्ञानीयकारणतावच्छेदकस्यतदीयसंसर्गविषयताघटिततत्प्रकारकज्ञानकारणतावच्छेदकापेक्षयालघुशरीरतया आश्रयतायाःसंसर्गतामतस्यैवलघुत्वात्।

॥सर्गःतन्निष्ठासांसर्गिकीविषयतातद्घटितंयत् तत्प्रकारकज्ञानकारणतावच्छेदकम्। ज्ञानाश्रयतातद्घटितंयत् तत्प्रकारकज्ञानकारणतावच्छेदकम्। ज्ञानाश्रयताप्रकारकचैत्रविशेष्यकशाब्दनिष्ठाकार्यतानिरूपितायाज्ञानाश्रयताप्रकारकज्ञानाश्रयत्वीयस्वरूपसंसर्गकचैत्रादिविशेष्यकयोग्यताज्ञाननिष्ठकारणताश्रयावच्छेदकंज्ञानाश्रयत्ववांश्चैत्रइत्याकारकंशाब्दबोधसमानाकारसंशयनिश्चयसाधारणयोग्यताज्ञानत्वंतच्चज्ञानाश्रयत्वीयस्वरूपसंबन्धघटितत्वाद्गुरुभूतमित्येतदपेक्षयाप्राचांयोग्यताज्ञाननिष्ठकारणतावच्छेदकम्। लघुभूतमित्यर्थः॥ ज्ञानाश्रयतामताप्रकारतावादीनवीनःपुनःशङ्कते॥

नचयत्राश्रयत्वेज्ञाधातुसमभिव्याहृताख्यातस्यशक्तिभ्रमः स्वारसिकलक्षणाग्रहोवातत्रज्ञानाश्रयताप्रकारकशाब्दस्योभयमतसिद्धतया
तत्रतादृशयोग्यताज्ञानहेतुत्वमुभयमतसिद्धमेवेतिवाच्यमितिमूलम्। तत्र। शक्तिभ्रमस्वारसिकलक्षणान्यतरस्थले॥ तादृशयोग्यताज्ञा
नहेतुत्वम्। ज्ञानाश्रयत्वप्रकारकयोग्यताज्ञाननिष्ठहेतुत्वम्। आश्रयतासंसर्गवादीप्राचीनः स्वप्रौढ्यासमाधत्ते॥ तत्राप्याश्रयताप्रका
रकस्याभ्युपगन्तव्यादितिचेदिति॥ तत्र। आख्यातस्याश्रयत्वेशक्तिभ्रमस्थलेस्वारसिकलक्षणस्थलेपिज्ञानाश्रयत्ववांश्चैत्रइति
शाब्दबोधोपिनस्वीक्रियतेकिंतुआश्रयतासंसर्गेणज्ञानवांश्चैत्रइत्येवशाब्दबोधःस्वीक्रियतेतत्रायमाशयः यथाओदनंपचतीत्यत्रक

नचयत्राश्रयत्वेज्ञाधातुसमभिव्याहृताख्यातस्यशक्तिभ्रमः स्वारसिकलक्षणाग्रहोवातत्रज्ञानाश्रयताप्रकारकशाब्दबो
धस्योभयमतसिद्धतयातत्रतादृशयोग्यताज्ञानहेतुत्वमुभयमतसिद्धमेवेतिवाच्यम्। आश्रयतायाः संसर्गतावादिना
तत्राप्याश्रयताप्रकारकबोधस्यानभ्युपगंतव्यत्वादितिचेत्सत्यम्। एतदभिप्रायेणैवजानातीत्यादावाख्यातस्यनिरर्थकतांमणि
कारउररीचकार॥

स्यचिन्मतेविभक्त्यर्थोपिकर्मत्वंसंसर्गएवकर्मतासंबन्धेनओदनवान्पाकइतिबोधस्वीकारात्नतुनिरूपकतासंबन्धेन।
ओदनवान्पाकइतिबोधः यथाचराज्ञः पुरुषइत्यत्रकस्यचिन्मतेराजवान्पुरुषइतिबोधः षष्ठ्यर्थोपिस्वत्वंसंसर्गतयैवभासतेनतुस्वत्ववान्पु
रुषइतिबोधः। तथाजानातीत्यत्राख्यातार्थोप्याश्रयत्वंसंसर्गएवेति॥ आश्रयत्वसंसर्गत्वेमणिकारसंमतिंदर्शयति। एतदभिप्रायेणैवजानातीत्या
दावाख्यातस्यनिरर्थकतांमणिकारउररीचकारेतिमूलम्। यद्याश्रयत्वंसंसर्गतयैवभासतेतर्हिआश्रयत्वेआख्यातस्यलक्षणास्वीकारोपिव्यर्थएव

वेत्यभिप्रायेणैवजानातीत्याद्यावाख्यातमणिकारैरुक्तमित्य

आश्रयत्वप्रकारकबोधमुपपादयितुंशिरोमणिमतमाह।तत्राश्रयत्वेनिरूढलक्षणामिति॥तत्र।धातुसमभिव्याहृताख्याते।निरूढलक्षणानतुस्वा
रसिकलक्षणा॥आश्रयत्वेज्ञाधातुसमभिव्याहृताख्यातस्यशक्तिभ्रमकालेस्वारसिकलक्षणाग्रहकालेवासर्वानुभवसिद्धज्ञानाश्रयत्वप्रका
रकचैत्रविशेष्यकबोधमप्युपलप्स्यस्वप्रौढिबलात्स्वमात्रानुभवसिद्धधात्वर्थज्ञानप्रकारकचैत्रविशेष्यकबोधोपपादनेपियत्रधातोराख्यात
स्यज्ञानाश्रयत्वेशक्तिभ्रमःस्वारसिकलक्षणाग्रहोवातत्रशक्तिभ्रमकालेस्वारसिकलक्षणाग्रहकालेवाचैत्राद्यंशेविशेष्यीभूतेधात्वर्थैकदेश

तत्राश्रयत्वेनिरूढलक्षणामभ्युपगच्छतांदीधितिकाराणांपुनरेषआशयःयत्रज्ञाधातोर्ज्ञानाश्रयत्वेशक्तिभ्रमःस्वारसिकल
क्षणाग्रहोवातत्रचैत्राद्यंशेधात्वर्थैकदेशस्यज्ञानादेरन्वयानुपपत्त्यास्वरूपसंबन्धेनज्ञानाश्रयताप्रकारकचैत्रादिविशे
ष्यकान्वयबोधएवतन्त्रमणिकृतास्वीकरणीयः।तथाचतत्रज्ञानाश्रयताप्रकारकशाब्दबोधेतत्प्रकारकयोग्यताज्ञान
हेतुतायाःक्लृप्तत्वादाश्रयतासंसर्गकशाब्दबोधेतादृशयोग्यताज्ञानहेतुताकल्पनमधिकमेवमणिकृन्मते॥ ((स्यज्ञानादेर्ज्ञानाश्र
यत्वरूपज्ञाधात्वर्थस्यार्थैकदेशस्यज्ञानस्यान्वयानुपपत्त्याएकत्रविशेषणतयान्वितस्यान्यत्रविशेषणत्वेनान्वयायोगादितिनियमात्तत्राश्रय
त्वेविशेषणतयान्वितस्यपुनश्चैत्रेविशेषणतयाऽन्वयोनसंभवतीतिसर्वथाज्ञानवांश्चैत्रइतिशाब्दबोधासंभवात्मणिकृद्भिरपीदृशस्थले
ज्ञानाश्रयत्ववांश्चैत्रइत्याकारकबोधःस्वीकरणीयइत्यर्थः।उपसंहरति।तथाचनतत्रेति॥तत्रज्ञाधातोर्ज्ञानाश्रयत्वेशक्तिभ्रमस्स्वारसि-
कलक्षणाग्रहकालिकजानातीतिप्रयोगस्थलेजायमानेज्ञानाश्रयताप्रकारकशाब्दबोधेतत्प्रकारकज्ञानाश्रयत्वप्रकारकयोग्यताज्ञानेहेतुतायाः

कृप्तनयानाधिक्यंकिंतुनवीनैरनङ्गीकृतेआश्रयतासंसर्गकशाब्दबोधेआश्रयतासंसर्गकयोग्यताज्ञानहेतुतायाः कल्पनमधिकमेवमणिकृ
न्मतेइत्यर्थः। शिरोमणिमतेगौरवमाशंकते॥ नचदीधितिकृन्मतेइति॥ तादृशेति॥ आश्रयतासंसर्गकयोग्यताज्ञानहेतुताकल्पनलाघवसंभ
वेपीत्यर्थः। जानातीत्याद्यानुपूर्वीरूपाकांक्षाज्ञानघटितायाशाब्दसामग्रीएवंज्ञाधातुशक्तिजन्यज्ञानोपस्थितिघटिताचयाज्ञानाश्रयत्वप्रकारकशाब्द
सामग्रीतस्याघटादिभिन्नविषयकप्रत्यक्षादिकंप्रतिप्रतिबन्धकतायामाख्याततजन्याश्रयत्वादिनिवेशाद्गौरवम्। प्राचीनमतेतुआख्यातस्यान
र्थकत्वान्नगौरवमित्यर्थः। समाधत्ते। भवन्मतेपीति॥ भवन्मतेपि॥ मणिकृन्मतेपि। ज्ञानाश्रयत्वाभाववांश्चैत्रः सुन्दरइत्यादिविशिष्टवैशिष्ट्यावगाहि

नचदीधितिकृन्मतेतादृशयोग्यताज्ञानहेतुत्वाकल्पनलाघवेपिजानातीत्याद्यानुपूर्वीज्ञानघटितज्ञाधातुशक्तिज्ञानजन्यज्ञानोप
स्थितिघटितशाब्दसामग्र्याभिन्नविषयकप्रत्यक्षंप्रतिप्रतिबन्धकतायांआख्याततजन्याश्रयत्वोपस्थितेर्निवेशनस्याधिक्या
द्गौरवमितिवाच्यम्। भवन्मतेपिज्ञानाश्रयत्वाभाववांश्चैत्रःसुन्दरइत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे॥ प्रत्यक्षे॥ ज्ञानाश्रयत्वाभाव

विशिष्टेचैत्रेसुन्दरराजवैशिष्ट्यावगाहिप्रत्यक्षेएकविशिष्टेऽपरधर्मवैशिष्ट्यावगाहिप्रत्यक्षंप्रतिविशेष्यतावच्छेदकप्रकारकनिर्णयस्यहेतुत
यानवीनमतेजानातिचैत्रइत्यत्रज्ञानाश्रयत्ववांश्चैत्रइतिबोधात् शाब्दसामग्रीतादृशप्रत्यक्षेप्रतिबन्धिकातयाहिशाब्दसामग्रीज्ञानाश्रय-
त्वाभाववांश्चैत्रइतिबोधस्तदभावघटितायोग्यताज्ञानादिरूपाप्रत्यक्षसामग्रीतुज्ञानाश्रयत्वाभाववांश्चैत्रइतिविशेष्यतावच्छेदकप्रकारकनि
श्चयघटिताअतोबाधतदभावयोर्युगपदवस्थानासंभवेनशाब्दसामग्रीकालेप्रत्यक्षसामग्र्येवनास्तीतिसा॥ ९ ॥ ६ ॥ ८ ।

मग्र भावादेवज्ञानाश्रयत्वाभाववांश्चैत्रः सुन्दर इति प्रत्यक्षानुत्पत्तौ सत्यां नेदृशप्रत्यक्षे शाब्दसामग्री प्रतिबन्धिकेति नवीनमते लाघवम्॥
प्राचीनमते तु ज्ञानवानिति ज्ञानप्रकारकाश्रयतासंसर्गकचैत्रविशेष्यकयोग्यताज्ञानघटिता शाब्दसामग्री। प्रत्यक्षसामग्री तु ज्ञानाश्रयत्वाभाव
प्रकारकचैत्रविशेष्यकविशेष्यतावच्छेदकप्रकारकनिर्णयघटिता। तत्र च ज्ञानप्रकारकमाश्रयतासंसर्गकचैत्रविशेष्यकं ज्ञानं कर्तृज्ञानाश्र
यत्वाभावप्रकारकं चैत्रविशेष्यकं ज्ञानं नावरुणद्धि॥ ग्राह्याभावानवगाहित्वात्। अतः सामग्र्योर्यौगपद्यसंभवात् शाब्दसामग्र्याः प्रत्यक्षं प्रति प्रति
बन्धकत्वं कल्पनीयमिति गौरवमित्याह॥ जानाति चैत्र इत्या ‾ द्यानुपूर्वीज्ञानघटितज्ञाधातुजन्यज्ञानोपस्थिति घटितशाब्दसामग्र्याः प्रतिबं

जानाति चैत्र इत्याद्यानुपूर्वीज्ञानघटितज्ञाधातुजन्यज्ञानोपस्थिति घटितसामग्र्याः प्रतिबंधकताधिक्येन गौरवात्। मन्मते
चतादृशसामग्र्याविरोधिज्ञानाश्रयत्वाभाववत्तानिश्चयघटिततथाविधविशिष्टवैशिष्ट्यबोधसामग्र्याः।

‸‸धकताधिक्येन गौरवा
दितिमूलम्। जानाति चैत्र इत्याद्यानुपूर्वीज्ञानघटिताया ज्ञाधातुसामग्रीघटितायाः तथा ज्ञाधातुजन्याज्ञानोपस्थितिघटितायाः ज्ञानप्रकारकाश्रय
तासंसर्गकचैत्रादिविशेष्यकशाब्दबोधसामग्र्याः योग्यताज्ञानादिरूपायाः प्रतिबन्धकताधिक्येन गौरवादित्यर्थः। नवीनमते लाघवमाह। मन्मते इति
॥दीधितिकृन्मते इत्यर्थः॥ ज्ञानाश्रयत्ववांश्चैत्र इति शाब्दबोधविरोधियोज्ञानाश्रयत्वाभाववत्तानिश्चयो विशिष्टे वैशिष्ट्यमिति प्रत्यक्षे विशेष्य
तावच्छेदकप्रकारकनिर्णयत्वेन कारणीभूतः तद्घटिततया। तथाविधविशिष्टवैशिष्ट्यबोधसामग्र्याः॥ ज्ञानाश्रयत्वाभाववांश्चैत्रः सुन्दर इत्या

कारकविशिष्टवैशिष्ट्यप्रत्यक्षसामग्र्याः॥

तादृशसामग्र्याः समम्। ज्ञानाश्रयत्ववांश्चैत्र इति शाब्दबोधस्य ज्ञानाश्रयत्वाभाववांश्चैत्र इति यो बोधस्तदभावघटितयोग्यताकाया ज्ञानादिरू
पशाब्दसामग्र्याः समम्। युगपदवस्थानासंभवेन। ज्ञानाश्रयत्वाभाववांश्चैत्रः सुन्दर इति प्रत्यक्षे ज्ञानाश्रयत्वाभाववांश्चैत्र इति विशेष्यतावच्छे
दकप्रकारकनिर्णयघटिता सामग्री विशेष्यतावच्छेदकज्ञानाश्रयत्वाभाववांश्चैत्र इति निश्चय एव ज्ञानाश्रयत्ववांश्चैत्र इति शाब्दबोधे बा
धः ईदृशबाधाभावः शाब्दसामग्री तया च बाधतदभावयोर्युगपदवस्थानासंभवेन शाब्दसामग्रीकाले प्रत्यक्षसामग्र्यभावादेव ईदृशप्रत्य
क्षानुत्पत्तौ शाब्दसामग्र्याः प्रतिबन्धकत्वकल्पनाविरहादित्यर्थः॥ शेषं दर्शितदिशावसेयमिति॥ यद्यपि प्राचीनमतेपि ज्ञानाभाववांश्चैत्रः सु
न्दर इति विशिष्टवैशिष्ट्यप्रत्यक्षे ज्ञानवांश्चैत्र इति शाब्दबोधसामग्र्याः योग्यताज्ञानादिरूपायाः तादृशप्रत्यक्षे विशेष्यतावच्छेदकप्रकारकनि

तादृशशाब्दसामग्र्याः समं युगपदवस्थानासंभवेन तादृशप्रतिबंधकत्वकल्पनाविरहादित्यधिकं दर्शितदिशावसेयम्॥

र्णयविधया कारणस्य ज्ञानाभाववांश्चैत्र इति निर्णयस्य ज्ञानवांश्चैत्र इति शाब्दबोधे बाधतया तादृशबाधाभावघटितायाः प्रतिबन्धक
त्वं न कल्प्यते बाधतदभावयोर्युगपदवस्थानासंभवेन बाधाभावघटितशाब्दसामग्रीकाले विशेष्यतावच्छेदकज्ञानाभाववत्त्वप्रकारक
निश्चयरूपप्रत्यक्षकारणाभावादेतत्प्रत्यक्षानुत्पत्तौ शाब्दसामग्र्याः प्रतिबन्धकत्वाभावादिति लाघवं संभवति। नवीनमते तु ज्ञानाभाववांश्चैत्र इ
ति प्रत्यक्षसामग्री ज्ञानाश्रयत्ववांश्चैत्र शाब्दसामग्र्योः यौगपद्यसंभवात्तादृशप्रत्यक्षे शाब्दसामग्रीप्रतिबन्धकतया नवीनमते गौरवमिति
तथापि ज्ञानाभाववदाश्रयत्वं प्रमेयमिति आश्रयत्वं ज्ञानाभाववदिति विशेष्यतावच्छेदकप्रकारकनिर्णयो हेतुः॥ स च निर्णयः ज्ञानाश्रय

सु॰ टी॰ ज्ञानवानिति शाब्दस्य बाधस्तज्ज्ञानघटिताशाब्दसामग्रीति बाधतदभावयोर्यौगपद्यासंभवात् शाब्दसामग्रीकाले प्रत्यक्षसामग्र्यभावादेव ज्ञाना-
६९ भाववद्वाश्रयत्वं प्रमेयमिति प्रत्यक्षानुसक्तौ शाब्दसामग्र्याः प्रत्यक्षं प्रति प्रतिबन्धकत्वाभावान्नवीनमते लाघवम्। प्राचीनमते तु आश्रयत्वं
ज्ञानाभाववदिति निश्चयघटिता प्रत्यक्षसामग्री ज्ञानवानिति शाब्दस्य सामग्री। आश्रयत्वं ज्ञानाभाववदिति निश्चयाभावघटितान भवती-
ति सामग्र्योर्यौगपद्यसंभवाच्छाब्दसामग्री प्रत्यक्षे प्रतिबन्धिकेति गौरवं प्राचीनमतेपीत्युभयमतसाम्येपि ज्ञानत्वाश्रयत्वाभाववांश्चैत्रः
सुन्दर इत्यादिविशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे जानातिचैत्र इत्याद्यानुपूर्वीज्ञानघटितत्वाधात्वर्थजन्यज्ञानोपस्थितिघटितसामग्र्याः प्रति

अथैवं रीत्या भूतलेन घट इत्यादौ घटादिपदस्य घटप्रतियोगिकादौ तदुत्तरसुब्विभक्तेरेव वा प्रतियोगितायां लक्षणामभ्युपेत्य तत्र
घटप्रतियोगिकाभावो भूतलवृत्तिरित्याद्याकारकप्रतियोगिताप्रकारकशाब्दबोधोपगम एव समुचितः॥

बंधकताधिक्येन प्राचीनमते
पूर्वोक्तगौरवमधिकमिति भावः। शंकते॥ अथैवं रीत्येति॥ जानातीत्यादावाख्यातार्थाश्रयत्वप्रकारकशाब्दबोधाङ्गीकारेणेत्यर्थः। इदन्त्व-
प्रतियोगिताप्रकारकशाब्दबोध एव समुचित इत्यत्रान्वेति। प्रतियोगिताप्रकारकशाब्दबोधप्रवादमुपपादयति। भूतलेन घट इत्यादौ घटादिपदस्य
घटप्रतियोगिकादौ। लक्षणां स्वीकृत्य तत्र भूतलेन घट इति वाक्ये घटप्रतियोगिकाभावो भूतलवृत्तिरिति प्रतियोगिताप्रकारकशाब्द एव समुचितः न
याचनामार्थयोर्घटप्रतियोगिकस्याभावस्य च अभेदान्वयबोध इति निपातातिरिक्तत्वविशेषणं नामार्थयोरभेदान्वय इति व्युत्पत्तौ न देयं एवं घटपदोत्त-
रं प्रथमाया एव वा प्रतियोगितायां लक्षणा तदापि घटस्य प्रतियोगित्वं प्रथमार्थे तस्य चाभेदान्वय इति नामार्थविभक्त्यर्थयोरेवान्वयस्तदापि॥ ६॥ ६८

निपातातिरिक्तत्वविशेषणं नामार्थयोरिति व्युत्पत्तौ व्यर्थमिति नवीनस्य शंका॥ प्राचीनमते प्रतियोगितासंबन्धेन घटस्य नञर्थाभावे भेदान्वयः।स च नामार्थयोर्न संभवतीति उक्तव्युत्पत्तौ निपातातिरिक्तविशेषणं सार्थकमिति भावः। तथा सति। प्रतियोगिताप्रकारकशाब्दांगीकारे सति। तथाविधसमभिव्याहारज्ञानघटितसामग्र्याः। भूतलेन घट इत्यादिसमभिव्याहारज्ञानघटितशाब्दबोधसामग्र्याः। घटप्रतियोगिकत्वाभाववान् भावः प्रमेय इत्यादिविशिष्टवैशिष्ट्यप्रत्यक्षं प्रति प्रतिबन्धकत्वाकल्पनेन लाघवादिति। घटाभावः घटप्रतियोगिकत्वाभाववानिति। विशेष्यतावच्छेदकप्रकारकनिर्णयः प्रत्यक्षकारणं स एव घटप्रतियोगिताकत्ववान् भाव इति शाब्दबोधे बाधस्तदभावघटिता च योग्यताज्ञानादि रूपा शाब्द

[illegible]ति तथाविधसमभिव्याहारज्ञानघटितसामग्र्या घटप्रतियोगिकत्वाभाववान् भावः प्रमेय इत्यादिविशिष्टवैशिष्ट्यबोधं प्रति प्रतिबंधकत्वाकल्पनेन लाघवात् इत्युक्तनियमे निपातातिरिक्तत्वविशेषणवैयर्थ्यमिति चेन्न भूतलेन घट इत्यादौ घटाद्यभावे भूतलाद्यन्वितसप्तम्यर्थाधेयत्वस्येव तात्पर्यवशाद्घटादौ सप्तम्यंतार्थभूतलादिवृत्तित्वाभावस्यान्वयबोधोप्यनुभवसिद्धः॥

सामग्री। तथा च बाधतदभावयोरयौगपद्यात् शाब्दसामग्रीकाले प्रत्यक्षसामग्र्यभावादेव प्रत्यक्षानुत्पत्तौ न शाब्दसामग्री प्रत्यक्षे प्रतिबन्धिका इति नवीनमते लाघवादित्यर्थः। प्राचीनमते तु प्रतियोगितासंबन्धेन घटवान् भाव इति शाब्दबोधसामग्री उक्तप्रत्यक्षसामग्र्यां मेलनसंभवात् शाब्दसामग्री उक्तप्रत्यक्षे प्रतिबंधिकेति गौरवमिति भावः। अथ नामार्थयोरिति व्युत्पत्तौ निपातातिरिक्तत्वविशेषणसाफल्याय पूर्वपक्षिमते दृष्टान्तं तया वदति। भूतलेन घट इत्यादाविति। घटाभावो भूतलवृत्तिरिति घटाभावधर्मिकभूतलवृत्तित्वप्रकारकशाब्दानुभववत् तात्पर्यरूप

कारणबलात् घटो भूतलवृत्तित्वाभाववानिति घटविशेष्यकभूतलवृत्तित्वाभावप्रकारकशाब्दानुभवोपीत्यर्थः॥ अन्यथा॥ घटादिविशेष्यक
भूतलादिवृत्तित्वाभावप्रकारकशाब्दबोधानङ्गीकारे॥ तादृशवाक्यजन्यस्य॥ भूतलेन घट इत्यादिवाक्यजन्यस्य। अप्रामाण्यज्ञानविषयी
भूतो बाधो न प्रतिबन्धक इत्यप्रामाण्यज्ञानानास्कन्दितेत्युक्तम्॥ पूर्वपश्चिममते सिद्धस्य घटाभावो भूतलवृत्तिरिति बोधस्य भूतले घट इत्यादि
वाक्यजन्यघटादिविशेष्यकभूतलादिवृत्तित्वप्रकारकबोधं प्रति सर्वानुभवसिद्धविरोधितानुपपत्तेरित्यर्थः। नहि घटाभावधर्मिकभूतल
वृत्तित्वप्रकारकं ज्ञानं घटधर्मिकं भूतलवृत्तित्वप्रकारकज्ञानं विरुणद्धि ग्राह्याभावानवगाहित्वात्॥ किंतु घटो भूतलवृत्तिरिति ज्ञानं घटो न भूत

अन्यथा तादृशवाक्यजन्यस्याप्रामाण्यज्ञानानास्कंदितबोधस्य भूतले घट इत्यादिवाक्यजन्यघटादिविशेष्यकभूतलाद्याधेयत्व
प्रकारकबोधविरोधितायाः सर्वानुभवसिद्धाया अनुपपत्तेः। नञ्पदं विना यत्र धर्मिणि यस्य विशेषणतया भानं यादृशसमभि
व्याहाराद्भवति तादृशसमभिव्याहारस्थले नञ्सत्वे तत्र धर्मिणि तदभावः प्रतीयत इत्यनुभवापलापप्रसंगाच्च। ल वृत्तिरित्येव ज्ञान

प्रतिबन्धकं ग्राह्याभावावगाहित्वादिति। भूतलेन घट इति वाक्यात् घटधर्मिकभूतलवृत्तित्वाभावप्रकारकबोधो अवश्यमंगीकरणीय इति भावः
प्रतियोग्यभावान्वयो तुल्ययोगक्षेमाविति नियमनिर्वाहमप्याह॥ नञ्पदं विनेति॥ यादृशसमभिव्याहारात्। भूतले घट इत्याकांक्षावशात्। नञ्
पदं विना यत्र धर्मिणि घटे। यस्य। भूतलवृत्तित्वस्य। विशेषणतया भानं भवति। तादृशसमभिव्याहारस्थले॥ भूतलेन घट इति समभिव्याहारस्थ ऐम
ले। नञ्सत्वे। तत्र। तस्मिन् घटरूपे धर्मिणि। तदभावः। भूतलवृत्तित्वाभावः। प्रतीयत इत्यनुभवापलापप्रसंगाच्चेत्यर्थः॥ ६ ॥ ६ ॥

एवञ्च ॥ न भूतले घट इति वाक्यात् घटो भूतलवृत्तित्वाभाववानिति बोधांगीकारे च सति ॥ नञर्थाभावेऽनुयोगितारूपभेदसंबन्धेन घ
टो भूतलवृत्तित्वाभाववानित्यन्वयबोधो न संभवति नामार्थयोरभेदान्वयबोधनियमादिति तादृशबोधोपपत्तये नामार्थयोरित्यादिव्युत्प
त्तिशरीरे निपातातिरिक्तत्वं विशेषणमावश्यकमित्यर्थः । निपातातिरिक्तेयेनाम नीतदर्थयोरभेदान्वयः प्रकृते च निपातत्वान्नञर्थेऽभावेऽनु
योगितारूपभेदसंबन्धेन घटान्वयो न विरुद्ध इति भावः । उक्तव्युत्पत्तौ निपातातिरिक्तत्वप्रवेशे युक्त्यन्तरमाह । एवं पूर्वोक्ततुल्ययोगक्षेमतया न पचति
चैत्रः चैत्रस्य न धनमित्यादौ पाककृतिचैत्रस्वत्वयोरभावस्य नञर्थस्य चैत्रधनादावनुयोगितया भेदसंबन्धेनान्वयबोधोपपत्तये तन्निपातातिरि

एवञ्च नञर्थाभावेऽनुयोगितया घटाद्यन्वयबोधोपपत्तये निपातातिरिक्तत्वविशेषणमावश्यकम् । एवं न पचति चैत्रः चैत्र
स्य न धनमित्यादौ पाककृतिचैत्रस्वत्वाद्यभावस्य नञर्थस्य चैत्रधनादावन्वयबोधोपपत्तये घटो न पट इत्यादौ नञर्थघटा
दिभेदस्यान्वयबोधोपपत्तये च तदावश्यकम् । न चोक्तस्थलेषु नञोऽभाववल्लाक्षणिकतयाऽभाववतासममनुयोगिनो भेदान्वय
बोधोपपत्तये इति वाच्यं ।

क्तत्वं विशेषणं नामार्थयोरिति व्युत्पत्तावावश्यकम् । एवं घटो न पट इत्यादौ घटे अनुयोगितया पटे प्रतियोगितया उभय
विधभेदसंबन्धेनान्वयबोधोपपत्तये च । तदावश्यकं । निपातातिरिक्तत्वविशेषणमावश्यकमित्यर्थः । पुनः शंकते । न चोक्तस्थलेष्विति । भूतले न पटः । न
पचति चैत्रः । चैत्रस्य न धनम् । घटो न पटः । इत्यादिषु भूतलवृत्तित्वाभाववान् पटः पाककृत्यभाववांश्चैत्रः चैत्रस्वत्वाभाववद्धनम् । पटप्रतियोगिकभेदाभाव
वान् घट इति शाब्दबोधसंभवात् नञोऽभाववति लक्षणया ऽभाववतासममनुयोगिनोऽभेदान्वयबोध एव तत्र तेषु स्थलेषु उपेयते न तु भेदान्व

योपि येनोक्तव्युत्पत्तौ निपातातिरिक्तत्वविशेषणं सफ
लं स्यादित्यर्थः ।

समाधत्ते॥ तथासतिसर्वत्राभाववतएवनञर्थतयामुख्यार्थपरनञोदुर्लभत्वापत्तेरितिमूलम्। तथासति। अभाववतिनञोलाक्षणिकत्वेसति। सर्वत्र। घटोनपटः अपटोघटः भूतलेनघटः अघटंभूतलमितिव्याससमासस्थलेसर्वत्रेत्यर्थः। अभाववतएवनञर्थतयामुख्यार्थनञोदुर्लभत्वापत्तेरिति। अनन्तानामभावानांशक्यतावच्छेदकत्वेगौरवादखण्डोपाधिरूपमभावत्वंशक्यतावच्छेदकंलघुभूतमुपेयंअभावरूपमुख्यार्थकनञश्चप्रयोगादर्शनादभावेशक्तेरसिद्धौशक्यसंबन्धरूपालक्षणापिनसंभवतीतिभूतलेनघटःचैत्रोनपचतिचैत्रस्यान्वयनंनघटोनपटः इत्यादिषुनञोऽभावपरताभ्युपेया॥ तथाचनामार्थयोः कथंभेदान्वयइत्युक्तव्युत्पत्तौनिपातातिरिक्तत्वविशेषणमावश्यकमितिभावः। ननुघटो

तथासतिसर्वत्राभाववतएवनञर्थतयामुख्यार्थपरनञोदुर्लभत्वापत्तेः। अभावस्यभेदान्वयबोधोपगमेपिकार्यकारणभावकल्पनाधिक्यविरहेणाभाववतिलक्षणानौचित्यात्। अभाववतोऽभेदान्वयबोधोपगमेभूतलेघटइत्यादिवाक्यजन्यबोधेभूतलेनघटइत्यादिवाक्यजन्यबोधस्याविरोधितापत्तेश्च॥

नेत्यनुयोग्यसमभिव्याहृतनञएवअभावपरत्वंसंभवतीत्यतआह ॥अभावस्येति॥ ननुमन्मतेजायमानस्याभाववत्ताग्रहस्यप्रतिबध्यतेतद्वत्ताज्ञानंअभावमुख्यविशेष्यकशाब्दबोधस्याविरोधित्वेनाभावमुख्यविशेष्यकशाब्दसामग्र्याप्रतिबन्धकत्वकल्पनंलक्षणानंगीकर्तुरधिकमित्याशंक्याह॥ कल्पनाधिक्यविरहेणेति। तथाचनिर्धर्मितावच्छेदकाभावबुद्धेरपिकुत्राप्यविरोधितयासाम्यादित्याशयः। भेदसंसर्गकनञर्थप्रकारकयोग्यताज्ञानस्यहेतुत्वकल्प राम
नमधिकमेवेत्यतआह। अभाववतइति। अविरोधितापत्तेश्चेति। बाधकमप्युक्तमित्यविरोधितापत्तिमुपपादयति॥ ६ ॥ ६ ॥ ७०

लाघवादिति॥ग्राह्याभावनिर्णयस्यैवेति॥भूतले घट इत्यत्र भूतलवृत्ति घट इति बोधात् ग्राह्यं भूतलवृत्तित्वं तदभावो भूतलवृत्तित्वाभावः तन्नि र्णयस्यैव भूतलवृत्तित्वाभाववानिति भूतलवृत्तित्वाभावप्रकारकघटविशेष्यकनिर्णयस्यैव न तु भूतलवृत्तित्वाभाववत्प्रकारकाभेदसं सर्गकघटविशेष्यकबोधस्येति भूतले न घट इति वाक्यात् भूतलवृत्तित्वाभावप्रकारकघटविशेष्यकबोध एवाङ्गीकर्तुमुचितः न त्वभाववत्त्वेनापीति नञोऽभावे शक्तिः सिद्धेति भावः॥नीलो घट इत्यादौ विशेषणविभक्तेरभेदार्थकत्वमतेपि यद्यप्युक्तरीत्या लाघवं संभवती तियथा राजस्वत्वाभाववान् पुरुषः सुन्दर इति प्रत्यक्षं प्रति षष्ठी स्वत्वार्थिकेति नव्यमते। राज्ञः पुरुष इति शाब्दसामग्र्याः प्रतिबन्धकत्वं नक

लाघवात्स्वरूपसंबन्धेन ग्राह्याभावनिश्चयस्यैव विशिष्टबुद्धिविरोधित्वान्न त्वभेदसंसर्गकग्राह्याभावाश्रयप्रकारक निश्चयस्येति। नीलो घट इत्यादौ विशेषणविभक्तेरभेदार्थकत्वमतेपि यद्यप्युक्तरीत्या लाघवं संभवति॥ ल्यते राजस्वत्वाभाव वान्पुरुष इति विशेष्यतावच्छेदकप्रकारकनिर्णयः प्रत्यक्षे कारणं स एव निर्णयः शाब्दबोधे बाधः। तादृशबाधाभावः शाब्दबोधे कारणम्। तथा च बाधतदभावयोर्युगपदवस्थानासंभवात् सामग्र्योर्मेलनं न संभवतीति न शाब्दसामग्री प्रत्यक्षे प्रतिबन्धिका तथा नीलाभेदाभाववान् घटः प्रमेय इति प्रत्यक्षेपि नीलाभेदाभाववान् घटः इति विशेष्यतावच्छेदकप्रकारकनिर्णयः कारणं स एव च नीलो घट इति वाक्यजन्ये नीलाभेदवान् घट इति शाब्दबोधे बाधः तस्य बाधस्याभावः शाब्दबोधे कारणमिति प्रत्यक्षशाब्दसामग्र्योः बाधतदभावघटितयोर्यौगपद्यासंभवात् न शाब्दसामग्री प्रत्यक्षे प्रतिबन्धिकेत्युक्तरीत्यस्यार्थः। यथा राज्ञः पुरुष इत्यत्र स्वत्वं संसर्गः षष्ठी निरर्थिका राजवान् पुरुष इति शाब्दधीः षष्ठ्यन्तराजपद

नि टि ष्टि ष्टि नि टि षि षि

मकत्वाच्चनराजापुरुषइत्यत्रस्वत्वसंसर्गकराजवान्पुरुषइतिबोधापत्तिः॥नवानामार्थयोरभेदान्वयानुपपत्तिरितिवदतः प्राचीनमतेराज
पदस्यराजसंबन्धिनिस्वारसिकलक्षणाग्रहदशायांराजसंबन्धिप्रकारकबोधआवश्यकः तथाचनीलोघटइत्यत्रापिविशेषणविभक्ति
रप्यभेदबोधकतयाषष्ठीवत्सार्थिकेत्युक्तरीत्येत्यर्थः॥इष्टापत्त्यासमाधत्ते।तथापितत्रापिननोविद्वेषइतिदिगिति।तथापिप्रतिबन्ध्यप्रतिबंध
कभावस्यत्वेउक्तरीत्यालाघवसंभवेपि॥तत्रापिप्रतिबन्धकतालाघवलभ्यविशेषणविभक्त्यभेदार्थकत्वेपि॥नः॥अभेदसंसर्गतावादीनामस्माकम्।
युक्तिबलात्सवस्त्वसिद्धौनविद्वेषइतिभावः॥इतिव्युत्पत्तिवादेनामार्थान्वयबोधविवरणम्॥अथप्रत्ययार्थंनिरूपयितुमाह।प्रत्ययाश्चेति।तद्दि

तथापितत्रापिननोविद्वेषइतिदिक्।प्रत्ययाश्चविभक्तिकृत्तद्धितादिभेदेननानाविधाः।विभक्तिश्चसुप्तिङ्भेदेनद्विविधासुबि
भक्तयःप्रथमाद्वितीयादयःसप्त।तत्रप्रथमार्थःप्रकृत्यर्थेविशेषणविधयान्वयिनीसंख्यैव। ((तादीत्यादिनाक्यच्काम्यच्सनादिप

रिग्रहः।तत्रप्रथमार्थःप्रकृत्यर्थेविशेषणविधयान्वयिनीसंख्यैवेति।नीलोघटोनास्तीत्यादिनीलादिसमभिव्याहृतप्रकृत्यर्थेघटादिःनीलाभिन्ने
कघटप्रतियोगिकोअभावइतिबोधात्।तत्र।सप्तविभक्तिमध्ये।संख्यैवेत्येवकारेणसंख्यातिरिक्तार्थव्यवच्छेदः।अन्यथातण्डुलंपचतीत्यत्रद्वि
तीयार्थएकत्वंकर्मत्वंतत्रएकत्वविशिष्टतण्डुलनिष्ठाकर्मताइतिबोधात्यथाएकत्वंप्रकारएवनतुविशेष्यंतथासंख्यातिरिक्तार्थस्वीकारेत्स्यैव
विशेष्यतयाभानंस्यान्नत्वेकत्वस्य।घटइत्यत्रनीलादिपदान्तरासमभिव्याहारेघटइतिएकत्वमित्येवानुभूयतेनत्वेकत्ववान्घटइतितथासति
घटत्वादिवदेकत्वस्यापिप्रकृत्यर्थत्वंस्यादितिप्रथमानिरर्थिकैवस्यादितिवैयाकरणमतप्रवेशइतिभावः।घटइतिएकत्वमितिबोधमुपपादयति॥

अत एवेति। अत एव संख्यामात्रस्य प्रथमार्थत्वादेव। मात्रपदेन संख्यातिरिक्तार्थव्यवच्छेदः। अतिरिक्तार्थत्वे घटमित्यत्र एकत्वविशिष्टघटवृत्ति कर्मता इति वदेकत्वस्य विशेषणत्वं स्यान्नत्वेकत्वस्य कुत्रापि विशेष्यत्वमिति भावः। प्रथमार्थत्वादेवेत्येवकारेण प्रकृत्यर्थत्वव्यवच्छेदः प्रकृत्यर्थत्वे प्रकृत्यर्थतावच्छेदकघटत्वादिवत् एकत्वमपि सर्वत्र विशेषणतयैव भासेत न तु विशेष्यतया। तथा च नीलादिपदासमभिव्याहृतकेवलं घट इत्यत्रापि घटवृत्त्येकत्वमिति बोधो न स्यादित्यर्थः। प्रथमार्थत्वे तु एकत्वस्य मुख्यविशेष्यतया भानमुपपद्यते इति भावः। न च एकत्वादिवाचकत्वं तत् एकवचनत्वं सुवच

अत एव यत्र विशेष्यवाचकसमानविभक्तिकं पदं निपातपदं वा नास्ति तत्र प्रथमान्तार्थस्य विशेष्यभासकसामग्र्यभावात् सौ मुख्यविशेष्यतयैव भासते। संख्यायां च एकवचनद्विवचनबहुवचनानामेकत्वत्वद्वित्वत्वबहुत्वत्वावच्छिन्नायां शक्तिः शक्तता च सु औ जस्त्वादिना न तु स्त्वादिति बादिसाधारणैकवचनत्वादिना एकवचनत्वादेर्दुर्वचत्वात् न चैकत्वादिवाचकत्वं तत् वाचकतायाः शक्ततावच्छेदकत्वे आत्माश्रयात्। बोधकतारूपत्वे शक्तिभ्रमेण द्विवचनादीनामपि एकत्वबोधकतया अतिप्रसक्तत्वात्॥

मिति शंकितां समाधत्ते॥ वाचकतायाः। एकत्ववाचकतायाः॥ शक्ततावच्छेदकत्वे आत्माश्रयप्रसंगात्। शक्तताज्ञाने शक्ततावच्छेदकज्ञानं कारणं शक्ततावच्छेदकश्च एकवचनत्वमेव तच्च शक्ततारूपमेवेति स्वज्ञाने स्वज्ञानापेक्षया आत्माश्रयप्रवेशादित्यर्थः। आत्माश्रयमुद्धरति बोधकतारूपत्व इति। वाचकत्वं यदि शक्तत्वरूपं तदात्माश्रयः यदि एकत्वं बोधकत्वरूपं तदा घटावित्यादावेकत्वे द्विवचनशक्तिभ्रमकाले लक्षणाग्रहकाले वा द्विवचनादीनामपि एकत्वबोधकतयाऽतिप्रसक्तत्वादित्यर्थः।

अतिप्रसक्तो हि धर्मीनावच्छेदक इति। नचैकवचनत्वादिकं जातिविशेष इति॥ सुरभिपदघटकसुभोगे सुत्वन्तत्रैकवचनत्वं नास्ति एकवचनत्वं घटमित्यत्र वि
भक्तौ तत्र सुत्वं नास्ति सुत्वमेकवचनत्वञ्चोभयं रामइत्यत्रास्तीति सांकर्यादित्यर्थः। नचेत्यारभ्यवाच्यमित्यन्तेन ग्रन्थेन शंकते॥ नचेति। तत्। एकवचन
त्वं। तद्ज्ञानदशायां। शक्तिसंबन्धेन एकवचनपदवत् सुअम् इत्यादिकमिति ज्ञानं प्रमात्मकं तद्ज्ञानदशायां सुपदं एकत्वे शक्तं इति शक्तिभ्रम एव तस्मा
देव शाब्दबोधोपपत्तिरित्यर्थः एकवचनादिशब्दस्येति॥ शंकामध्ये शंकातु न कर्तुमर्हा॥ एकवचनमिति समुदायोरूढ्या स्वादिबोधको न त्वेकं वक्तीतियु

नचैकवचनत्वादिकं जातिविशेषः। सुत्वादिना संकरात्। नच शक्तिसंबन्धेन एकवचनादिपदवत्त्वं तत्। तादृशज्ञानदशायां चस्व
त्वादिना शक्तिभ्रमादेव शाब्दबोधः एकवचनादिशब्दस्य पदद्वयात्मकतया तादृशसमुदायशक्तेरेवाप्रसिद्धिरिति तु नाशंकनीयम्
। एकं वक्तीत्यादि व्युत्पत्त्या एकवचनादिशब्दस्य स्वादिबोधकत्वे एकादिशब्देपि तादृशव्यवहारापत्तेः। एकवचनादिशब्दस्य स्वादौ
रूढिस्वीकारस्यावश्यकत्वादिति वाच्यम्। ग्रन्थकारीयसंकेतेनैवोपपत्तौ एकवचनादिपदे शक्तेरप्रामाणिकत्वात्। तान्येकवचन
द्विवचनइत्यादि पाणिनिसूत्रस्य तदीयसंकेतग्रहपरतयाप्युपपत्तेः॥

त्पत्त्या एकवचनमिति समस्तं वाक्यमपि स्वादिबोधकमेकशब्देप्येकवचनव्यवहारापत्तेरिति शंकाग्रन्थार्थः। समाधत्ते। ग्रंथकारीयेति॥ पाणिन्यादि
मुनीनामेकवचनपदेन स्वादिर्बोध्या इतीच्छाविशेषरूपः संकेत एव एकवचनपदेस्ति न त्वीश्वरेच्छारूपा शक्तिरप्रामाणिकत्वादित्यर्थः। ननु व्याकरणेशक्ति
ग्राहकं न स्यादत आह। तान्येकवचनद्विवचनेइत्यादीति। द्विवचनार्थो द्वित्वं बोध्यमिति पाणिनीयसंकेत एव न तु शक्तिरित्यर्थः।

तत्र दृष्टान्तमाह। नहि यूस्त्र्याख्यौ नदीत्यनुशासनादिति॥ स्त्र्याख्ये स्त्रीवाचके इकारान्ते शब्दे गंगादिनदीवाचकनदी ------ पदस्य यथा गंगायाः संकेतस्त
था एकवचनपदेपीत्यर्थः॥ अत्र ग्रन्थान्तरसंमतिमाह। अत एव नद्यादिसंज्ञा इति॥ आधुनिकविषयसंकेतशालित्वात् टिघुभादिसंज्ञा ------
इव नद्यादिसंज्ञाऽपि पारिभाषिक्यः पाणिन्यादिकृताः सांकेतिका एवेत्यर्थः। न त्वौपाधिकीति॥ जात्युपाधी नैमित्तिकसंज्ञे स्त इति सूत्रं जात्यवच्छिन्नवाचकत्वमुपाध्यव
च्छिन्नवाचकत्वं वा नैमित्तिकसंज्ञात्वमिति तदर्थात् जात्यवच्छिन्नवाचकत्वस्वरूपनैमित्तिकसंज्ञात्वं टिघुभादिबोध्येषु न जातमित्यर्थ इति भावः। शंकते। अथैवं

नहि यूस्त्र्याख्यौ नदीत्यनुशासनात् स्त्र्याख्यय इदृदं तादृशशब्देन नद्यादिपदस्य शक्तिः सिद्ध्यति किन्तु तदीयसंकेततयाप्युपपत्तेः
अत एव नद्यादिसंज्ञा आधुनिकसंकेतशालित्वात्पारिभाषिक्येव न त्वौपाधिकी। अथैवमपि पाणिनिसंकेतसंबंधेन तादृशपदवत्त्व
मेव एकत्वादिशक्ततावच्छेदकमस्त्विति चेत्। तादृशसंकेतस्य केन रूपेण संबन्धता। संकेतत्वेनेति चेत्तर्हि कस्यचित्सुंस एक
वचनपदात् सुभोजसादिर्बोद्धव्य इत्याकारकसंकेतस्यापि संभवादतिप्रसक्तिर्दुर्वारैव। पाणिनिसंकेतत्वेन तथेति चेत्तर्हि
व्याकरणान्तरप्रणेतुः पुरुषान्तरस्यापि तादृशसंकेतस्य संभवात्तदीयसंकेतसंबन्धेन तत्पदवत्त्वस्य॥ ६ ॥ ६ ॥

वमपीति॥ एकत्वादौ एकवचनपदे शक्तेरप्रामाणिकत्वेपीत्यर्थः। त्वदुक्तपाणिनिसंकेतसंबंधेन एकवचनत्वमेवैकत्वादिशक्ततावच्छेदकमित्य
र्थः। समाधत्ते। तादृशसंकेतस्येति। अतिप्रसक्तिर्दुर्वारैवेति। अतिप्रसक्तौ धर्मो नावच्छेदक इत्यर्थः। पाणिनीयसंकेतसंबंधेन तथा संबंधतेति
चेत् तर्हि व्याकरणप्रणेतुः पाणिनिभिन्नपुरुषस्यापि पाणिनिसंकेतसंभवात् पुरुषान्तरीयसंकेतसंबन्धेन तत्पदवत्त्वस्य पुरुषान्तर ॥ ६ ॥

संकेतितनयत्किंचित्पदवत्त्वस्यवाएकत्वंशक्ततावच्छेदकंसंके तभेदेनैवशक्ततावच्छेदकभेदेनापिशक्तिभेदमाह॥ङित्यादिपदादिति॥ङित्यादि
पदात्स्वौजसादिर्बोद्धव्यः इत्याकारकपुरुषविशेषसंकेतसंबन्धेनङित्यादिपदवत्त्वस्यवाविनिगमनाविरहेणएकत्वशक्ततावच्छेदकत्वमितिगौर
वात्तथाचागत्याशक्तिसंबन्धेनंपाणिनिसंकेतसंबन्धेनवाएकवचनपदवत्त्वमेकत्वादिशक्ततावच्छेदकमित्याद्युक्तगतिविरहेणआनुपूर्वीविशे

ङित्यादिपदात्सुऔजसादिर्बोद्धव्यइत्याकारकपुरुषविशेषसंकेतसंबंधेनङित्यादिपदवत्त्वस्यवाविनिगमनाविरहेणशक्तता
वच्छेदकताप्रसंगस्तथावागत्याआनुपूर्वीविशेषएवशक्ततावच्छेदकइति।यत्तुसंख्यापिप्रकृतेरर्थः एकवचनादिकंचए
कत्वाद्यर्थेतात्पर्यग्राहकमेव-नचैवमेकप्रकृत्युपस्थाप्ययोरर्थयोः परस्परमन्वयेआकांक्षाविरहात्घटादावेकत्वाद्यन्वयानु
पपत्तिः अन्यथाहर्यादिपदादुपस्थितयोरश्वसूर्ययोराधाराधेयभावेनान्वयापत्तिः घटादिपदस्यएकत्वादिविशिष्टस्यघटा
दौचनशक्तिसंभवः घटरूपंपश्येत्यादौसंख्यानवच्छिन्नघटादेरेवान्वयबोधादितिवाच्यम्।आकांक्षावैचित्र्यादेकप्रकृत्युपस्थाप्ययो
रपिघटैकत्वाद्योः परस्परमन्वयसंभवात्॥((॥षएवसुत्वऔत्वजस्त्वादिरूपएवशक्ततावच्छेदकमित्यर्थः।यत्त्विति।शंकते।नचैवमिति।संख्या
याअपिप्रकृत्यर्थत्वंइत्यर्थः।एकप्रकृत्युपस्थाप्ययोरर्थयोः परस्परान्वयबोधेआकांक्षानास्तिकिन्तुभिन्नपदोपस्थाप्ययोरेव॥अन्यथेतिएकपदोपस्था
प्ययोरप्यर्थयोरन्वयबोधेआकांक्षासत्त्वेहरिरित्यतोप्यश्वारूढः सूर्यइतिबोधापत्तेरित्यर्थः।घटपदस्यचेकत्वविशिष्टघटेनशक्तिः घटरूपंपश्येत्यादम
दौएकघटनिष्ठरूपमितिबोधाभावात्॥समाधत्ते॥अकांक्षावैचित्र्यादिति।तथाचहरिरित्यादौअश्वारूढः सूर्यइत्यननुभवाभावात्॥ ६ ॥ ६ ॥

एकपदार्थयोरन्वयेपि घट इत्यादावेको घट इत्यनुभवादाकांक्षा च कल्प्यते। अत एवेति। एकपदोपस्थाप्ययोरप्याकांक्षासत्त्वादेव। अन्ययोगः व्यव
च्छेदश्च एवकारार्थः। तयोः परस्परान्वयः पार्थ एव धनुर्धर इत्यादौ पार्थ इत्यादौ पार्थभिन्ने धनुर्धरत्वयोगप्रतियोगिकाभावप्रतीतेरित्यर्थः। नचैवं
कर्मत्वादिकमपि प्रकृत्यर्थ एवेति॥ एवं प्रत्ययार्थस्यापि प्रकृत्यर्थत्वांगीकारे॥ किं तत्र कर्मत्वे द्वितीया शक्तेति शंका ग्रन्थः। समाधत्ते। नामार्थधात्व
र्थयोरिति। तेन नामार्थेन सम्बन्धात्वर्थस्याभेदान्वयो न संभवतीति कर्मत्वं द्वितीयार्थ इत्यर्थः। पुनः शंकते। नच संख्यायाः प्रातिपदिकार्थत्वे ता

अत एव खण्डशक्त्यैव कारादुपस्थाप्ययोरन्ययोगव्यवच्छेदाद्योः परस्परमन्वयबोधः नचैवं कर्मत्वादिकमपि प्रकृत्यर्थ एवास्तु किं
तत्र द्वितीयादिशक्त्येति वाच्यम्। नामार्थधात्वर्थयोः साक्षाद्भेदान्वयबोधस्याव्युत्पन्नतया कर्मत्वादेर्नामार्थत्वे तेन समं धात्वर्थान्व
यासंभवात्। नच संख्यायाः प्रातिपदिकार्थत्वे सति तात्पर्यज्ञाने विनैव शक्तिभ्रमं लक्षणाग्रहं च द्विवचनाद्यन्तपदादेकत्वादिबो
धसंभवात्। एकत्वादितात्पर्येण एकवचनान्तस्येव द्विवचनान्तस्यापि पदस्य स्वारसिकप्रयोगापत्तिरिति वाच्यम्।

तात्पर्यज्ञाने सति विनैव शक्तिभ्रमं लक्षणाग्रहं च द्विवचनाद्यन्तपदादेकत्वबोधसंभवादिति मूलम्। द्विवचनस्य एकत्वे शक्तिभ्रमकाले द्विवचनस्यै
कत्वे लक्षणाग्रहकाले च एकत्वबोधे इष्टापत्तेराह। विनैव शक्तिभ्रमं लक्षणाग्रहं चेति। तथा च द्विवचनान्तत्वज्ञानस्य प्रतिबन्धकताकल्पने गौरवेण
एकत्ववाचकप्रकृतिसत्त्वात् द्विवचनबहुवचनान्तस्थलेपि एकत्वभ्रमापत्तेरित्यर्थः। द्विवचनान्तस्यापि पदस्य स्वारसिकप्रयोगापत्तिरिति वाच्य
मिति। स्वारसिकः सकलजनसाधारणप्रयोगस्तदापत्तिरिति न संख्या तदर्थेत्यर्थः॥॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

सु॰टी॰ समाधत्ते। अनादितात्पर्यस्यैव स्वारसिकप्रयोगमूलत्वादिति। तथा च स्वारसिकप्रयोगे एकत्वार्थकपदसत्त्वं न नियामकं किन्त्वनादितात्पर्यमेव
७४ नियामकं द्विवचनाद्यन्तपदस्य एकत्वाद्यवनादितात्पर्यविरहेण द्विवचनाद्यन्तपदादेकत्वबोधरूपातिप्रसंगविरहादित्यर्थः। ननु प्रयोगमूला
भूतशक्तिग्रहप्रयोजकतयैव व्याकरणसार्थक्यं तच्च न संभवति अनादितात्पर्यस्यैव प्रयोगमूलत्वोक्तेरत आह॥ द्व्येकयोर्द्विवचनैकवचने
इत्याद्यनुशासनञ्च तादृशार्थे तात्पर्यग्राहकमेवेतीति। द्व्येकयोरिति भावप्रधानो निर्देशः वाचकत्वं सप्तम्यर्थस्तथा च द्वित्वैकत्ववाचके द्वि

अनादितात्पर्यस्यैव स्वारसिकप्रयोगमूलत्वात्। एकवचनाद्यंतपदस्यैव एकत्वाद्यवनादितात्पर्योपगमेनातिप्रसंगविरहा
त्। द्व्येकयोर्द्विवचनैकवचने इत्याद्यनुशासनं च तादृशतात्पर्यग्राहकमेवेति वैयाकरणमतम्। तद[illegible]। अनंतानां प्रकृत्यानुपू
र्वीणां शक्ततावच्छेदकत्वापेक्षया अल्पतरविभक्त्यानुपूर्वीणामेकत्वादिशक्ततावच्छेदकस्यैवोचितत्वात्। न च प्रातिपदिक
त्वमेव शक्ततावच्छेदकं न तु घटपदत्वादिकमिति न शक्त्यानन्त्यमिति वाच्यम्। १ वचनबहुवचने भवतः। इत्येवंरीत्या व्याकरणं शक्ति
ग्राहकं न भवति किन्तु तादृशार्थे एकवचनान्तप्रकृतेरेकार्थकत्वं द्विवचनान्तप्रकृतेर्द्वित्वार्थकत्वं द्व्येकयोरित्यनुशासनमनादितात्पर्यग्राहकमे
वेत्यर्थः। वैय्याकरणमतं दूषयति। तदसदिति। अनन्तानामिति। प्रकृतयः प्रत्ययानुपूर्व्यो बहुतरास्तदपेक्षया विभक्तयः स्वल्पा इति विभक्त्या
नुपूर्व्याः अल्पा इति तादृशशक्ततावच्छेदका इति विभक्तेरेव एकत्वमर्थो न तु प्रकृतेरेकत्वमर्थ इत्यर्थः। स्वादिविभक्तय एकविंशतिगणिताः रम
एवं तिबादिविभक्तयोऽपि गणिताः प्रातिपदिकानि त्वनन्तानीति भावः। शंकते। न चेति। प्रातिपदिकत्वं सर्वप्रातिपदिकेषु एकमेव एकत्वं श ७४

समाधत्ते। प्रातिपदिकत्वस्य। घटपदादिसाधारणस्यैकस्य दुर्वचत्वादित्यर्थः॥ ननु प्रातिपदिकत्वमखण्डोपाधिरत आह। तदज्ञानेपीति॥ घटः प्रातिपदिकं भवतीति ज्ञानाभावेपि घटइत्यादितः एकत्वबोधादित्यर्थः॥ पदत्वेन वर्णत्वेन वा शक्तत्वे विभक्तेरपि तद्वाचकतासिद्धेरिति मूलम्॥ विभक्तावपि शक्ततावच्छेदकरूपपदत्वस्य वर्णत्वस्य सत्त्वात् विभक्तावप्येकत्ववाचकत्वसिद्धौ विभक्तावेकत्वबोधकत्वाभावसाधनाय प्रवृत्तस्य वैयाकरणस्यार्थान्तरदोषापादनादिति भावः। वैयाकरणमते दोषान्तरमप्याह। एकत्वादिशाब्दबोधात्सूर्वं वर्णत्वाद्युपस्थितेरप्यनावश्यकत्वाच्चेति। घटइत्यादित एक

प्रातिपदिकत्वस्य दुर्निर्वचत्वात्। तदज्ञानेपि एकत्वादिज्ञानस्यानुभविकत्वात्। पदत्वेन वर्णत्वेन वा शक्तत्वे विभक्तेरपि तद्वाचकतासिद्धेः एकत्वादिशाब्दबोधात्सूर्वं वर्णत्वाद्युपस्थितेरप्यनावश्यकत्वाच्च। फलानुरोधेन तत्कल्पने च कल्पनागौरवात्। एवमानुपूर्वीभिन्नस्य वाचकतावच्छेदकत्वे घटपदं सुपदं च न संख्यावाचकमिति विपरीतनिश्चयकालेपि तादृशधर्मावच्छिन्नस्य वाचकताग्रहसंभवात्॥

((त्वशाब्दबोधे घोतरटत्वरूपानुपूर्वीज्ञानमेव पदार्थोपस्थितिद्वारा कारणं न तु पदत्वावच्छिन्नवर्णत्वाद्यवच्छिन्नज्ञानमपीत्यर्थः। फलानुरोधेनेति। एकत्वशाब्दबोधानुरोधेन। पदत्ववर्णत्वज्ञानं हेतुताकल्पनाधिक्येन गौरवादित्यर्थः। दोषान्तरमप्याह। एवमानुपूर्वीभिन्नधर्मस्येति॥ प्रातिपदिकत्ववर्णत्वादिरूपस्यानुपूर्वीभिन्नधर्मस्यैकत्ववाचकतावच्छेदकत्वे घटपदमिति वैयाकरणमताभिप्रायेण सुपदमिति नैयायिकमताभिप्रायेणोक्तं न संख्यावाचकमिति बाधनिश्चयकालेपि तादृशधर्मावच्छिन्नस्य प्रातिपदिकत्वावच्छिन्नस्य वर्णत्वाद्यवच्छिन्नस्य च वाचकताग्रहसंभवात् घटपदं सुपदं न संख्यावाचकमिति बाधज्ञानं घटपदं सुपदं संख्यावाचकमिति

व्यु·टी· ज्ञानंविरुणद्धिनतुप्रातिपदिकंसंख्यावाचकमितिज्ञानंविरुणद्धिग्राह्याभावानवगाहित्वादित्यर्थः।घटपदंनसंख्यावाचकमितिबाधज्ञानकाले
७५ घटइत्यतःसंख्याबोधोनजायतेसस्यादित्यर्थः।शंकते।अथविभक्तीनांसंख्यार्थकतामतेइति।नयोः।प्रकृतिविभक्त्योः।समभिव्याहाररूपा
कांक्षाज्ञानस्यघटादिविशेष्यकैकत्वादिप्रकारकशाब्दंप्रतिकारणताधिकाविभक्तेःसंख्यार्थकतामतेघटपदाद्येकप्रकृत्याभिन्नशक्तिभ्यामुपस्थापित
योर्घटैकत्वयोरेवकारस्यरुवत्शाब्दस्वीकारेचनप्रकृतिविभक्तिसमभिव्याहाररूपाकांक्षाज्ञानस्यतत्रघटादिविशेष्यकैकत्वप्रकारकशाब्देहेतुताक

घटइत्यादौसंख्यायाबोधापत्तिः।अथविभक्तीनांसंख्यार्थकतामतेप्रकृतिविभक्त्योरेकवाक्यताविरहनिश्चयदशायां
विभक्त्युपस्थाप्यैकत्वादेःप्रकृत्यर्थेन्वयबोधवारणायतयोःसमभिव्याहारज्ञानस्यघटादिविशेष्यकैकत्वान्वयबोधंप्रतिका
रणत्वमधिकंकल्पनीयम्।एकपदोपस्थापितयोःघटैकत्वयोरन्वयबोधोपगमेचनसमभिव्याहारज्ञानस्यतत्रहेतुताक
ल्प्यतेइतिलाघवात्प्रकृत्याद्यानुपूर्वीणांसंख्यावाचकतावच्छेदकत्वमुपेयतइतिचेन्न।आकांक्षाविचारेसमभिव्याहारा
कांक्षाज्ञानस्यहेतुतायानिराकृतत्वात्॥ ९ ॥

॥ल्प्यतेइतिलाघवात्प्रकृत्यानुपूर्वीणांसंख्यावाचकतावच्छेदकत्वमंगीक्रियतेइ
तिशंकाग्रंथः।समाधत्ते॥आकांक्षाविचारेसमभिव्याहाररूपाकांक्षाज्ञानहेतुतायानिराकृतत्वादिति।यत्पदार्थस्ययत्पदार्थेनसमानान्वयबोधोविवक्षि
तःतयोःपदयोःपरस्परसमभिव्याहारआकांक्षाइतितात्पर्यगर्भाकांक्षासाचतात्पर्यघटिताइतितात्पर्यज्ञानकारणतयैवशाब्दबोधनिर्वाहेघटइत्या राम
दौघटपदोत्तरसुत्वरूपसमभिव्याहाराकांक्षाज्ञानहेतुतायानिराकृतत्वादित्यर्थः॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ९ ॥ ७५

तथाचविभक्तीनांसंख्यार्थकतामतेपिसमभिव्याहारज्ञानकारणताकल्पनंनास्तीतिनाधिकमितिभावः।तात्पर्यज्ञानहेतुतायामेवशंकते॥अथैवमिति॥विभक्तिसमभिव्याहृताप्रकृतिर्वाप्रकृतिसमभिव्याहृताविभक्तिर्वासंख्याप्रकारकान्वयबोधपराइतितात्पर्यज्ञानकारणताद्वयम्॥विभक्तेर्द्योतकत्वेतुविभक्तौतात्पर्यविरहेणप्रकृतिधर्मिकमेवतात्पर्यज्ञानन्तादृशशाब्दधीहेतुरेकत्वप्रकारकघटविशेष्यकशाब्दधीहेतुरितिशंकाग्रन्थः॥समाधत्ते॥विभक्तेःसंख्यावाचकत्वविरहेपीति॥प्रकृतिविभक्त्योरानुपूर्वीज्ञानस्यैवतादृशान्वयबोधेएकत्वप्रकारकशाब्द

अथैवमपिविभक्तेःसंख्यार्थकत्वेविनिगमनाविरहेणप्रकृतिधर्मिकस्यविभक्तिधर्मिकस्यचसंख्याप्रकारकान्वयबोधपरत्वज्ञानस्यहेतुताकल्पनीया।विभक्तेर्द्योतकत्वमतेतुविभक्तौतात्पर्यविरहेणप्रकृतिधर्मिकमेवतात्पर्यज्ञानंतादृशान्वयधीहेतुरितिलाघवमितिचेन्नविभक्तेःसंख्यावाचकताविरहेपिप्रकृतिविभक्त्योरानुपूर्वीज्ञानस्यतादृशान्वयबोधहेतुतायानिर्विभक्तिकादिपदज्ञानादन्वयबोधवारणायावश्यकल्पनीयतयासंख्यावाचकप्रकृतेरिवतद्वाचकविभक्तेरपिसंख्यान्वयबोधकत्वप्रकारकेच्छाविषयत्वरूपतादृशबोधपरत्वसंभवेनविभक्तिधर्मिकतज्ज्ञानहेतुतायाविनिगमनाविरहेणावश्यकत्वात्

बोधेहेतुतायाघटेनिर्विभक्तिकादिपदज्ञानादन्वयधीवारणायावश्यकल्पनीयतयासंख्यावाचकप्रकृतेरिवसंख्यावाचकविभक्तेरपिएकत्वसंख्याप्रकारकान्वयबोधजनकप्रकारकेच्छाविषयत्वरूपएकत्वप्रकारकशाब्दबोधपरत्वसंभवेनविभक्तिधर्मिकप्रकृतिसमभिव्याहारज्ञानहेतुतायाअपिविनिगमनाविरहादावश्यकत्वादित्यर्थः॥

मु॰टी॰ प्रकृतेःसंख्यार्थत्ववादीभूयःशंकते॥अथेत्यादिमेवमित्यन्तेनग्रन्थेन॥अथेति॥घटादिरूपप्रकृतेस्तत्रएकत्वेलक्षणाघटेतुशक्तिरेकोघटइत्यनुभव
७९ बलाद्युगपद्वृत्तिद्वयविरोधेमानाभावइतिभावः॥तादृशविभक्तेः।प्रकृतिसमभिव्याहृतविभक्तेःसंख्यायांलक्षणाकिंवाविभक्तिसमभिव्याहृतप्रकृते
र्वासंख्यायांलक्षणेतिविनिगमकन्दुर्लभंतथाचात्रकर्मत्वन्द्वितीयार्थःघटश्चप्रकृत्यर्थइतिकुत्रापिलक्षणानेतिभावः।शङ्कामध्येशंकते॥नचेति
॥एकत्वप्रकारकघटविशेष्यकशाब्दबोधेघटपदाद्यनेकज्ञानजन्यैकत्वोपस्थितित्वेनानन्तहेतुताकल्पनमपेक्ष्यप्रातिपदिकापेक्षयास्व

॥अथसंख्यावाचकत्वकल्पनापेक्षयाप्रकृतेस्तत्रलक्षणैवोचिताशक्यलक्ष्ययोःपरस्परमन्वयोपगमेक्षतिविरहा
त्।प्रथमाविभक्तेःकुत्रापिशक्तेरक्लृप्ततयातस्याःशक्यसंबन्धरूपलक्षणानसंभवति।द्वितीयादेःकर्मत्वादौशक्तत्वेपिता
दृशविभक्तेस्तत्समभिव्याहृतप्रकृतेर्वासंख्यायांलक्षणाइत्यत्रविनिगमकंदुर्लभं।नचैकत्वाद्यन्वयबोधेघटपदादिज्ञा
नजन्योपस्थितित्वेनानन्तहेतुताकल्पनमपेक्ष्यस्वादिपदज्ञानजन्यतदुपस्थितित्वेनकतिपयहेतुताकल्पनायांलाघवा
त्कतिपयशक्तिकल्पनेगौरवमकिंचित्करम् सामान्यतःपदवृत्तिज्ञानजन्यतदुपस्थितित्वेनैककारणताकल्पनन्तुनसम्यक्।

न्यतरस्वादिपदज्ञानजन्यैकत्वोपस्थितित्वेनकतिपयहेतुताकल्पनायांलाघवात्।स्वल्पतरविभक्तिभेदेनकतिपयशक्तिकल्पनेगौरवमकिं
चित्करमितिस्वादिविभक्तीनांसंख्यावाचकत्वंयुक्तमित्यर्थः।नचेतिशंकामुद्धरति।सामान्यतःपदत्वेनपदवृत्तिज्ञानजन्यैकत्वोपस्थितित्वेनए राम
कैवकारणतास्तुनतुघटपदादिज्ञानजन्यैकत्वोपस्थितित्वेनकारणताकल्पनंयेनपदनिवेशनप्रयुक्तंगौरवंस्यादितिपदत्वंशक्तत्वन्तच्चे ७९

[illegible]

नचेतिवादीविभक्तेः संख्यार्थइतिभूयः साधयितुमाह। निर्विभक्तिककुंभपदादितः लक्षणया संख्योपस्थितौतदगृहीतवृत्तिकघटादिपदेनगृहीतवृत्तिकंयत्घटादिपदन्तस्मिन्सुअमटादिरूपतत्तद्विभक्त्यन्तत्वज्ञानवतःपुंसः संख्यान्वयबोधप्रसंगादितिनिर्विभक्तिककुंभपद्वृत्तिज्ञानजन्याएकत्वोपस्थितिरस्ति॥ अथसुविभक्तिसमभिव्याहृतंघटपदज्ञानञ्चवर्त्ततेइतिघटपदवृत्तिज्ञानजन्यैकत्वोपस्थितिविरहकालेपिभवदुक्तकारणबलादेकत्वबोधःस्यादित्यापत्तिवारणायघटपदपटपदादिज्ञानजन्यैकत्वोपस्थितिश्चतयोःपरस्परसहकारेणएकत्वप्रकारकशाब्दबोधरूपफल

निर्विभक्तिककुंभपदादित्तः संख्योपस्थितौतदगृहीतवृत्तिकघटादिपदेतद्विभक्त्यं तत्वज्ञानवतःपुंसोघटादौसंख्यान्वयबोधप्रसंगात् घटपदादिज्ञानजन्यैकत्वाद्युपस्थितित्वेनैकत्वादिविषयकशाब्दबोधहेतुतांकल्पयित्वाविभक्तिघटादिपदानुपूर्वीज्ञानतादृशोपस्थित्योः परस्परसहकारेणफलजनकतायाअवश्याभ्युपेयत्वादितिवाच्यम्। घटादिपदस्यैकत्वादौलक्षणाग्रहसत्वेघटः प्रमेयइत्यादिवाक्यादेकत्वंप्रमेयमित्याद्यन्वयबोधस्यसर्वसंमततयातदनुरोधेनैकत्वादिविषयकशाब्दबोधेघटादिपदजन्यैकत्वाद्युपस्थितित्वेनहेतुतायाःसर्वसंमतत्वात्॥

जनकतायाआवश्यकत्वात्। तथाचघटादिपदभेदनिवेशगौरवापेक्षयाविभक्तेरेवलाघवात्संख्यावाचकत्वमुचितमितिनचेतिवाच्यमित्यन्तशङ्काग्रन्थाशयः। अथेतिपूर्वपक्षीवैयाकरणोभूयः प्रकृतेः संख्यावाचकत्वेयुक्तिमाह। घटादिपदस्यैकत्वादौलक्षणाग्रहसत्वेघटः प्रमेयइत्यादिवाक्यादेकत्वंप्रमेयमित्याद्यन्वयबोधस्यन्यायव्याकरणोभयमतसिद्धतयातदनुरोधेनलक्षणास्थलेयथाघटपदादेकत्वबोधस्तथाशक्यस्थलेपिघटपदादेकत्वबोधःस्यादित्यनुरोधपदार्थः॥ ६ ॥ ६ ॥

एकत्वादिविषयकशाब्दबोधे एकत्वत्वाक्षणिकघटः प्रमेय इत्यत्र एकत्वं प्रमेयमित्येकत्वविशेष्यके घटवत् भूतलमित्यत्र एकत्ववद्भूतलमित्ये
कत्वप्रकारके शाब्दे च घटादिपदजन्यैकत्वाद्युपस्थितित्वेन हेतुतायाः सर्वसंमतत्वादिति प्रकृतेरेव संख्यार्थ इति वैय्याकरणाशङ्काग्र
न्थार्थः। नैय्यायिकः संख्यायाः विभक्त्यर्थत्वं व्यवस्थापयति॥ यादृशयादृशपदानां लक्षणया एकत्वादिशाब्दधीजनकत्वं नोभयवादिसि
द्धं तादृशानन्तपदज्ञानजन्यैकत्वाद्युपस्थितीनान्तच्छाब्दहेतुत्वकल्पनमिति॥ एकत्वविषयकशाब्दहेतुत्वकल्पनम्। प्रकृतेः संख्यावाचकता
वादिवैय्याकरणानामधिकमिति तत्कल्पनापेक्षया॥ न हि सर्वत्रैव पदेषु लक्षणा संभवति येषु प्रकृतिपदेषु अनन्तेषु लक्षणा नास्ति

मेवम्। यादृशयादृशपदानां लक्षणया एकत्वादिशाब्दधीजनकत्वं नोभयवादिसिद्धम् तादृशानन्तपदज्ञानजन्यैक
त्वाद्युपस्थितीनां तच्छाब्दहेतुत्वकल्पनं प्रकृतेः संख्यावाचकतावादिनामधिकमिति तत्कल्पनापेक्षया चाल्पतरस्वादि
पदजन्यैकत्वाद्युपस्थितिहेतुताकल्पनमेव लाघवम्। एतेन संख्याविशेषावच्छिन्नघटादिर्लक्षणया प्रकृतेरर्थः न तु संख्या विभ

तादृशानन्तपदज्ञानजन्यैकत्वाद्युपस्थितीनां एकत्वविषयकशाब्दबोधहेतुत्वकल्पनापेक्षया च। अल्पतराणामेकविंशतिसंख्यानां विभक्तीनां या
उपस्थितयस्तासामेकत्वशाब्दधीहेतुताकल्पने एव लाघवमित्यर्थः। एतेनेति। एतेन उक्तेन वक्ष्यमाणेन च दूषणेन। एका सुविभक्तिस्तस्या रामरूपा
दिरूपा अनन्ताः प्रकृतयः रामपदरूपा प्रकृतिस्तदुत्तराः स्वादिविभक्तयः एकविंशतिः स्वल्पतरा एव इति स्वादिपदज्ञानजन्यैकत्वाद्युपस्थितिहे
तुताकल्पनलाघवमित्यर्थः। इत्यस्य निरस्तमित्यनेनान्वयः। संख्याविशेषावच्छिन्नेति। एकत्वविशिष्टो घटादिर्लक्षणया घटादिपदस्यार्थः॥

शाब्दबोधे॥ एकत्वविशिष्टघटशाब्दबोधे। सुविभक्तिजन्यसंख्योपस्थितिहेतुताकल्पनं न्यायमते अधिकम्। व्याकरणमते तु घटादिपदस्यैकत्वा
दिविशिष्टघटादौ लक्षणाग्रहदशायां सर्वसंमत एव घटपदजन्यएकघटविषयकोपस्थित्या घटो नास्तीत्यत्र पदान्तरसमभिव्याहृतघटादिपद
स्थले एकत्वादिविशिष्टघटविशेष्यकशाब्दधीजननात्॥ तथाविधोपस्थितिहेतुतायाः॥ घटादिपदज्ञानजन्यैकत्वविशिष्टघटाद्युपस्थिति
हेतुतायाः सर्वानुमतत्वादित्यर्थः। एकपदार्थे परपदार्थस्य संसर्गबोध एव हि शाब्दबोधः। केवलघटपदस्थले एकत्वविशिष्टघटस्य

शाब्दबोधे विभक्तिजन्यसंख्योपस्थितिहेतुताकल्पनाधिक्येन गौरवात्। घटादिपदस्यैकत्वादिविशिष्टघटादौ लक्षणाग्रहद
शायां सर्वमत एव तज्जन्यविशिष्टविषयकोपस्थित्या विशिष्टविषयकशाब्दधीजननात्तथाविधोपस्थितिहेतुतायाः सर्वानुमतत्वात्
पदान्तरासमभिव्याहृताद्घटइत्यादिपदादेकत्वादिविशिष्टघटादिशाब्दबोधस्तु अलीक एव। तद्विषयकस्मरणस्यैवोपगमात्
तथा चोक्तं सर्वं हि वाक्यं क्रियायां परिसमाप्यत इत्यपि निरस्तम्। यादृशपदानां लक्षणया एकत्वादिविशिष्टस्वार्थे हेतुत्वं नोभयवा
वादिसिद्धं तादृशानन्तपदजन्यविशिष्टोपस्थितीनां शाब्दधीहेतुताकल्पनमपेक्ष्य विभक्तिजन्यसंख्योपस्थितीनामल्पानां तत्का

रणमेवाङ्गीक्रियते न तु शाब्दबोध इत्यर्थः। सर्वं वाक्यं क्रियायां परिसमाप्यत इतीति॥ निष्क्रियं सर्वमेव न भवतीति क्रियासमभिव्याहार एव शा
ब्दबोधमुत्पाद्य निराकाङ्क्षं भवतीति प्राचीनवैयाकरणसंमतिर्दर्शितेत्यर्थः। एतेनेत्यस्यार्थं प्रकाशयति॥ यादृशपदानाम्। पदान्तरसम
भिव्याहृतानामिति शेषः॥ लक्षणयेति॥ एकत्वविशिष्टबोधहेतुत्वं नोभयवादिसिद्धमिति॥ विभक्तेरेवैकत्वमर्थः। न तु प्रकृतेरित्याशय इति॥

तादृशानन्तपदजन्यैकत्वविशिष्टोपस्थितीनां एकत्वविशिष्टशाब्दधीहेतुताकल्पनमपेक्ष्य विभक्तिजन्यसंख्योपस्थितीनामस्यानामेकत्ववि-
शिष्टशाब्दधीहेतुताकल्पने लाघवादित्यर्थः। अथ प्रातिपदिकस्यैव संख्यार्थ इति व्यवस्थापयितुमाह। इदं पुनरिहावधेयमिति॥ तयोश्च॥ प्रा-
तिपदिकजन्यघटाद्युपस्थितिविभक्तिजन्यसंख्योपस्थित्योश्च। तदुभयस्थलीया। प्रातिपदिकजन्यघटाद्युपस्थितिस्थलीया॥ अथ च विभ-
क्तिजन्यसंख्योपस्थितिस्थलीया एकत्वविशिष्टघटविशेष्यिकाविशिष्टलाक्षणिकप्रकृतिजन्यउपस्थितिरेकैव प्रसक्तशाब्दसामग्र्यामन्तर्भ-

इदं पुनरिहावधेयम्। विभक्तेः संख्याबोधकत्वे समानविषयकानुमित्यादिकं प्रति शाब्दसामग्री प्रतिबंधकतायां याप्राति-
पदिकजन्या घटाद्युपस्थितिर्या च विभक्तिजन्या संख्योपस्थितिस्तयोश्च मिथो विशेष्यविशेषणभावे विनिगमनाविरहात्प्रतिबंध-
कताबाहुल्यम्। प्रकृते विशिष्टलाक्षणिकत्वे तु तदुभयस्थलीयविशिष्टविषयकोपस्थितिरेकैव सामग्र्यामंतर्भवतीति लाघवम्
न च विशिष्टविषयकोपस्थितेरपि एकत्वादिप्रकारतानिरूपितघटादिविशेष्यताशालित्वेन घटादिविशेष्यतानिरूपितएकत्वादि-
विषयताशालित्वेन वा प्रवेश इति विनिगमनाविरहात्साम्यमिति वाच्यम्॥ भवन्मते योग्यताज्ञानघटोपस्थित्येकत्वोपस्थितीनां तिसृ-
णां विशेष्यविशेषणभावे विनिगमनाविरहेण प्रतिबध्यप्रतिबंधकभावषट्कं॥ ९ ॥

वतीति लाघवमित्यर्थः॥ शंकते। न चेति वाच्यमित्यन्ते-
न। प्रकृतिजन्याया एकत्वाविशिष्टघटादिविशेष्यकोपस्थितेरित्यर्थः। प्रतिबंधकतायां साम्यं तथा च संख्यायाः प्रकृत्यर्थत्वे युक्तिविरहम-
रहात् विभक्त्यर्थत्वेवास्तीति शंकाशयः। समाधत्ते तार्किकः॥ भवन्मते इति। तार्किकमते इत्यर्थः। एकपदार्थे ऽपरपदार्थ॥ ९ ॥ ७८

संसर्गवत्तारूपयोग्यताज्ञानमेकघटोपस्थितिर्द्वितीयाएकत्वोपस्थितिस्तृतीयेतितिसृणांविशेषणविशेष्यभावेविनिगमनाविरहेणप्रतिबध्यप्रतिबन्धक
भावषट्कं॥ मन्मते॥ व्याकरणमते॥ तत्र। यत्रषट्प्रतिबध्यप्रतिबन्धकभावास्तत्रतच्चतुष्टयमात्रंप्रतिबध्यप्रतिबन्धकभावचतुष्टयमेवेत्यनेना
न्वयः। प्रतिबध्यप्रतिबन्धकभावचतुष्टयमुपपादयति॥ योग्यताज्ञानेति। विशिष्टविषयोपस्थितेः। तत्प्रकृतिजन्यैकत्वविशिष्टघटाद्युपस्थिते
।प्रत्येकं। एकस्यामेकस्यामुपस्थितेरित्यर्थः। दर्शितोभयरूपेण। एकत्वादिप्रकारतानिरूपितघटविशेष्यताशाल्युपस्थितिविशिष्टयोग्य
ताज्ञानत्वेनशाब्दसामग्र्याः समानविषयकानुमितिप्रतिप्रतिबन्धकत्ता॥ उतघटादिविशेष्यतानिरूपितैकत्वादिविषयताशाल्युपस्थितिवि

मन्मतेतत्रयोग्यताज्ञानविशिष्टविषयकोपस्थितेः प्रत्येकंदर्शितोभयरूपेणवैशिष्ट्यंनिवेश्यतदुभयंप्रत्येकंतादृशरूपद्व
यावच्छिन्नायामुपस्थितौयोग्यताज्ञानस्यवैशिष्ट्यंनिवेश्यद्वयमितिनचतुष्टयमात्रमितिरीत्यास्माकमल्पतरत्वकल्पनेमहालाघवं

शिष्टयोग्यताज्ञानत्वेनचप्रतिबन्धकताद्वयमेवमुभयरूपेण॥ एकत्वादिप्रकारतानिरूपितघटादिविशेष्यताशाल्युपस्थितित्वेन घटादिविशेष्य
तानिरूपितैकत्वप्रकारताशाल्युपस्थितित्वेनद्वयमेवंप्रकारेणोभयरूपेणप्रकृतिजन्यैकत्वविशिष्टोपस्थितेर्योग्यताज्ञानेवैशिष्ट्यंनिवेश्यतदुभ
यंप्रतिबध्यप्रतिबन्धकभावोभयमित्यर्थः। प्रत्येकंतादृशरूपद्वयावच्छिन्नोपस्थितौ॥ एकैकस्यांएकत्वप्रकारतानिरूपितघटादिविशेष्यताशा
ल्युपस्थितित्वावच्छिन्नायामेवंघटविशेष्यतानिरूपितैकत्वादिप्रकारताशाल्युपस्थितित्वावच्छिन्नायामुपस्थितौयोग्यताज्ञानस्यवैशिष्ट्यंनि
वेश्यचप्रतिबध्यप्रतिबन्धकभावद्वयमित्यर्थः। योग्यताज्ञानविशिष्टएकत्वप्रकारतानिरूपितघट॥ ९ ॥ ६ ॥ ६ ॥

द्विविशेष्यताशाल्युपस्थितित्वेनशाब्दसामग्र्याःसमानविषयकानुमितिंप्रतिप्रतिबंधकता।एवंयोग्यताज्ञानविशिष्टघटादिविशेष्यतानिरूपितैकत्वप्रकारकशा
ब्द्युपस्थितित्वेनवाशाब्दसामग्र्याःसमानविषयकानुमितिंप्रतिप्रतिबंधकताइतिप्रतिबध्यप्रतिबन्धकभावद्वयमितिरीत्यानचचतुष्टयम्।प्रतिबध्यप्रतिबन्धकभावच
तुष्टयमितिरीत्यास्माकंवैयाकरणानामल्पतरस्यतस्यप्रतिबध्यप्रतिबन्धकभावस्यकल्पनेमहल्लाघवमिति॥प्रकृतेरेवसं ख्यावाचकत्वासरित्व
तंवैयाकरणमतमिति॥अथप्राद्युपसर्गाणांद्योतकत्वंव्यवस्थापयति॥ तादृशरीत्यैवप्रणमतीत्यादौप्रकर्षविशिष्टन तिधातूनामेवार्थःप्रादयोद्योत
कानतुप्रकर्षादिवाचकाइतिसर्वानुमतः पन्थाःपरिष्कर्तुंशक्यतेइतिप्रणमतीत्यत्रसमानविषयकानुमितिंप्रतिशाब्दसामग्र्याःप्रतिबन्धकतायां

तादृशरीत्यैवचप्रणमतीत्यादौप्रकर्षविशिष्टंनत्यादिर्धातूनामेवार्थःप्रादयोद्योतकाएवनतुप्रकर्षादिवाचकाइतिसर्वा
नुमतःपंथाःपरिष्कर्तुंशक्यते अन्यथानंतधातुजन्यप्रकर्षादिविशिष्टतत्तत्स्वार्थोपस्थितीनांशाब्दधीजनकतामपेक्ष्यकतिप
योपसर्गाधीनप्रकर्षाद्युपस्थितीनांतज्जनकताकल्पनेलाघवात्॥१९

नमधातुजन्यनमस्कारोपस्थितिनिवेश्याएकप्राद्युपसर्गजन्याप्रकर्षोपस्थितिश्चानिवेश्यातयोश्चोपस्थित्योःपरस्परविशेषणविशेष्यभावेविनि
गमनाविरहाद्धातुजन्योपस्थितिविशिष्टप्रादिजन्योपस्थितित्वेनप्रतिबन्धकताउतप्रादिजन्योपस्थितिविशिष्टधातुजन्योपस्थितित्वेनप्रतिब
न्धकताइतिप्रतिबध्यप्रतिबन्धकभावद्वयकल्पनागौरवमितिधातोरेवप्रकृष्टनतिरर्थस्तथाचधातुजन्योपस्थितित्वेनैकेवप्रतिबन्धकताइतिलाघवम
वमितिप्रादयोद्योतकाएवनप्रकर्षादिवाचकाइत्यर्थः॥अन्यथेति॥समानविषयकानुमितिंप्रतिशाब्द॥ ६ ॥ ६ ॥ ६ ॥

सामग्रीप्रतिबन्धकतायान्धातुजन्यप्रकर्षविशिष्टतत्तदुपस्थितिनिवेशाप्रयुक्तलाघवानङ्गीकारे इत्यर्थः। प्राद्युपसर्गापेक्षया धातूनामानन्त्यात्॥ अनन्तधातु जन्यप्रकर्षादिविशिष्टाये विहाराहारसंहार प्रभावादयस्तेते भूवादिधात्वर्थास्तदुपस्थितीनां शाब्दधीजनकतामपेक्ष्य कतिपयोपसर्गाधीनप्रकर्षा द्युपस्थितीनां प्रकर्षादिविशिष्टशाब्दधीजनकताकल्पने लाघवात् स्वादीनामिव प्रादीनामपि वाचकतासिद्धिर्निराबाधैवेत्यर्थः॥ इति स्वादिविभक्त्यर्थ निरूपणम्॥ अथ स्वादिविभक्त्यर्थान्वयो निरूप्यते॥ संख्यायाश्च प्रकृत्यर्थे पर्याप्तिसंबन्धेनैव विशेषणत्व मितितथा सति। पर्याप्तिभिन्नसमवा

स्वादीनामिव प्रादीनामपि वाचकतानिराबाधासिद्धेदिति॥ संख्यायाश्च प्रकृत्यर्थे पर्याप्तिसंबन्धेनैव विशेषणत्वंनतुसम वायादिना। तथासति एकव्यक्तिबोधपरादाकाशशब्दादपि द्विवचनबहुवचनाद्यापत्तेः तत्तदर्थयोर्द्वित्वबहुत्वयोः समवा यादिना आकाशाद्यन्वययोग्यत्वात्। नच पर्याप्तेः संसर्गत्वेपि तद्दोषतादवस्थ्यं। घटाकाशादौ द्वित्वादेः पर्याप्तिसत्वे प्रत्येकमा काशादौतत्पर्याप्तिर्नास्तीति वक्तुमशक्यत्वात्। प्रत्येकस्योभयानतिरिक्तत्वादिति वाच्यम् उद्देश्यतावच्छेदकव्याप्यत्वविशिष्ट पर्याप्तेरेव संसर्गतोपगमात्॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

यादिनाऽन्वयस्वीकारे सति। तत्तदर्थयोः द्विवचनबहुवचनार्थयोः घटाकाशादिगतद्वित्वबहुत्वयोः। समवायेनाकाशे सत्वादाकाशाविति प्र योगापत्तिरित्यर्थः॥ शंकते। नचेति। तद्दोषतादवस्थ्यम्॥ आकाशाविति प्रयोगापत्तिरिति तादवस्थ्यम्। समाधत्ते। उद्देश्यतावच्छेदकव्याप्यत्व विशिष्टेति॥ यथा घटाविस्यादौ घटत्वविशिष्टौ द्वित्ववन्तौ इति बोधात् घटत्वमुद्देश्यतावच्छेदकन्तद्व्याप्यो द्वित्वपर्याप्तिस्तयासंसर्गेण द्वित्वं ६ ॥

घटह्वेऽस्तीति घटावितिप्रयोगः॥ आकाशत्वव्याप्यत्वविशिष्टद्वित्वपर्याप्तेरभावात् आकाशावितिन प्रयोगइत्यर्थः॥ घटाकाशावित्यत्र द्वित्वपर्याप्ति र्घटेपितत्रापि घटेआकाशत्वंनास्तीतिव्यभिचारात् नाकाशत्वव्याप्यद्वित्वपर्याप्तिरितिभावः। यद्याकाशद्वयंस्यात्तदाकाशावितिप्रयोगइति॥ वैशिष्ट्यञ्चवैज्ञानिकंनतुवास्तवंमिति॥ ज्ञानकृतंवैशिष्ट्यंउद्देश्यतावच्छेदकव्याप्यत्वेनज्ञायमानायाःपर्याप्तेःसंसर्गतोपगमात्। आकाशंद्वित्ववदितियोग्यताभ्रमजन्यः। आकाशावित्यादिवाक्यजन्यद्वित्वादिप्रकारकाकाशबोधः तत्राकाशावितिवाक्येविशिष्टसंसर्गाप्रसिद्धावपिनक्षतिरिति॥ आकाशत्वव्याप्यत्वविशिष्टपर्याप्तिरूपसंबन्धप्रसिद्धावपिनशाब्दानुपपत्तिरित्यर्थः। कुत्रचित्प्रसिद्धस्यैवभ्रमोवक्तव्यः। आकाशत्वव्याप्यत्वंश

आकाशत्वादिव्याप्यतायाद्वित्वादिपर्याप्तावसत्वेनातिप्रसंगविरहात्। वैशिष्ट्यंचवैज्ञानिकंग्राह्यंनतुवास्तवम्। तेनयत्रयोग्यताभ्रमजन्यःअत्राकाशावित्यादिवाक्यजन्यद्वित्वादिप्रकारकाकाशबोधस्तत्रविशिष्टसंसर्गाप्रसिद्धावपिनक्षतिः। द्वित्वादिपर्याप्तावन्यत्रप्रसिद्धस्याकाशत्वादिव्याप्यत्वस्यभ्रांतेस्तत्रोपगमात्॥ ठ ॥ ठ ॥ ठ ॥ ठ॥

ब्दादौप्रसिद्धंतस्यघटादिवृत्तिद्वित्वपर्याप्तौघटत्वव्याप्यायांभ्रमः। तथाचाकाशत्वव्याप्यत्वेनगृह्यमाणपर्याप्तिसंबन्धेनद्वित्वस्याकाशेभ्रमइत्यर्थः। तेनेनेति॥ वैज्ञानिकस्यउद्देश्यतावच्छेदकव्याप्यत्ववैशिष्ट्यस्यपर्याप्तौनिवेशेन॥ तेनेत्यस्यविशिष्टसंसर्गाभावेपिनक्षतिरित्यनेनान्वयः॥ अन्यत्र॥ शब्दादौ॥ प्रसिद्धस्याकाशत्वादिव्याप्यत्वस्यद्वित्वादिपर्याप्तौ॥ भ्रान्तेः तत्र॥ आकाशावितिवाक्यस्थले॥ उपगमादित्यर्थः। नन्वत्राकाशावित्य त्राकाशेद्वित्वंप्रकारतयाभासतेतत्रसंबन्धःपर्याप्तिः॥ ठ ॥ ठ ॥ ठ ॥ ठ ॥ ठ ॥ ठ ॥ ठ ॥ ठ॥

त्राका शत्वव्याप्यत्वमसदपि भासते इति संबन्धता वच्छेदकांशे भ्रमत्वं न तु हित्वरूपप्रकारांशे संबन्धता वच्छेदकांशे च भ्रमत्वस्यानंगीकारादिस तआह। संबंधता वच्छेदकांशे च भ्रमत्वस्यान्यत्रोपपादितत्वादिति। पर्याप्तिः संबन्धः तत्राकाशत्व व्याप्यत्वं विशेषणं संबन्धता वच्छेदकं तत्राकाशत्व व्याप्याभाववत्पर्याप्तौ चाकाशत्वव्याप्यत्वंप्रकारतयावच्छेदइति संबन्धतावच्छेदकांशे भ्रमत्वस्यान्यत्रोपपादितत्वादित्यर्थः॥ परस्परविशेषण विशेष्यभावापन्नेष्वेव संसर्गतास्वीकारात् तादृशप्रकारतामादायैव भ्रमत्वमुपपादनीयमित्याद्यन्यत्रस्थितं। उद्देश्यता वच्छेदकाकाशत्वव्या प्याभावो यथा हित्वपर्याप्तौ तथा हित्वव्यापकतया आकाशत्वे विरहादाकाशावितिप्रयोगवारणं भवतीति विनिगमनाविरहादाशङ्कते॥ नचेति

संबन्धतावच्छेदकांशे भ्रमत्वस्यान्यत्रोपपादितत्वात्। नच प्रकृतस्यर्थतावच्छेदक एव व्यापकतासंबन्धेन हित्वान्वयधीः किन्नोपेयते इति वाच्यम्। घटाविस्यादौ घटत्वादीनां स्वरूपत एवोपस्थिततया तत्रोक्तान्वयबोधस्यासम्भवात्॥ ॥

वाच्यमित्यन्तेन। प्रकृतस्यर्थतावच्छेदके घटत्वे एव व्यापकतासंबन्धेन हित्वान्वयधीः किंनोपेयते हित्ववत्। घटत्ववन्ताविति शाब्दधीरित्यर्थः॥ आकाशे समवायेन हित्वसत्वेपि प्रकृतस्यर्थतावच्छेदकमाकाशत्वं न हित्व व्यापकमिति व्यापकतासंबन्धेन हित्वसत्वादाकाशाविति प्रयोगापत्तिरिति भावः॥ समाधत्ते॥ घटाविस्यादौ घटत्वादीनां स्वरूपत एवोपस्थित्या तत्र उक्तान्वयबोधस्यासंभवादिति॥ धर्मितावच्छेदके घटत्वत्वादिरूपेणानुपस्थिते एक घटत्वादौ धर्मिणि इतरस्यान्वयबोधानंगीकारात् तथाच घटत्वं व्यापकतासंबन्धेन हित्ववदित्यन्वयबोधो न संभवति॥ घटत्वत्वेन घटत्वरूपानुपस्थितेरिति भावः॥ ॥ ॥ ॥ ॥ ॥ ॥ ॥

मु॰टी॰ त्वव्यापकीभूतोद्देश्यतावच्छेदकवत्वरूपपरंपरयावत्प्रकृतसाध्यैहित्वादेः। घटावित्यत्र स्वं हित्वं तस्य व्यापकीभूत सुद्देश्यतावच्छेदकं घ
८१ टत्वं तद्वत्वं घटे अस्तीति परंपरासंबन्धेन हित्वान्वयः प्रकृतसाध्ये॥ घटौ हित्ववन्तौ घटावितिबोधस्वीकारात् इत्यर्थः। तथाचात्राकाशाविति
भ्रमात्मकशाब्दस्थले हित्वनिष्ठव्याप्यतानिरूपिताव्यापकता घटत्वादौ प्रसिद्धा न त्वाकाशत्वे हित्वव्यापकताभ्रमत्वमवश्यं स्वीकार्यमेव॥ तथा
च स्वव्यापकीभूते तत्र स्वव्यापकतया ज्ञायमानोद्देश्यतावच्छेदकवत्वरूपपरंपरायाः कार इत्यर्थोन्त्वं हित्वं व्याप्यतया ज्ञायमानत्वभ्रमविषय
त्वमाकाशत्वे इति भवत्यत्राकाशाविति प्रयोगः एवमग्रेप्याकाशत्वव्याप्यता या शब्दादौ प्रसिद्धा या ज्ञायमाना भ्रमविषयीभूता पर्याप्तिरपीति भव

स्वव्यापकीभूतोद्देश्यतावच्छेदकवत्वरूपपरंपरयाएवप्रकृतसाध्ये हित्वादेः संबन्धतास्वीकारे च व्यापकतारूपसंबन्ध
तावच्छेदकांशे भ्रमत्वस्यावश्यकतया उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेः संबन्धतोपेक्षायां निर्बीजत्वात्। अ
थात्र व्याप्तिर्व्यापकसामानाधिकरण्यरूपैव वाच्या न तु तद्वदन्यावृत्तित्वरूपा केवलान्वयिधर्मस्य प्रकृतसाध्यतावच्छेदकता
यत्र तत्राप्रसिद्धेः॥

॥त्याकाशाविति प्रयोगः॥ एवमाकाशत्वरूपोद्देश्यतावच्छेदकव्याप्यत्वं पर्याप्तौ नास्तीति पर्याप्तौ व्याप्यत्वांशे भ्रमत्वस्वी
कारे समानेपि उद्देश्यतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तेः संसर्गतायां त्यागे कारणाभाव इति प्रथमोक्तापर्याप्तेरपि संसर्गतोचितेत्यर्थः
॥ अथ पर्याप्तेः संसर्गतोपेक्षायां बीजमाशंकते॥ अथात्रेति॥ व्यापकसामानाधिकरण्यरूपैव व्याप्तिरत्र वाच्या॥ ननु तद्वदन्यावृत्तित्व राम
रूपा॥ प्रमेयावित्यत्र प्रमेयत्ववदन्याप्रसिद्धिः॥ ८१

एवञ्च॥व्यापकसामानाधिकरण्यरूपव्याप्तिनिवेशेचेत्सर्थः। घटवित्यत्र घटत्वरूपोद्देश्यतावच्छेदकरूपव्यापकाधिकरणघटवृत्तित्वरूपव्याप्त्यपेक्षया लघोः स्वव्यापकताद्दशधर्मवत्त्वस्यैव॥ स्वनिष्ठत्वपर्याप्तिर्नतद्व्यापकः तादृशः प्रकृतसर्थतावच्छेदको घटत्वलक्षणोधर्मस्तद्वत्त्वस्यैवसंबन्धत्वमिति॥ व्यापकसामानाधिकरण्यंव्याप्तिः तत्रव्यापकाधिकरणेयद्वृत्तित्वंतद्वृत्तित्वमेवाधिकमितिगौरवमिति॥ तद्वृत्तिनपर्याप्तिसंबन्धोगुरुः स्वव्यापकताद्दशधर्मवत्त्वसंबन्धस्तु लघुस्तत्राधिकरणानिरूपितवृत्तित्वेनविशिष्टमितिलाघवं। द्वित्वव्यापकघटत्ववत्त्वसंबन्धेनद्वित्ववन्तौघटावितिबोधादितिगौरवमेवपर्याप्तिसंसर्गतोपेक्षावीजमितिशंकाग्रंथाशयः॥ समाधत्ते॥ नहीति॥ आकाशेनः

एवञ्चोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्त्यपेक्षया लघोःस्वव्यापकताद्दशधर्मवत्त्वस्यैवसंबन्धत्वमुचितमितिचेन्नहि।आकाशेनद्वावित्यादिवाक्यजन्यशाब्दबोधदशायामपिआकाशावित्यादिवाक्याद्द्वित्वबोधापत्तिः तथाहि।आकाशेनद्वावित्यादिनोद्वित्वावच्छिन्नभेदःप्रतीयते।सचनस्वव्यापकाकाशत्ववत्त्वादिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकः तादृशसंबन्धे

नावितिशाब्दशायामपि॥ आकाशेस्त इतिवाक्यात्द्वित्ववन्तावाकाशावितिशाब्दधीस्यात्। तथाहि॥ आकाशेनद्वावित्यादिनोयदिशाब्दबोधःसंभवेनतदासद्वित्वावच्छिन्नभेदविषयकएवस्यात्। सचनस्वव्यापकाकाशत्ववत्त्वादिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकः॥ तदर्थश्च स्वनिष्ठत्वंनव्यापकमाकाशत्वंतद्वत्त्वसंबन्धावच्छिन्नाद्वित्वनिष्ठाप्रतियोगितावच्छेदकतायस्यसद्वित्ववान्भेदप्रतियोगीद्वित्वंप्रतियोगितावच्छेदकमितितादृशसंबन्धेनद्वित्वव्यापकंघटत्वादिनत्वाकाशत्वमितिद्वित्वव्यापकाकाशत्ववत्त्वादिसंबन्धेन॥ ६॥ ६ ॥

द्वित्ववतोः प्रसिद्धेः॥ अनन्तससंबन्धावच्छिन्नप्रतियोगितावच्छेदकताको भेदो न संभवतीत्यर्थः॥ पर्याप्तिसंबंधेन द्वित्ववतोः प्रसिद्धेः। पर्याप्तिसं
बन्धावच्छिन्नप्रतियोगितावच्छेदकताक एव द्वित्वावच्छिन्नभेदः प्रतीयते। तत्काले चापर्याप्तिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेद
प्रतीतिकाले च। पर्याप्तिसंबन्धेन द्वित्वविशिष्टबुद्धिरेव प्रतिवध्यते॥ ननु द्वित्वव्यापकाकाशत्ववत्त्वादिरूपपरंपरासंबन्धेन द्वित्वविशिष्टबुद्धिरपि
प्रतिबध्यते। तथा चाकाशेन ह्वावित्यादिवाक्यजन्यशाब्दबोधदशायां आकाशावित्यादिवाक्यजन्यद्वित्वबोधवारणाय आकाशत्वव्याप्यत्वयाप्त

द्वित्ववतोः प्रसिद्धेः अपितु पर्याप्तिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताक एव। तत्काले च पर्याप्तिसंबन्धेन द्वित्वविशिष्ट
बुद्धिरेव प्रतिवध्यते न तूक्तपरंपरासंबन्धेन तद्विशिष्टबुद्धिरपीति। अथाकाशेन ह्वावित्यादौ केवलपर्याप्तिसंबन्धावच्छिन्नप्र-
तियोगितावच्छेदकताकभेदो यत्र बोधयितुं न शक्यते। आकाशेप्युक्तयुक्त्या द्वित्वपर्याप्तेः सत्त्वेन तत्र तेन संबंधेन तद्भेदस्य व
क्तुमशक्यत्वात् आकाशत्वव्याप्यपर्याप्तिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वादिमद्भेदस्याप्रसिद्ध एवेति चेन्न॥॥

मविषयीभूतपर्याप्तिरेव निवेशनीया न तु द्वित्वव्यापकाकाशत्ववत्त्वादिसंबन्धो निवेश्य इति भावः। ननु केवलपर्याप्तित्वेन आकाशत्वव्याप्यपर्याप्ति-
त्वेन वा पर्याप्तेः संबन्धता इति विकल्प्य दूषयितुं शङ्कते॥ अथेति॥ आकाशेप्युक्तयुक्त्या द्वित्वपर्याप्तेः सत्त्वेनेति॥ घटाकाशे द्वित्वादेः पर्याप्तिसत्त्वे
प्रत्येकमाकाशादौ तस्याः पर्याप्तिर्नास्तीति वक्तुमशक्यत्वात्। प्रत्येकस्योभयानतिरेकात् इत्युक्तयुक्त्या द्वित्वपर्याप्तेः सत्त्वेन। तत्र॥ आकाशे। तेन संब राम
न्धेन। शुद्धपर्याप्तिसंबन्धेन। तद्भेदस्य। द्वित्ववद्भेदस्य। वक्तुमशक्यत्वादित्यर्थः। पर्याप्तिर्घटत्वादिव्याप्या न त्वाकाशत्वव्या॥ ६ ॥ ६॥ ८२

प्यादस्याकाशत्वव्याप्यपर्याप्तिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वादिमद्भेदस्याप्रसिद्ध एव। अतः पर्याप्तिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वावच्छिन्नभेदबोधासंभवादाकाशेन द्वावित्यादिवाक्यमूलकमेवेति शंकाशयः॥ समाधत्ते। द्वित्वादिपर्याप्तेरुभयादिवृत्तिधर्मेणेवावच्छेदादिति॥ उभयादिवृत्तिधर्म उभयत्वन्तेनैव द्वित्वपर्याप्तिरवच्छिद्यते। धर्मेणैव। एवकारव्यवच्छेद्यमाह। तदनवच्छेदकैकमात्रवृत्तिधर्मेणेति। तस्या द्वित्वादिपर्याप्तेरनवच्छेदको य आकाशत्वादिरूप एकैकमात्रवृत्तिधर्मः तदवच्छेदेन। तद्वद्भेदस्य द्वित्वादिपर्याप्तिमद्भेदस्य। तेन संबन्धेन। पर्याप्तिसंबंधेन। द्वित्वादिमद्भेदस्य च। तद्वृत्तौ। आकाशवृत्तौ। बाधकाभावादित्यर्थः। तथा चाकाशेन द्वावि

द्वित्वादिपर्याप्तेरुभयादिधर्मेणेवावच्छेदात्। तदनवच्छेदकैकमात्रवृत्तिधर्मावच्छेदेन तद्वद्भेदस्य तेन संबन्धेन द्वित्वादिमद्भेदस्य च तद्वतिवृत्तौ बाधकाभावात्। न चैवं घटपटौ न द्वाविति प्रयोग आपद्येत। घटपटयोरपि प्रत्येकद्वित्वावच्छिन्नभेदसत्वादिति वाच्यम्। द्विवचनाद्युपस्थापितद्वित्वावच्छेदेनैव द्वित्वावच्छिन्नभेदस्य बाधेन तादृशप्रयोगाभावोपपत्तेः॥

((तिप्रयोग उपपद्यते।

घटपटौ न द्वाविति प्रयोगो न युज्यते। घटपटोभयत्वावच्छेदेन द्वित्वपर्याप्तिसत्वेन द्वित्वपर्याप्तिमद्भेदस्य तत्वात् आकाशत्वावच्छेदेन द्वित्वपर्याप्त्यभावादाकाशे द्वित्वादिमद्भेदसत्वादिति भावः। शंकते। न चैवमिति। एवं पर्याप्तेरुभयत्वादिव्यासज्यवृत्तिधर्मावच्छेदेनैव स्वीकारे। घटपटयोरपि। प्रत्येकघटत्वावच्छेदेन पटत्वावच्छेदेन च द्वित्वादिमद्भेदसत्वात्। घटपटौ न द्वाविति प्रयोगापत्तेरित्यर्थः। समाधत्ते॥ द्विवचनाद्युपस्थापितद्वित्वावच्छेदेन द्वित्वावच्छिन्नभेदबाधेन तादृशप्रयोगाभावोपपत्तेरिति। घटपटोभयत्वावच्छेदेन द्वित्वपर्याप्तिसत्वात् पर्याप्तिसंबन्धावच्छिन्न

प्रतियोगितावच्छेदकताकद्वित्वादिमद्भेदस्याप्रसत्वात्

मु·टी घटपटौनद्वावितिप्रयोगाभावोपपत्तेरित्यर्थः। नञाव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदः। उभयत्वावच्छिन्नप्रतियोगिताकभेदः। उद्देश्य
८३ तावच्छेदकावच्छिन्नेनैवेति। घटपटौनद्वावित्यत्र उद्देश्यतावच्छेदका घटपटावितिद्विवचनोपस्थाप्या द्वित्वतदवच्छेदेनउभयत्वावच्छिन्नप्र
तियोगिताकभेदोबाधितइति घटपटौनद्वावितिनप्रयोगइत्यर्थः। द्वित्वसामानाधिकरण्येनतदबाधस्याकिंचित्करत्वादिति। घटवृत्तिद्वित्वपटवृत्तिद्वि
त्वसामानाधिकरण्येनतदबाधस्य। व्यासज्यवृत्तिद्वित्वावच्छिन्नप्रतियोगिताकभेदबाधस्याभेदसत्वेस्याकिंचित्करत्वात् घटपटौनद्वावितिप्रयो
गानापादकत्वादित्यर्थः। नचघटत्वादेरतिप्रसक्ततयेति। घटपटौस्तइत्यत्रद्वित्वपर्याप्तिर्घटपटयोरेवास्तिघटत्वंतुबहुषुघटान्तरेष्वतिप्र

नञाव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकभेदस्यउद्देश्यतावच्छेदकावच्छेदेनैवव्युत्पत्तेर्द्वित्वसामानाधिकरण्येनत
दबाधस्याकिंचित्करत्वात्। नचघटत्वादेरतिप्रसक्ततयाद्वित्वादिपर्याप्तेरनवच्छेदकत्वात्तदवच्छेदेनद्वित्ववद्भेदस्यभवताम
प्यनुमतत्वात्प्रकृतस्यर्थगतैकत्वाविवक्षायांघटौनद्वावित्यादिप्रयोगापत्तिरितिवाच्यम्॥

सक्त— मितिनद्वित्वपर्याप्त्यवच्छेदकमि
तिद्वित्वपर्याप्त्यनवच्छेदेनचद्वित्ववद्भेदस्यभवतांसिद्धान्तिनामप्यनुमतत्वात्। यद्भेदीयप्रतियोगितावच्छेदकानवच्छेदकंतद्भेदाव
च्छेदकमितिनियमात्॥ यत्घटत्वन्द्वित्ववद्भेदीयप्रतियोगितावच्छेदकस्यावच्छेदकंनभवतितत्घटत्वन्तद्भेदस्यावच्छेदकंभवती
तिनियमवाक्यार्थः। प्रकृतस्यर्थघटगतैकत्वाविवक्षायांघटौनद्वावित्यादिप्रयोगापत्तिरितिवाच्यमिति॥ घटस्यएकत्वविवक्षायांतुद्वित्वप टि॰ रम
र्याप्तेःपर्याप्तिसंबन्धेनद्वित्वस्यवानवच्छेदकैकत्वावच्छेदेनद्वित्ववद्भेदसत्वात् घटौनद्वावितिप्रयोगेइष्टापत्तेराह घटगतैकत्वाविवक्षा ८३

अतिप्रसक्ततया द्वित्वानवच्छेदकघटत्वावच्छेदेन पटत्वावच्छेदेन द्वित्ववद्भेदस्य सत्वेन घटेन द्वावितिप्रयोगापत्तिरिति शंकां समाधत्ते॥ तादृ
शप्रयोगाभावे इति। घटैकत्वविवक्षायां घटेन द्वावितिप्रयोगाभावे इत्यर्थः। घटत्वादेर्द्वित्वपर्याप्त्यवच्छेदकता यथा प्रामाणिकी तथा घटत्वा
देर्द्वित्वादिमद्भेदस्यानुयोगितायाः द्वित्ववद्भेदाधिकरणताया अवच्छेदकताया अपि प्रामाणिकत्वादित्यर्थः। ननु यत्प्रतियोगितावच्छेदकानव
च्छेदकं तद्भेदावच्छेदकमिति नियमबलात् घटत्वं द्वित्वादिमद्भेदावच्छेदकमास्तां अत आह। प्रतियोगितावच्छेदकानवच्छेदकताया भेदाव
च्छेदकतानियमासिद्धेरिति। तथा च घटत्वं न द्वित्वपर्याप्त्यवच्छेदकं नवा द्वित्वादिमद्भेदाधिकरणतावच्छेदकं येन घटेन द्वावितिप्रयोगापत्तिः

तादृशप्रयोगाभावे घटत्वादेर्द्वित्वपर्याप्तेरिव द्वित्वमद्भेदस्याप्यनुयोगितावच्छेदकताया अप्रामाणिकत्वात् प्रतियोगिता
वच्छेदकानवच्छेदकताया भेदावच्छेदकतानियमासिद्धेः अस्तु वातिप्रसक्तोपि घटत्वादिर्द्वित्वपर्याप्तेरवच्छेदकः घटा
वित्यादिप्रतीतिबलात्॥

११ स्यादित्यर्थः॥ अथ नियमरक्षणाय पक्षान्तरमाह॥ अस्तु वातिप्रसक्तोपि घटत्वादिर्द्वित्वपर्याप्तेरवच्छेदक इ
ति। तथा च घटत्वादेर्द्वित्वावच्छेदकत्वं न द्वित्वादिमद्भेदावच्छेदकं अतो यद्भेदीयप्रतियोगितावच्छेदकानवच्छेदकं तद्भेदावच्छेदकमि
त्युक्तनियमो रक्षितः घटैकत्वविवक्षायां घटेन द्वावितिप्रयोगोपि वारितो घटत्वावच्छेदेन द्वित्वसत्वादित्यर्थः। अतिप्रसक्तस्यापि घटत्वादेर्द्वित्वप
र्याप्त्यवच्छेदकतायां युक्तिमाह। घटावित्यादिप्रतीतिबलादिति। अत्र द्वित्वपर्याप्त्यधिकरणे तद्द्वयातिरिक्तघटवृत्तित्वादतिप्रसक्तमपि घट
त्वमुद्देश्यतावच्छेदकीकृत्य द्विवचनार्थद्वित्वं विधीयते घटत्वविशिष्टौ द्वित्ववन्तावितिबोधादित्यर्थः॥ ६ ॥ ६ ६ ॥ ६ ॥

अथातिप्रसक्तधर्मस्यावच्छेदकत्वमसहमानआह॥ वस्तुतस्तुघटत्वादेःप्रत्येकंद्वित्वपर्याप्त्यनवच्छेदकत्वेपीति। प्रत्येकरूपेणएतद्घटपटत्वनिद्वि-
त्वपर्याप्तिनिष्ठतद्व्यक्तित्वेनएतद्द्वित्वपर्याप्त्यनवच्छेदकत्वेपीति। द्वित्वपर्याप्तिरेतयोरेवघटपटयोरस्तिघटत्वंतुघटांतरेपीत्यतिप्रसक्तंघटत्वंएतद्द्वि-
त्वपर्याप्त्यनवच्छेदकमितिद्वित्ववद्भेदावच्छेदकमितिघटोनद्वाविनिप्रयोगापादनेपि। समाधत्ते। द्वित्वपर्याप्तित्वावच्छिन्नानतिप्रसक्ततयेति। यत्र
यत्रघटत्वंतत्रसर्वत्रद्वित्वपर्याप्तिरितिद्वित्वपर्याप्तित्वावच्छिन्नानतिप्रसक्ततयातदवच्छिन्नावच्छेदकत्वंतेनद्वित्वपर्याप्तित्वेनावच्छिन्नायाद्वित्वपर्या-
प्तिरवच्छेदकत्वंघटत्वस्याव्याहतमेवेत्यर्थः॥ तथाचद्वित्वपर्याप्तित्वावच्छिन्नावच्छेदकघटत्वावच्छेदेनद्वित्ववद्भेदाभावात्घटोनद्वाविनिप्रयोगा

वस्तुतस्तुघटत्वादेःप्रत्येकंद्वित्वपर्याप्त्यनवच्छेदकत्वेपिद्वित्वपर्याप्तित्वावच्छिन्नानतिप्रसक्ततयातदवच्छिन्नावच्छेदक-
त्वमव्याहतमेव। अथपर्याप्त्याख्यविलक्षणसंबन्धएवप्रामाणिकःतत्कथंनसंबन्धताआकाशोनद्वावितिप्रतीतिस्तुसमवायसं-
बन्धावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्वावच्छिन्नभेदविषयिकैवास्तां॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

पत्तिर्नसंभवतीत्यर्थः। शंकते। अथेति। पर्याप्त्याख्यविलक्षणसंबन्धोधर्मोवाप्रामाणिकस्तर्हिधर्मिणोऽसिद्धौकथंतस्याःपर्याप्तेःसंबन्धताविशिष्टबु-
द्धिनियामकतारूपोधर्मःप्रामाणिकइत्यर्थः। ननुद्वित्वपर्याप्त्यनवच्छेदकाकाशत्वावच्छेदेनद्वित्ववद्भेदसत्त्वादाकाशोनद्वावितिप्रयोगोपपत्तयेऽवश्यंपर्या-
प्तिसंबन्धोऽभ्युपेयइत्यतआह॥ आकाशोनद्वावितिप्रतीतिस्त्विति। समवायसंबन्धावच्छिन्नाद्वित्वनिष्ठप्रतियोगितावच्छेदकतायस्यतादृशोयो
द्वित्ववद्भेदस्तद्विषयिकैवप्रतीतिरास्तांनतुपर्याप्तिसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकभेदविषयिकेत्यर्थः॥ ६ ॥ ६ ॥ ६ ॥

आकाशादौद्वित्वादिसमवायसत्वेपीति।तथाचाकाशेसमवायसंबन्धावच्छिन्नप्रतियोगितावच्छेदकताकद्वित्ववद्भेदविरहात्आकाशोनद्वावि-
तिप्रतीतिर्नस्यादितिभावः।उपपत्तिमाह।द्वित्वादेरेवउभयादिवृत्तिधर्ममात्रावच्छिन्नत्वोपगमादिति।उभयादिवृत्तिधर्मः घटपटोभयत्वादिरूपः
तन्मात्रावच्छिन्नत्वंद्वित्वादावेवस्वीक्रियतेद्वित्वादेरेवेत्येवकारेणद्वित्वपर्याप्तिव्यवच्छेदः।मात्रपदेनएकमात्रवृत्तिआकाशत्वादिव्यवच्छेदः
तथाचआकाशोनद्वावित्यत्रघटपटोभयत्वावच्छिन्नद्वित्ववद्भेदवानाकाशइतिशाब्दबोधः नतुघटपटोभयत्वावच्छिन्नद्वित्वपर्याप्त्यव
च्छिन्नवद्भेदवानाकाशइतिशाब्दधीरित्यर्थः।द्वित्वादेर्घटपटोभयत्वमात्रावच्छिन्नत्वंनत्वेकमात्रवृत्तिआकाशत्वावच्छिन्नत्वंस्वीक्री

आकाशादौद्वित्वसमवायसत्वेपिद्वित्वादेरुभयादिवृत्तिधर्ममात्रावच्छिन्नत्वोपगमात्तदनवच्छेदकाकाशत्वाद्यवच्छे
देनसमवायसंबन्धेनतद्वत्तोभेदस्यवृत्तौबाधकाभावादितिचेन्न।आकाशावित्यादिवाक्यजन्यशाब्दबोधस्याप्रमात्वा
नुपपत्त्यैवतादृशसंबन्धसिद्धेः तादृशबुद्धेःसमवायविषयकत्वेप्रमात्वनिराकरणस्याशक्यत्वात्॥

यते॥तदनवच्छेदकम्।
द्वित्वानवच्छेदकम्।यदाकाशत्वंतदवच्छेदेन॥समवायसंबन्धेन।यस्तद्वान्द्वित्ववान्तद्भेदस्याकाशेवृत्तौबाधकाभावादितिशंकाग्रन्थः॥समा
धत्ते॥आकाशावित्यादिवाक्यजन्यशाब्दबोधस्यअप्रमात्वानुपपत्त्यैवतादृशसंबन्धसिद्धेस्तादृशबुद्धेःसमवायविषयकत्वेप्रमात्वनिराकरणस्या
शक्यत्वादिति॥तादृशबुद्धेः।आकाशावित्यादिवाक्यजन्यबुद्धेः।समवायविषयकत्वे॥प्रमात्वमेवस्यात्समवायेनाकाशघटाकाशगतद्वि
त्वस्याबाधितत्वात्पर्याप्त्यंगीकारेतुद्वित्वपर्याप्तेर्घटाकाशयोरेवसत्वेनकेवलाकाशेद्वित्वपर्याप्तेर्बाधात्पर्याप्तिसंबन्धेनद्वित्वाभाववत्त्वा-

काशेद्वित्वप्रकारिकाधीरप्रमैवेतिपर्याप्तिसंबन्धआवश्यकइत्यर्थः।यद्यपिसमवाये नाकाशेद्वित्वंनाकाशत्वावच्छेदेनकिंतुघटाकाशोभयत्वावच्छेदेनैवेतिपर्याप्त्यनंगीकारेपिआकाशाविति धियोऽप्रमात्वंसूपपादं।तथापितत्संबंधितावच्छेदकस्यतदवच्छेदकतानियमात्प्रकृतेचद्वित्वसमवायावच्छेदकस्याकाशत्वस्यद्वित्वावच्छेदकत्वनियमादाकाशत्वावच्छेदेनद्वित्वसमवायोस्तिद्वित्वंचास्तीत्याकाशावितिप्रतीतेःप्रमात्वंस्यादतः आकाशत्वानवच्छेद्यः कश्चिद्द्वित्वसंबन्धोऽन्वेष्टव्यः सचपर्याप्तिनामास्तुइतिद्वित्वपर्याप्त्यनवच्छेदकाकाशत्वावच्छेदेनपर्याप्तिसंबन्धे नद्वित्वावगाहिनी आकाशावितिप्रतीतिरप्रमैवेतिपर्याप्तिसंबन्धोऽवश्यमंगीकरणीयइति॥उद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायस्य

उद्देश्यतावच्छेदकव्याप्तिविशिष्टसमवायस्यसंसर्गतोपगमेघटाविस्यादिवाक्यस्याप्रमाणतापत्तिः।समवायस्यैकेनघटादिनिष्ठस्यद्वित्वादिसमवायस्यपटादावपिसत्वेनघटत्वाद्यव्याप्यत्वात्।नचोद्देश्यतावच्छेदकव्याप्यद्वित्वादिसमवायत्वेनैवसंबंधतास्तु।द्वित्वादिसमवायस्यघटत्वाद्यव्याप्यत्वेपिद्वित्वादेस्तद्व्याप्यतयानघटाविस्यादेरप्रमाणतेतिवाच्यम्॥ ९ ॥

संसर्गतोपगमेइति।द्वित्वसमवायस्यघटादावपिसत्वादाकाशत्वव्याप्तिविशिष्टसमवायाऽप्रसिद्ध्यातेनसंबन्धेनद्वित्वाभाववत्याकाशेद्वित्वप्रकारिकाऽकाशावितिप्रतीतिरप्रमैवेतिपर्याप्तिसंबन्धोमास्तु॥एवंसतिघटावितिवाक्यस्याप्यप्रमाणतापत्तिः।समवायस्यैकेनघटादिनिष्ठस्यद्वित्वादिसमवायस्यपटादावपिसत्वेनघटत्वाद्यव्याप्यत्वात्।शंकते।नचोद्देश्यतावच्छेदकव्याप्यद्वित्वादिसमवायत्वेनैवसंबन्धतास्त्विति।उद्देश्यतावच्छेदकव्याप्योयोद्वित्वादिसमवायस्तत्त्वेनेत्यर्थः।एवंचद्वित्वादिसमवायस्यउद्देश्यतावच्छेदका॥ ॥ ॥ ॥ ॥

काशत्वाव्याप्यतयानाद शाकाशत्वव्याप्यतयाभ्रमविषयीभूतद्वित्वादिसमवायसंबन्धेनद्वित्वप्रकारकाकाशावितिप्रतीतेरप्रमात्वसंपादनेपिद्वि स्वयुक्तत्वाद्वित्वादिसमवायस्यघटत्वव्याप्यतयाउद्देश्यतावच्छेदकव्याप्यद्वित्वसमवायेनद्वित्वप्रकारकघटावितस्यादिप्रतीतेरप्यप्रमात्वापादनं नसंभवति। उद्देश्यतावच्छेदकव्याप्यंयद्वित्वंतत्समवायत्वेनसंबंधतास्वीकारात्।यद्यपिद्वित्वादिसमवायःएकत्वात्परात्वाद्यप्यस्तीतिनघटत्वव्या प्यःतथापिघटवृत्तिद्वित्वंघटत्वव्याप्यमेवेतिउद्देश्यतावच्छेदकघटत्वव्याप्यंयद्द्वित्वंतत्समवायेनद्वित्ववतिद्वित्वप्रकारिकाघटावितिप्रतीतेर्नाप्र माणत्वाइतिसमवायेनैवनिर्वाहेपर्याप्तिसंबन्धोमास्त्वितिशंकाशयइति। समाधत्ते॥ एवंसतीति। उद्देश्यतावच्छेदकव्याप्यत्वस्यद्वित्वविशे

एवंसतितथाविधद्वित्वादेरेवलाघवेनद्वित्वादिसंबन्धतोचित्यात्। अथास्त्वेवमेतावतापिपर्याप्तिसंबन्धस्यविलयादि तिचेन्न। द्वित्वादिस्वरूपस्यैवद्वित्वादिपर्याप्तितयाभिमतसिद्धेः॥

षणेसति। तथाविधद्वित्वादेरेवउद्देश्यतावच्छेदकव्याप्यद्वि त्वादेरेव॥ लाघवेन॥ उद्देश्यतावच्छेदकव्याप्यद्वित्वसमवायेद्वित्वसंबन्धताकल्पनापेक्षयाउद्देश्यतावच्छेदकव्याप्यद्वित्वएवद्वित्ववचना र्थद्वित्वसंबन्धतांगीकारात्। समवायानिवेशप्रयुक्तलाघवेनेत्यर्थः घटावित्यादितएवघटत्वव्याप्यद्वित्वसंबंधेनद्वित्ववंतौघटावितिशाब्दबोधात्। शंकते। अथास्त्वेवमेवेति। उद्देश्यतावच्छेदकव्याप्यद्वित्वस्यसंबंधत्वमेवास्त्वित्यर्थः। एतावतापि। उद्देश्यतावच्छेदकव्या प्यद्वित्वस्यसंबंधतांगीकारेपापि। सिद्धांतिमतेपर्याप्तिसंबंधस्यासिद्धेरित्यर्थोतरमित्यर्थः। यतःपर्याप्तेःसंबंधतासाधनप्रवृत्तस्यसिद्धांतिनोद्वि त्वसंबंधितासिद्धिरिति। समाधत्ते। द्वित्वादिस्वरूपस्यैवद्वित्वादिपर्याप्तितयाभिमतसिद्धेरिति। द्वित्वमेवद्वित्वपर्याप्तिपदवाच्यमित्यनभिमतार्थ

॥ [illegible]

मु॰ टी॰ द्वित्वमेव द्वित्वपर्याप्तिरित्यत्र संमतिमाह। उक्तं च दीधितिकृतेति। अयमेको घटो ऽयमेको घट इति नानैकत्वावगाहिन्याः प्रेक्षावद्व्याजन्माः इमौ द्वावित्याका

८६ रक प्रतीतिप्रमाणकः द्वित्वस्वरूपसंबन्धविशेषः। द्वित्व एव पर्याप्तिसंबन्धतास्वीक्रियत इत्यर्थः। समवायस्य नानात्वमते च द्वित्वादिसमवाय

एव तत्पर्याप्तिरिति। यदा समवाय एकस्तदा समवायस्योद्देश्यतावच्छेदकाव्याप्यत्वादुद्देश्यतावच्छेदकघटत्वादिव्याप्यं द्वित्व ॰ मेव द्विवचनार्थे द्वित्व

संबन्धः यदा तु समवायो नाना तदा उद्देश्यतावच्छेदकघटत्वादिव्याप्यो घटत्वादिसमवाय एव द्वित्वस्य संबन्धः द्वित्वसमवाय एव तत्पर्याप्तिर्द्वित्व

पर्याप्तिर्भवति न तु द्वित्वं पर्याप्तिर्भवति न वा पर्याप्तिरतिरिक्तपदार्थरूपा न वा द्वित्वस्वरूपा इत्यतिरिक्तत्वानतिरिक्तत्वविवेचनमन्यत्र कृतानुप

उक्तं च दीधितिकृता पर्याप्तिः अयमेको घट इमौ द्वावित्यादिप्रतीतिसाक्षिकः स्वरूपसंबन्धविशेष इति। समवायस्य ना

नात्वमते च द्वित्वादिसमवाय एव तत्पर्याप्तिर्न तु स्वरूपमतिरिक्तपदार्थो वेत्यन्यदेतत्। यत्तु आकाशं न द्वे इत्यादिप्रतीतिव

दाकाशं न द्वित्ववदिति प्रतीतेः प्रमात्वस्य वारणाय समवायेन द्वित्वादिमद्भेद आकाशत्वावच्छेदेन न स्वीकर्तव्यः ॥ ६ ॥

युक्तमिति सुपेक्षितमस्माभिरिति भावः॥ यत्त्विति॥ क्वचित्तु यत्तु स्थाने अथेति पाठः। तन्नेत्यस्य स्थाने चात्रेति पाठः आकाशं न द्वे इत्यादिप्रतीतिवदाकाशं न

द्वित्ववदिति प्रतीतेः प्रमात्वस्येति। आकाशं न द्वे इति प्रतीतौ हि आकाशत्वावच्छेदेन समवायसंबन्धावच्छिन्नद्वित्वनिष्ठावच्छेदकताकद्वित्वादिम

द्भेदो विषयः स एव आकाशं न द्वित्ववदिति प्रतीतावपि विषय इति आकाशं न द्वे इति प्रतीतेर्यथा प्रमात्वं स्वीकृतं तथा आकाशं न द्वित्ववदिति प्रतीतेरप्यम

पि प्रमात्वं स्यात्तद्वारणाय समवायेन द्वित्वादिमतो भेद आकाशत्वावच्छेदेन न स्वीकर्तव्यः॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

तथाचेति।आकाशत्वावच्छेदेनसमवायेनह्रित्वादिमद्भेदास्वीकारेचसति।ननुपर्याप्तिसंबन्धावच्छिन्नह्रित्वनिष्ठावच्छेदकताकह्रित्वादिमद्भेदआकाशंन
हेइतिप्रतीतौविषयस्तत्कथमप्रमात्वंमतआह॥पर्याप्तेरविलक्षणत्वेइति।पर्याप्तेर्ह्रित्वरूपत्वेह्रित्वसमवायरूपत्वेवाइत्यर्थः।तथाचपर्याप्त्यनंगीकारेआ
काशत्वावच्छेदेनसमवायेनह्रित्वादिमद्भेदानंगीकारेचआकाशंनह्रेइत्यादिप्रतीतेरपिअप्रमात्वापत्तिःसमवायेनह्रित्वादिमद्भेदाभाववतिआका
शेसमवायेनह्रित्वादिमद्भेदावगाहित्वात्प्रमात्वापत्तिः।समाधत्ते॥तन्नेति।आकाशंनह्रित्ववदितिप्रतीतौहिमत्वर्थसमवायीप्रतियोगितयाविष
यस्तथाचाकाशमपिह्रित्वसमवायीइतिह्रित्वसमवायित्वावच्छिन्नप्रतियोगिताकह्रित्वसमवायिभेदःआकाशेनास्तीतितदवगाहिनीआकाशं

तथाचपर्याप्तेरविलक्षणत्वेआकाशंनह्रेइत्यादिप्रतीतेरप्यप्रमात्वापत्तिरिति।तन्न।आकाशंनह्रित्ववदितिप्रतीतौह्रित्वसम
वायावच्छिन्नभेदएवविषयःमतुपासंबंधमुख्येरवात्।नतुह्रित्वावच्छिन्नभेदःएवंचाकाशत्वाद्यवच्छेदेनह्रित्वाद्यवच्छिन्नभेद
एवस्वीकर्तव्यःनतुतत्संबंधावच्छिन्नभेदइत्याकाशंनह्रेइतिप्रतीतेरप्रमात्वस्याकाशंनह्रित्ववदितिप्रतीतेर्वाप्रमात्वस्यनप्रसंगः

नह्रित्ववदित्यप्रमैवेत्यर्थः।नतुह्रित्वावच्छिन्नभेदइति।आकाशंनह्रित्ववदितिप्रतीतौह्रित्वावच्छिन्नभेदोनविषयायनप्रमात्वमापद्येत।किंतुह्रित्वस
मवायिनोभेदोविषयःआकाशमपिह्रित्वसमवायीतिह्रित्वसमवायिभेदाभावादाकाशंनह्रित्ववदितिप्रतीतिरप्रमैवेत्यर्थः।आकाशव्यक्तिरेकैवेत्याका
शंनह्रेइतिप्रतीतौह्रित्वावच्छिन्नस्यभेदएवविषयइतिप्रतीत्योर्भिन्नविषयकत्वमित्यर्थः।उपसंहरति।एवंचेति।आकाशंनह्रित्ववदितिप्रतीतेर्ह्रि
त्वावच्छिन्नभेदाविषयकत्वेसतिह्रित्वसमवायावच्छिन्नभेदविषयत्वेचसतीत्यर्थः।आकाशत्वावच्छे॥ ६ ॥ ७ ॥ ६ ॥

देनद्वित्वाद्यवच्छिन्नभेदएवस्वीक्रियतेनतुतत्संबंधावच्छिन्नभेदः। द्वित्वस्ययःसंबंधःसमवायस्तदवच्छिन्नभेदः द्वित्वसमवायावच्छिन्नप्रतियोगिताकद्वित्वसमवायिभेदः नप्रतीयतेइत्यर्थः। तेनाकाशेद्वित्वावच्छिन्नभेदसत्त्वादाकाशंनद्वेइतिप्रतीतेरप्रमात्वस्यनप्रसंगः किंतुविषयसत्त्वात्प्रमात्वमित्यर्थः। आकाशंद्वित्वसमवायीभेदरूपविषयाभावादाकाशंनद्वित्ववदितिप्रतीतेर्वाप्रमात्वप्रसंगोनकिन्तुअप्रमात्वमेवेत्यर्थः आकाशोनद्वावित्यत्रद्वौप्रतियोगिनौद्वित्वंप्रतियोगितावच्छेदकं आकाशोनद्वित्ववानित्यत्रद्वित्वसमवायीप्रतियोगीद्वित्वसमवायश्चप्रतियोगितावच्छेदकइतिप्रतीत्योर्विषयभेदादितिभावः। शंकते॥ अथेति॥ आकाशत्वव्याप्यद्वित्वपर्याप्तेरभावादाकाशावित्यादिप्रयोगवारणाय

अथोद्देश्यतावच्छेदकव्याप्यपर्याप्तेर्द्वित्वसंबन्धत्वेधवखदिरौछिन्नतीत्यादौउद्देश्यतावच्छेदकीभूतधवत्वखदिरत्वव्याप्यंद्वित्वादिद्वयमेवप्रसेतव्यंनतुधवखदिरादिपर्याप्तद्वित्वादिकं। तथाचैकैकधवखदिरादितात्पर्येणतथाप्रयोगानुपपत्तिरितिद्वित्वान्वयितावच्छेदकमपेक्षाबुद्धिविषयत्वादिरूपमुभयादिनिष्ठंसाहित्यंद्वंद्वसमासार्थोवाच्यः तथाचमीमांसकमतप्रवेशइतिचेन्न॥ ॐ ॥ ६ ॥ ॐ॥ ६॥ ॐ॥ ६ ॥

उद्देश्यतावच्छेदकव्याप्यपर्याप्तेर्द्वित्वादिसंबन्धत्वेंगीकृतेधवखदिरौछिन्नतीत्यादौउद्देश्यतावच्छेदकीभूतधवत्वव्याप्यखदिरत्वव्याप्यंनधवखदिरोभयपर्याप्तद्वित्वंकिंतुधवद्वयखदिरद्वयगतंद्वित्वमितिद्वित्वादिद्वयमेवप्रसेतव्यं। तथाचएकधवैकखदिरादितात्पर्येणतथाधवखदिरावितिप्रयोगानुपपत्तिरिति। द्वित्वान्वयितावच्छेदकमिमौद्वावित्यपेक्षाबुद्धिविशेषविषयत्वादिरूपमुभयादिविशिष्टंसाहित्यंद्वन्द्वसमाससंज्ञासमुदायार्थः। उद्देश्यतावच्छेदकस्य

प्तिसंबंधेन द्वित्ववंतौ धवखदिराविति बोधांगीकारे मीमांसकमतप्रवेश इति शंकायां समाधानमाह। यत्रेति। यत्र धवखदिरावित्यादौ। धवत्वादिरूपैक धर्मस्य द्वित्वाद्युद्देश्यतावच्छेदकता॥ तत्रैव॥ धवावित्यत्रैव। धवत्वरूपोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेर्द्वित्वसंसर्गतानियमः। यत्र तु धव खदिरावित्यत्र। धवत्वखदिरत्वरूपधर्मद्वयादेः। तथात्वं। द्वित्वाद्युद्देश्यतावच्छेदकत्वं। तत्र केवला॥ उद्देश्यतावच्छेदकव्याप्तिरहिता पर्याप्तिः। सम वाय एव वा संसर्ग इत्युपगमात्। साहित्यस्य मीमांसकमतसिद्धस्यान्वयितावच्छेदकतां विनैव एकधवैकखदिरादितात्पर्येण धवखदिरावित्यादिप्रयो गोपपत्तेरित्यर्थः। शंकते। नचैवमिति। एवं धर्मद्वयादेरुद्देश्यतावच्छेदकत्वे केवलपर्याप्तेः समवायस्य वा द्वित्वादिसंबंधतांगीकारे इत्यर्थः। एकधवखदि

यत्र एकधर्मस्य द्वित्वाद्युद्देश्यतावच्छेदकता तत्रैवोद्देश्यतावच्छेदकव्याप्तिविशिष्टपर्याप्तेः संसर्गता नियमः यत्र धर्मद्वयादे स्तथात्वं तत्र केवलापर्याप्तिः समवाय एव वा संसर्ग इत्युपगमात् विनैव साहित्यस्यान्वयितावच्छेदकतां एकैकतात्पर्येण धव खदिरावित्यादिप्रयोगोपपत्तेः नचैवमेकैकधवखदिरादितात्पर्येणापि धवौ खदिरावित्यादिप्रयोगापत्तिः॥ ९ ॥ ६ ॥

रादितात्पर्येणापि धवखदिरावित्यादिप्रयोगापत्तिरिति। शुद्धपर्याप्तिर्यदि द्वित्वसंबंधः समवायो वा तदा शुद्धपर्याप्त्या एकस्मिन् धवेपि द्वित्वसत्वादेकधवैक खदिरतात्पर्येणापि धवखदिरावित्यादिप्रयोगः स्यादित्यर्थः। द्वित्वपर्याप्त्यवच्छेदकता यत्र धर्मद्वये तत्र शुद्धपर्याप्तिः समवायो वा संसर्गः यथा धवखदि रावित्यत्र धवत्वे खदिरत्वे च द्वित्वपर्याप्त्यवच्छेदकता तथैव धवखदिरावत्र धवत्वे खदिरत्वे च धर्मद्वये द्वित्वपर्याप्त्यवच्छेदकता। एवं ध वैकखदिरैकतात्पर्येपि धवखदिराविति प्रयोगापत्तिरित्यर्थः॥

तादृशवाक्यद्वयविषयकसमूहालंबनेन धवखदिराविति वाक्यद्वयविषयकसमूहालंबनप्रत्यक्षेण जन्यायाः धवविशेष्यिकाखदिरविशेष्यिकायाः शाब्दबुद्धेस्तस्या धवत्वखदिरत्वरूपनानाधर्मावच्छिन्नोद्देश्यताकतया शुद्धपर्याप्तेरपि संसर्गतयावगाहनसंभवात् शुद्धपर्याप्तेरपीत्यपिना धवत्वव्याप्तिविशिष्टपर्याप्तेः खदिरत्वव्याप्तिविशिष्टपर्याप्तेश्च संसर्गतयावगाहनपरिग्रहः समाधत्ते। यत्रेति। यत्र। धवखदिरावित्यत्र। धवत्वखदिरत्वरूपनानाधर्मावच्छिन्नविशेष्यताद्वयनिरूपिता एकाद्वित्वादिप्रकारता। तत्रैव। धवखदिरावित्यत्रैव। शुद्धायाः पर्याप्तेः समवायस्य वा संसर्गतया भानोपगमादित्यर्थः॥ धवौ

तादृशवाक्यद्वयविषयकसमूहालंबनजन्यसमूहालंबनशाब्दबोधेन नानाधर्मावच्छिन्नोद्देश्यताकतया शुद्धपर्याप्तेरपि संसर्गतयाऽवगाहनसंभवादिति वाच्यम्। यत्र नानाधर्मावच्छिन्नविशेष्यतानिरूपिता एकाद्वित्वादिप्रकारता तत्रैव शुद्धायाः पर्याप्तेः समवायस्य वा संसर्गतया भानात्। धवौ खदिरावित्यादिनानावाक्यजन्यसमूहालंबनशाब्दबोधे विशेष्यताभेदेन प्रकारताभेदेन चोद्देश्यतावच्छेदकधवत्वादिव्याप्तिविशिष्टपर्याप्तेः संसर्गतानियमेन एकैकधवखदिरादितात्पर्येण तथाप्रयोगासंभवात् धवखदिरावित्यादिसमासोत्तरद्विवचनेन धवखदिरत्वाद्यवच्छिन्ननानाविशेष्यतानिरूपितैकद्वित्वादिप्रकारताशालिज्ञानमेव जन्यते

खदिरावित्यादिनानावाक्यजन्यसमूहालंबनशाब्दबोधे विशेष्यताद्वयभेदेन द्वित्वद्वयनिष्ठप्रकारताभेदेन चोद्देश्यतावच्छेदकधवत्वादिव्याप्तिविशिष्टपर्याप्तेः संसर्गतानियमेन एकैकधवखदिरादितात्पर्येण तथाप्रयोगासंभवात्॥ धवौ खदिराविति प्रयोगासंभवादित्यर्थः॥ धवखदिरावित्यादिसमासोत्तरद्विवचनेनेति॥ ६॥

तादृशवाक्यजन्यबोधस्य। धवखदिरावित्यादिवाक्यजन्यबोधस्य। समूहालंबनात्मकतयाविशेष्यताभेदेनप्रकारताभेदाभावादिति। धवौखदि
रावितिसमूहालंबनएवविशेष्यताभेदेनहित्वप्रकारताभेदःस्वीक्रियतेनतुविशिष्टज्ञानेइत्यर्थः। यथाखड्गीचैत्रः कुंडलीत्यत्रतथातेनप्रकारेणनथा
विधसमूहालंबनात्मकेइत्यर्थः। अन्यथासमूहालंबनतस्तद्वैलक्षण्यानुपपत्तेरिति। अन्यथाधवखदिरावितिविशिष्टज्ञानेपिनानाविशेष्यतानिरूपित
द्वित्वादिनिष्ठनानाप्रकारतास्वीकारेऽयमर्थः। धवखदिरादिनिष्ठनानाविशेष्यतानिरूपितद्वित्वादिनिष्ठनानाप्रकारताशालिनिधवौखदिरावित्यादिसमू

तादृशवाक्यजन्यबोधस्यसमूहालंबनात्मकतयाविशेष्यताभेदेनप्रकारताभेदाभावात्। यथाहि। समूहालंबनात्मकेख
ड्गीचैत्रः कुण्डलीत्याकारकनानाविशेषणैकैकविशेष्यकज्ञानेनानाप्रकारतानिरूपितैकाविशेष्यतातथातथाविधेधवखदिरा
वित्याकारकेनानाविशेष्यकैक.विशेषणकज्ञानेविशेष्यताभेदेप्यभिन्नैवद्वित्वादिप्रकारता अन्यथासमूहालंबनतस्तद्वैलक्षण्यानु
पपत्तेः। समासघटकधवखदिरादिपदानामेकवाक्यतानुपपत्तिश्च। तत्प्रयोज्यविषयतयासाक्षात्परंपरयावानिरूपितायाविष
यतायाःतत्प्रयोजकत्वस्यैवतदेकवाक्यतापदार्थत्वात्॥

॥ हालंबनतः धवखदिरावित्यादिविशिष्टज्ञानस्यवैलक्षण्यानुपपत्तेरित्यर्थः। समा
सघटकधवखदिरादिपदानामेकवाक्यतानुपपत्तिश्चेति। विशेष्यताद्वयनिरूपितैकप्रकारताशालिज्ञानजनकवाक्ययोरेवएकवाक्यत्वादिति
भावः। एकवाक्यतालक्षणमाह। तत्प्रयोज्यविषयतयासाक्षात्परंपरयावानिरूपितायाविषयतायास्तत्प्रयोजकत्वस्यैवतदेकवाक्यतापदार्थत्वा
दिति। धवखदिरावित्यत्रतत्प्रयोज्याधवपदप्रयोज्याधवपदज्ञानजन्याधवपदार्थोपस्थि ॥ ६ ॥ ७ ॥ ६ ॥ ९ ॥ ७ ॥

तिजन्यधवखदिरावितिशाब्दबोधनिरूपितधवपदार्थनिष्ठविशेष्यतातयापरंपरयानिरूपितायाद्वित्वनिष्ठाप्रकारतास्व्यविषयतातत्प्रयोजक
त्वस्यखदिरपदनिष्ठस्यैवनदेकवाक्यतापदार्थत्वात् धवपदैकवाक्यतापदार्थत्वात्। धवपदजन्यधवोपस्थितिजन्यधवखदिरशाब्दबोधनिरू
पितधवनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारतानिरूपितशाब्दबोधीयखदिरनिष्ठविशेष्यताशालिशाब्दधीजनकखदिरोपस्थितिजनक
त्वंखदिरपदेइतिधवपदैकवाक्यतापन्नंखदिरपदमेवेतिरीत्याखदिरपदैकवाक्यतापन्नंधवपदमितिपरस्परंधवपदखदिरपदयोरेकवाक्य
त्वमित्यर्थः। एवंराजपुरुषइत्यत्रराजसंबन्धीप्रकारः पुरुषोविशेष्यः नत्रतत्प्रयोज्याराजपदप्रयोज्यायाराजपदजन्याराजसंबंध्युपस्थितिजन्यशा
ब्दबोधीयराजसंबंधिनिष्ठाप्रकारताख्याविषयतातन्निरूपितायापुरुषनिष्ठाविशेष्यताख्यासास्याद्विषयतातत्प्रयोजकत्वंतन्निरूपकशाब्द

॥ नचैतादृशैकवाक्यताविरहेपिसतिविरहः। तथासतिसमासस्यैवानुपपत्तेः॥

बोधजनकपदार्थोपस्थितिजनकत्वरूपमेकवाक्यत्वंपुरुषपदे एवंपुरुषपदप्रयोज्यापुरुषपदजन्यपदार्थोपस्थितिजन्यशाब्दबोधनिरूपितापु
रुषनिष्ठविशेष्यताख्याविषयतातन्निरूपितायाराजसंबन्धिनिष्ठाप्रकारतातत्प्रयोजकत्वंतन्निरूपकशाब्दजनकपदार्थोपस्थितिजनकत्वरूप
मेकवाक्यत्वंराजपदेतत्पदजन्यज्ञाननिरूपितत्वेनतत्पदप्रयोज्यत्वव्यवहारोविषयतायामितिबोध्यमित्यर्थः। नचैतादृशैकवाक्यताविरहेपिस
तिविरहइतिशंकामन्यः। समाधत्ते। तथासतिसमासस्यैवानुपपत्तेरिति। समासस्यनिरुक्तैकवाक्यतारूपत्वादितिराजपदजन्यपदार्थोपस्थिति राम
जन्यशाब्दनिरूपितराजनिष्ठप्रकारताख्याविषयतानिरूपितसंबंधनिष्ठविशेष्यत्वाभिन्नप्रकारता॥ ६ ॥ ६ ॥ ८९

निरूपिता शाब्दबोधीयपुत्रनिष्ठविशेष्यताशाली शाब्दबोधजनकपुत्रोपस्थितिजनकत्वस्यैकवाक्यत्वं पुत्रपदे एव न तु पुरुषपदेऽस्तीति भावः। जल
पृथिव्योः स्नेहगंधावित्यत्र सप्तम्यर्थो द्वित्वमाधेयत्वं च तथा च जलपृथिवीवृत्ति द्वित्वादिनिष्ठप्रकारतानिरूपितं यत् जलत्वावच्छिन्नपृ
थिवीत्वावच्छिन्नविशेष्यताद्वयात्मकप्रकारताद्वयं तन्निरूपिताया सप्तम्यर्थाधेयत्वनिष्ठविशेष्यतारूपप्रकारतानन्निरूपितं यद्धर्मिताव-

अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ राजपुरुषपदादीनां समासवारणाय समर्थपदानामेव समासानुशासनात् सा
मर्थ्यस्य निरुक्तैकवाक्यतारूपत्वात् जलपृथिव्योः स्नेहगंधावित्यादितोऽपि न जले स्नेहः पृथिव्यां गंध इत्याकारकसमूहालं-
बनबोधः किन्तु न द्विलक्षणो द्वित्वादिनिष्ठप्रकारतानिरूपितजलत्वपृथिवीत्वाद्यवच्छिन्नविशेष्यतात्मकप्रकारता
द्वयनिरूपिताधेयत्वप्रकारतानिरूपितं यद्धर्मितावच्छेदकद्वित्वादिनिष्ठप्रकारतानिरूपकं स्नेहत्वगंधत्वाद्यवच्छि
न्नविशेष्यताद्वयं तद्भानमिति अतो न कुत्राप्येकवाक्यताभंगः। चैत्रो मैत्रश्च गच्छत इत्यादावाख्यातार्थद्वित्वादिप्रकारेण भास
माने चैत्रमैत्रोभयादौ गमनाश्रयत्वाद्यन्वयेन निरुक्तैकवाक्यतासंभवेऽपि समासविधेर्विभाषाधिकारीयत्वादसमासः।

च्छेदकं द्वित्वादिनिष्ठप्रकारतानिरूपकं स्नेहत्वावच्छिन्नगंधत्वावच्छिन्नविशेष्यताद्वयं न द्वौ स्नेहो गंधश्चेति बोधः। द्वौ स्नेहगंधौ जलपृथिव्यु
भयवर्त्तिनौ इति बोधाकारः। चैत्रो मैत्रश्च गच्छत इति। द्वित्वं कृतिराख्यातार्थः। प्रथमा निरर्थिका चैत्रमैत्रौ गमनकर्त्तारावितिबोधः। निरुक्तैकवा
क्यतासंभवेऽपीति। चैत्रपदप्रयोज्या चैत्रपदजन्यपदार्थोपस्थितिजन्यशाब्दधीनिरूपिताया चैत्रनिष्ठविशेष्यतानन्निरूपिताख्याता॥

व्यु·टी· र्थे द्वित्वनिष्ठैकप्रकारतानन्निरूपितायां मैत्रनिष्ठविशेष्यतानत्प्रयोजकत्वं मैत्रपदे इति चैत्रमैत्रपदयोरेकवाक्यतारूपसामर्थ्यसत्त्वात् चैत्रमैत्रा

१० विति समासापत्तिस्तु द्वारं तु समासविधर्महाविभाषाधिकारीयत्वाद्भवति विभाषाधिकाराच्च चैत्रमैत्रौ गच्छत इति समासोऽप्युपपद्यत इ

त्यर्थः। मैत्रनिष्ठविशेष्यताप्रयोजकत्वं मैत्रपदे मैत्रनिष्ठविशेष्यताशालीशाब्दधीजनकपदार्थोपस्थितिजनकत्वं बोध्यम्। मतान्तरमाह। तत्र

विशेष्यताभेदभिन्नद्वित्वनिष्ठप्रकारताद्वयप्रतियोगीसमूहालंबनो बोध इति तु न सम्यगिति। तत्र। चैत्रो मैत्रश्च गच्छत इत्यत्र। चैत्रनिष्ठ

विशेष्यतानिरूपिताद्वित्वप्रकारताभिन्ना। एवं मैत्रनिष्ठविशेष्यतानिरूपिताद्वित्वनिष्ठाप्रकारताभिन्ना इति विशेष्यताभेदभिन्नद्वित्वादि

निष्ठप्रकारताभेदावगाहिबोधः समूहालंबनबोधः इत्युच्यते द्वित्वनिष्ठप्रकारताद्वयस्य प्रतियोगितानिरूपक इत्यर्थः। दूषयति। तथास

तत्र विशेष्यताभेदभिन्नद्वित्वनिष्ठप्रकारताद्वयप्रतियोगीसमूहालंबनो बोध इति तु न सम्यक्। तथा सत्युक्तयुक्त्या एकै
कचैत्रमैत्रादितात्पर्येण तथा प्रयोगानुपपत्तेः॥ सुक्तयुक्त्येति। तथा सतीति। विशेष्यताभेदेन प्रकारताभेदे सतीति। धवौ खदिरावितिसमू

हालंबने धवद्वयनिष्ठविशेष्यतानिरूपितद्वित्वे प्रकारताभिन्ना· एवं खदिरत्ववन्निष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारताभिन्नेति विशेष्यता

भेदेन प्रकारताभेदः। धवखदिराविति विशिष्टज्ञाने तु धवखदिरादिनिष्ठविशेष्यताद्वयनिरूपितद्वित्वप्रकारता एका अत्रापि प्रकारताभेदे समूहा

लंबनविशिष्टज्ञानयोर्भेदो न स्यादित्युक्तयुक्त्या इत्यर्थः। एकैकचैत्रमैत्रतात्पर्येण तथा प्रयोगानुपपत्तेरिति। चैत्रो मैत्रश्च गच्छत इति प्रयोगानुपपत्तेरि

त्यर्थः। तवमते चैत्रनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारताद्वयस्वीकारे चैत्रद्वयबोधापत्तेरेवं मैत्रनिष्ठविशेष्यतानिरूपितद्वित्वनिष्ठप्रकारताभेदस्वी

कारे मैत्रद्वयबोधापत्तेः एकचैत्रैकमैत्रतात्पर्ये चैत्रो मै
त्रश्च गच्छत इति प्रयोगानुपपत्तेरित्यर्थः॥

प्रसंगादाह॥ आख्यातोपस्थाप्यद्वित्वादिकं च उभयादिरूपान्वयितावच्छेदकावच्छिन्न एवान्वेतीति व्युत्पत्तिरिति। घटत्वपटत्वोभयादिरूपं य
दन्वयितावच्छेदकं तदवच्छिन्ने घटे पटे वाख्यातार्थद्वित्वमन्वेतीति न घटपटौ तिष्ठत इति प्रयोगः तत्र घटत्वरूपेणोपस्थिते घटे पटत्वरू
पेणोपस्थिते पटे आख्यातार्थद्वित्वान्वयः। ननु घटौ स्त इति प्रयोगो न स्यात् आख्यातार्थद्वित्वस्य घटत्वपटत्वाद्युभयरूपेणोपस्थितयोर्घट
पटयोरेवान्वयनियमेन घटौ स्त इत्यत्र केवलघटत्वरूपेणोपस्थितेरुभयरूपेणोपस्थित्यभावादिति चेन्न। घटौ स्त इत्याख्यातं निरर्थक
मेव सुवर्थद्वित्वान्वयस्वीकारेण प्रथमाद्विवचनौकारस्य सार्थकत्वात्। तेनोक्तप्रयोगदर्शनादिति। तेनेत्यस्य घटस्तिष्ठत इत्यादयो न प्र

आख्यातोपस्थापितद्वित्वादिकं चोभयादिरूपान्वयितावच्छेदकावच्छिन्न एवान्वेतीति व्युत्पत्तिः। तेनोक्तप्रयोगदर्शनात् क्रियापदस्य विशेष्यवाचकसमानवचनकत्वनियमेऽपि घटद्वयादितात्पर्येण घटस्तिष्ठत इत्यादयो न प्रयोगाः एकवचनान्तक्रियापदं च तादृशविशेष्यवाचकपदप्रयोग एव साधुः अतो घटास्तिष्ठतीत्यादयो न प्रयोगाः॥

योगा इत्यनेनान्वयः। तेन। घट
त्वपटत्वाद्युभयरूपेणोपस्थितघटपटयोरेवाख्यातार्थद्वित्वान्वयस्वीकारेण। अन्वयितावच्छेदकं केवलघटत्वमित्याद्युभयरूपान्वयितावच्छे
दकरूपेणानुपस्थितं घटद्वयादितात्पर्येण घटस्तिष्ठत इत्यादयो न प्रयोगा इत्यर्थः। चैत्रो मैत्रश्च गच्छत इत्युक्तप्रयोगदर्शनात् हेतोर्गच्छत इति द्वि
वचनान्तक्रियापदस्य चैत्रमैत्रैकवचनान्तविशेष्यवाचकपदसमानवचनत्वनियमाभावेऽपि इत्यनेन घटस्तिष्ठत इत्येकवचनान्तपदपटे द्विवचनां
तक्रियापदप्रयोगापत्तौ प्राप्तायामपि घटत्वपटत्वाद्युभयरूपान्वयितावच्छेदकरूपेणानुपस्थितेरियमापत्तिर्न भवतीत्यर्थः। एकवचनान्तक्रियापदं ए

मु॰टी॰ नांनचैत्रादिविशेष्यवाचकपदप्रयोगे एव साध्वतो घटास्तिष्ठंतीति बहुवचनांतकर्तृपदे एकवचनांतक्रियापदप्रयोगो न भवतीत्यर्थः। शंक
९१ ते। अथैकघटादिव्यक्तेरेतद्देशवृत्तितादशायां अत्र घटौ स्तः घटाः संतीति कथं न प्रयोगा इति। एकघटसत्त्वदशायां घटौ स्तः घटाः संतीति प्रयो
गापत्तिमुपपादयति। घटादौ घटत्वादिव्याप्तिविशिष्टपर्याप्तिसंबंधेन द्वित्वादेः सत्त्वात्। यत्रैको धर्मोऽन्वयितावच्छेदकस्तत्र तु घटत्वादिरूपान्व
यितावच्छेदकव्याप्तिविशिष्टपर्याप्तिरेव द्वित्वादेः संबन्ध इत्युक्तत्वात्। एकत्र द्वयमिति रीत्या घटो द्वित्ववानेतादृशवृत्तित्वाश्रयवांश्चेति। अत्र

अथैकघटादिव्यक्तेस्तद्देशवृत्तितादशायामत्र घटौ स्तः घटाः संतीति कथं न प्रयोगाः घटादौ घटत्वादिव्याप्तिविशिष्टपर्या
प्तिसंबंधेन द्वित्वादेः स्वरूपसंबंधेन तद्देशवृत्तित्वाश्रयत्वादेश्च सत्त्वात्। न च द्वित्वेनोपस्थितयोर्द्वयोरेव व्यक्त्योरेवं बहुत्वेनोप
स्थितासु बहुषु व्यक्तिषु विधेयान्वयात्। व्यक्त्यन्तरेष्वेव तद्देशवृत्तित्वाश्रयत्वादिबाधान्नतादृशप्रयोग इति वाच्यम्। व्यक्त्य
न्तरेऽयोग्यतया तादृशविधेयानवगाहिन एकघटेतदवगाहिनो बोधस्यासत्तौ बाधकाभावात्॥ घटौ स्त इत्यादयः प्रयोगाः स्युरित्यर्थः।
नन्वत्र घटौ स्त इत्यादावेकधर्मविशिष्टेऽपरधर्मवैशिष्ट्यमिति रीत्या च शाब्दधीः स्वीक्रियतेऽतो द्वित्वविशिष्टे घटे एतद्देशवृत्तित्वाश्रयान्वयाद्द्वित्वाश्रये
देशांतरीयघटे एतद्देशवृत्तित्वाश्रयत्वादिबाधात्। नात्र घटौ स्त इति प्रयोग इत्याशयेन सिद्धांती शंकते। न चेति। द्वित्वेनोपस्थितयोर्द्वयोरेव घटव्य
क्त्योरेतद्देशवृत्तित्वविधेयान्वयाद्देशांतरीयघटव्यक्त्यंतरे एतद्देशवृत्तित्वाश्रयत्वादिबाधान्नतादृशप्रयोगः न अत्र घटौ स्त इति प्रयोग इत्यर्थः। राम
।पुनरपि पूर्वपक्षी स्वमतं व्यवस्थापयति। व्यक्त्यंतर इति। देशांतरीयघटव्यक्त्यंतरे अयोग्यतया। योग्यताज्ञानरूपकारणविरहेण ॥ ६ ॥ ९१

एतद्देशवृत्तित्वाश्रयत्वरूपतादृशविधेयावगाहिनः। एतद्देशवृत्त्येकघटयोग्यतयानवगाहिनः। एतद्देशवृत्तित्वावगाहिनोऽत्र घटौस्त इति बो
धस्योत्पत्तौ बाधकाभावादित्यर्थः। तथा तात्पर्येण। घटांतरे एतद्देशवृत्तित्वानवगाहि एतद्देशीयएकघटे एतद्देशवृत्तित्वावगाहिबोधोजायतामि
ति तात्पर्येण। तथा प्रयोगस्य। अत्र घटौस्त इत्यादिप्रयोगस्य दुर्वारत्वादित्यर्थः। पुनः सिद्धांती शंकते। नचव्यासज्यवृत्तीति। व्यासज्यवृत्तिधर्म
उभयत्वादिः यत्रान्वयितावच्छेदकः। तत्र। अत्र घटौस्त इत्यत्र। यावत्सु देशांतरीयघटैकतद्देशीयघटादिषु द्वित्वादिरूपान्वयितावच्छेदक
स्य पर्याप्तिस्तावतामेव घटादीनां एतद्देशवृत्तित्वरूपपदार्थांतरेण सहान्वये व्युत्पत्तिनियमस्तथा च द्वित्वाधिकरणदेशांतरीयघटे एतद्देशवृ

तथा तात्पर्येण तथा प्रयोगस्य दुर्वारत्वात्। नच व्यासज्यवृत्तिधर्मो यत्रान्वयितावच्छेदकस्तत्र यावत्सु अन्वयितावच्छे
दकपर्याप्तिस्तावतामेव पदार्थान्तरेणान्वये व्युत्पत्तिस्तन्निर्वाहाय तादृशधर्मावच्छिन्ने इतरान्वयबोधजनकसामग्र्या उ
भयादिविषयकपदार्थान्तरान्वयबुद्धित्वमेव जन्यतावच्छेदकं वक्तव्यमिति॥ ((त्तित्वबाधात् न अत्र घटौस्त इति प्रयोगापत्तिरिति

भावः। तन्निर्वाहाय। ईदृशव्युत्पत्तिनिर्वाहाय॥ तादृशधर्मावच्छिन्ने। द्वित्वरूपव्यासज्यवृत्तिधर्मावच्छिन्ने घटद्वये। एतद्देशवृत्तित्वाश्रयत्व
रूपेतरस्य अन्वयबोधजनकसामग्र्याः। अत्रेति सप्तम्यंत समभिव्याहृतद्विवचनांतघटपदज्ञानजन्यपदार्थोपस्थितिघटितयोग्यताज्ञानादि
सामग्र्याः। जन्यतावच्छेदक उभयत्वावच्छिन्नघटद्वयविशेष्यकएतद्देशवृत्तित्वाश्रयत्वरूपपदार्थान्तरान्वयबुद्धित्वमेव वक्तव्यमिति॥
द्वित्वादिना एकघटमात्रविषयकएतद्देशवृत्तित्वाश्रयत्वरूपपदार्थांतरान्वयबुद्धित्वमेव वक्तव्यमिति॥ ६ ॥ ७ ॥ ६ ॥

द्वित्वादिनाएकघटमात्रविषयकएतद्देशवृत्तित्वाद्यन्वयबोधोनसंभवतीति।उभयत्वावच्छिन्नघटद्वयविशेष्यकैतद्देशवृत्तित्वप्रकारका
न्वयबुद्धित्वरूपमुक्तसामग्रीकार्यतावच्छेदकंउभयत्वावच्छिन्नोभयविशेष्यकैतद्देशवृत्तित्वप्रकारिकायामत्रघटौस्तइत्याकारकबु
द्धावेवास्तिनतुअत्रघटौस्तइत्याकारकद्वित्वविशिष्टैकघटमात्रविषयकैतद्देशवृत्तित्वप्रकारकान्वयबोधेस्यतउक्तसामग्रीबलात्का
र्यतावच्छेदकानाक्रांतद्वित्वविशिष्टैकघटमात्रविषयकैतद्देशवृत्तित्वप्रकारकौबोधआपादयितुंनशक्यतेइतितादृशबोधतात्पर्येणद्वि
त्वविशिष्टैकघटमात्रविशेष्यकैतद्देशवृत्तित्वप्रकारकबोधोऽत्रघटौस्तइतिवाक्याज्जायतामितितात्पर्येणनतादृशप्रयोगापत्तिरितिअत्रघटौस्त

द्वित्वादिनैकघटादिमात्रविषयकैतद्देशवृत्तित्वाद्यन्वबोधोनसंभवतीतिननतादृशबोधतात्पर्येणतादृशप्रयोगापत्तिरितिवा
च्यम्।योग्यताभ्रमेणाकाशावत्रस्तइत्यादिवाक्याद्द्वित्वादिनाएकव्यक्तिमात्रविषयकपदार्थान्तरान्वयबोधात्तादृशव्युत्पत्तेस्त
त्रनिर्वाहककार्यकारणभावस्यचकल्पनासंभवात्॥ ॥इतिप्रयोगापत्तिरित्यर्थः।पूर्वपक्ष्याह।योग्यताभ्रमेणाकाशावत्रस्तइतिवाक्यादिति
।अत्रान्वयितावच्छेदकमाकाशत्वमेकमिति आकाशत्वादिविशिष्टद्वित्वपर्याप्तिसंबन्धेनद्वित्वमाकाशेबाधितमतउक्तंयोग्यताभ्रमेणेति।आ
काशत्वव्याप्तिःशब्दादौप्रसिद्धाद्वित्वपर्याप्तिश्चघटद्वयेप्रसिद्धानयोर्वैशिष्ट्यांशेभ्रमइतिसंबंधांशेपिभ्रमस्यपूर्वमुक्तत्वात्योग्यताभ्रमेणएतद्दे
शवृत्तित्ववानाकाशइतिबोधांगीकारेणद्वित्वादिनाएकव्यक्तिमात्रविषयकपदार्थांतरेणान्वयबोधात्द्वित्वविशिष्टाकाशविशेष्यकैतद्देश
वृत्तित्वान्वयबोधात्।हेतोस्तादृशव्युत्पत्तेः व्यासज्यवृत्तिधर्मोयत्रान्वयितावच्छेदकस्तत्रयावत्स्वन्वयितावच्छेदकतापर्याप्तिस्तावतामे

एवंतन्निर्वाहकस्य। ईदृशव्युत्पत्तिनिर्वाहकस्य। उभयत्वादिविशिष्टोभयविशेष्यकैतद्देशवृत्तित्वप्रकारकान्वयबुद्धित्वावच्छिन्नंप्रतितादृशध र्मावच्छिन्नेतरान्वयबोधजनकसामग्रीत्वेनकारणतेतिकार्यकारणभावस्यचाकाशावत्रस्तद्सत्रव्यभिचारेणकल्पनासंभवादित्यर्थः। यत्विति। अत्रघटोस्तीत्यस्याकारिकायांहित्वावच्छिन्नोद्देश्यताकैतद्देशवृत्तित्वविधेयकबुद्धौघटत्वसमानाधिकरणहित्वव्यापकतानियमतोविधेयस्यएतद्देशवृत्तित्वस्यसंसर्गेणतद्देशवृत्तित्वीयस्वरूपसंसर्गभासतेइतिव्युत्पत्तिः यत्रयत्रघटत्वविशिष्टंहित्वंतत्रएतद्देशवृत्तित्वीयस्वरूपसंसर्गः इतिवृत्तित्वीयस्वरूपसंसर्गव्यापकता। यत्रचोद्देश्यतावच्छेदकविशिष्टाधिकरणाप्रसिद्ध्यातद्व्यापकत्वमप्रसिद्धमिति।

यत्तुहित्वावच्छिन्नोद्देश्यताकबुद्धावुद्देश्यतावच्छेदकव्यापकतानियमतोविधेयसंसर्गेभासतेइतिव्युत्पत्तिः। यत्रचोद्देश्यतावच्छेदकविशिष्टाधिकरणाप्रसिद्ध्यातत्तद्व्यापकत्वमप्रसिद्धम्। तत्रापिखंडशःप्रसिद्धानांतद्घटकपदार्थानांविशेष्यविशेषणभावापन्नानांभानसंभवान्नपीतशंखावत्रेसादौतादृशव्युत्पत्तिभंगः।

(१) यत्रचपीतशंखावत्रेसादौच उद्देश्यतावच्छेदकंपीतत्वतद्विशिष्टशंखत्वंतदधिकरणत्वाप्रसिद्ध्यापीतशंखाभावात्। यद्वाउद्देश्यतावच्छेदकंयद्विशिष्टंपीतत्वविशिष्टशंखत्वंतदधिकरणःपीतशंखाधिकरणाप्रसिद्धेरित्यर्थः। वस्तुतस्तुविशिष्टपदंसंपातायातंउद्देश्यतावच्छेदकाधिकरणाप्रसिध्येतिपाठः। उद्देश्यतावच्छेदकपीतत्वविशिष्टशंखत्वाधिकरणाप्रसिद्ध्याव्यापकत्वंपीतत्वविशिष्टशंखत्वव्यापकत्वं। एतद्देशवृत्तित्वीयस्वरूपसंसर्गेःसिद्धम्। तत्रापिखंडशःप्रसिद्धानांतद्घटकपदार्थानां। व्यापकताघटकपदार्थानां। विशेष्यविशेषणभावापन्नानांभानसंभवान्नपीतशंखावत्रेसादौतादृशव्युत्पत्तिभंगः॥

उद्देश्यतावच्छेदकव्यापकतानियमतो विधेयसंसर्गे भासते इति व्युत्पत्तेर्भंगो नास्तीत्यर्थः। पीतशंखवच्चेसत्र सामानाधिकरण्येन परस्परविशे
षणविशेष्यभावापन्नेन धर्मिनावच्छेदकीभूतं यत्पीतत्वशंखत्वोभयं तद्व्याप्तिर्द्वित्वपर्याप्तिश्चैत त्रितयनिष्ठसांसर्गिकविषयतावच्छिन्नद्वित्व
निष्ठावच्छेदकतानिरूपिता अवच्छेदकत्वनिष्ठा विषयतानन्निरूपिताधिकरणनिष्ठविषयतातन्निरूपिताया वृत्तित्वनिष्ठाविषयतातन्निरूपि
ताया अभावनिष्ठविषयतातन्निरूपिताप्रतियोगित्वनिष्ठविषयतातन्निरूपिता अवच्छेदकत्वनिष्ठाविषयतातन्निरूपिताया अभावनिष्ठवि
षयतातन्निरूपिताया स्वरूपसंबन्धत्वनिष्ठाविषयतातन्निरूपिताया एतद्देशवृत्तित्वीयस्वरूपसंबंधनिष्ठसांसर्गिकविषयतातदवच्छिन्नै
तद्देशवृत्तित्वनिष्ठविधेयतानन्निरूपिताया पीतशंखनिष्ठविशेष्यतातच्छालीशाब्दबोधः एवमाकाशापन्नेनेत्यत्र परस्परविशेषणविशेष्यभा

एवंचैकघटादिमात्राधिकरणपरस्मात्र घटोस्तु इत्यादिवाक्यस्याप्रामाण्यं सुघटमेव॥

वापन्नाकाशव्याप्तिपर्याप्त्युभयनिष्ठसांसर्गिकविषयतावच्छिन्नद्वित्वनिष्ठप्रकारतानिरूपिताया अधिकरणनिष्ठविषयतानन्निरूपिताया वृत्तित्वनिष्ठ
विषयतातन्निरूपिताया भावविषयतानन्निरूपिताया प्रतियोगित्वनिष्ठविषयतातन्निरूपिताया अवच्छेदकत्वनिष्ठविषयतातन्निरूपिता अभावनि
ष्ठविषयतातन्निरूपिताया अवच्छेदकत्वनिष्ठविषयतातन्निरूपिताया एतद्देशवृत्तित्वीयस्वरूपसंबंधत्वनिष्ठविषयतातन्निरूपिताया एतद्दे
शवृत्तित्वीयस्वरूपसंबंधनिष्ठविषयतातदवच्छिन्न एतद्देशवृत्तित्वनिष्ठविधेयतातन्निरूपिता आकाशनिष्ठोद्देश्यतातच्छालीशाब्दबोध इति द्वित्व
वद्वृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वमेवैतद्देशवृत्तित्वीयस्वरूपसंबंधे द्वित्वव्यापकत्वं भ्रमनिरूपिताः व्यापकताघटकपदार्थनिष्ठसांसर्गि
कविषयताः प्रकाशिताः। एवंचैकघटादिव्यक्तिमात्राधिकरणपरस्मात्र घटोस्तु इत्यादिवाक्यस्याप्रामाण्यं सुघटमेवेति। एवंच। एतद्देशवृत्तित्वीयस्वरूपसं ९३

उद्देश्यतावच्छेदकीभूतघटमात्रवृत्तिद्वित्वेति। एतद्देशवृत्तिघटद्वयगतंद्वित्वंतदधिकरणेघटद्वयेएकघटव्यक्तिमात्राधिकरणैतद्देशवृत्तित्वी
यस्वरूपसंसर्गोनास्तीतिविधेयस्यैतद्देशवृत्तित्वस्यस्वरूपसंसर्गव्यापकत्वाभावात्। एकघटादिव्यक्तिमात्राधिकरणपरस्यात्रघटौस्तइत्या
दिवाक्यस्यनप्रामाण्यमित्यर्थः। अत्रघटौस्तोऽत्रघटत्वव्यापकैतद्देशवृत्तित्वीयस्वरूपसंबंधेनद्वित्ववन्तौघटावितिबोधः घटमात्रेतिघटमात्र
पदेनपटादिव्यवच्छेदः। ननुविधेयसंसर्गेयत्किंचिद्द्वित्वव्यापकत्वंघटनिष्ठद्वित्वव्यापकत्वंवाविवक्षितमितिविकल्प्ययत्त्वितिमतंदूषयति॥
अत्रघटौस्तइत्यादाविति। तदधिकरणावृत्तीति॥ घटद्वयाधिकरणावृत्तिर्योदेशांतरीयघटादिस्वनिष्ठतद्देशवृत्तित्वीयस्वरूपसंसर्गाभा

उद्देश्यतावच्छेदकीभूतघटमात्रवृत्तिद्वित्वव्यापकतायास्तादृशवाक्यप्रतिपाद्यायाविधेयसंसर्गेबाधादितितद
पितुच्छम्। अत्रघटौस्तइत्यादौद्वित्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकत्वस्यद्वित्ववद्घटनिष्ठ
न्योन्याभावप्रतियोगितानवच्छेदकत्वस्यचतदधिकरणावृत्तिघटान्तरनिष्ठाभावप्रतियोगितावच्छेदकीभूतेनतद्विधे
यसंसर्गांशेबाधात्॥

वस्तत्प्रतियोगिएतद्देशवृत्तित्वसंसर्गः तत्प्रतियोगितावच्छेदकीभूतेनैतद्विधेयस्यैतद्देशवृत्तित्वस्यसंसर्गस्यसं
सर्गतावच्छेदकैतद्देशवृत्तित्वीयस्वरूपसंसर्गत्वेएतद्देशवृत्तित्वंयत्किंचित्पटदंडादिनिष्ठद्वित्वसमानाधिकरणाभावस्यएतद्देशवृत्तित्वी
यस्वरूपसंसर्गाभावस्यप्रतियोगितावच्छेदकमेवेतितत्प्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वस्यबाधात्॥ एवंद्वित्वव
द्देशान्तरीयघटनिष्ठस्यएतद्देशवृत्तित्वीयस्वरूपसंसर्गाभावस्यप्रतियोगितावच्छेदकत्वमेवेतितत्प्रतियोगितानव॥

च्छेदकत्वरूपव्यापकतावच्छेदकत्वस्यएतद्देशवृत्तित्वीयस्वरूपसंसर्गतावच्छेदकेएतद्देशवृत्तित्वेबाबाधात्॥ घटद्वयाधिकरणपरत्ता
दृशवाक्यस्य। अत्र घटौस्तइतिवाक्यस्य अप्रामाण्यापत्तेः हेतोरुद्देश्यतावच्छेदकव्यापकत्वानियमतोविधेयसंसर्गेभासनेइतिव्युत्पत्तिर्वा
अंगीकार्येतिभावः। तत्तद्वित्वं। एतदधिकरणवृत्तिघटद्वयमात्रगतद्वित्वं। तत्समानाधिकरणएतद्देशवृत्तित्वीयस्वरूपसंसर्गाभावोनभवति।
किंतुपटाद्यभावएवतत्प्रतियोगितावच्छेदकत्वं पटत्वादावेवतत्प्रतियोगितानवच्छेदकत्वरूपव्यापकतावच्छेदकत्वमेतद्देशवृत्तित्वीय
स्वरूपसंबंधेवर्त्ततेतेनसंबंधेनद्वित्ववंतौघटावितिशाब्दबोधांगीकारास्पूर्वोक्तव्युत्पत्तिर्निर्दिष्टेतिभावः। उक्तविधेयसंसर्गतावच्छेदकेए

घटद्वयाधिकरणपरत्तादृशवाक्यस्याप्रामाण्यापत्तेः। तत्तद्वित्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वस्योक्त
विधेयसंसर्गांशेभानोपगमस्तुनसंभवति। तत्तद्वित्वत्वेनानुपस्थितेः। नचतदवच्छिन्नस्यसंसर्गतयाभानेतेनरूपेणो
पस्थितेर्नापेक्षेतिवाच्यम्॥१॥

तद्देशवृत्तित्वीयस्वरूपसंबन्धत्वेसंसर्गेबाधादितिपाठेपूर्वोक्तानिअभावपदानिअन्योन्याभावपराणि। संसर्गवद्भेदप्रतियोगितावच्छे
दकतासंसर्गेस्तीतिभावः। सिद्धांतीसमाधत्ते। तत्तद्वित्वत्वेनानुपस्थितेरिति। अत्र घटौस्तइत्यत्रद्विवचनेनद्वित्वत्वेनैवद्वित्वोपस्थितेर्नतुतत्त
द्वित्वत्वेनेत्यर्थः। तत्तद्वित्वत्वेनानुपस्थितेरित्युक्तंदूषणमिष्टापत्त्यापरिहर्तुंशंकते। नचेति॥ तदवच्छिन्नस्य॥ तत्तद्वित्वत्वावच्छिन्नस्य। एतद्देश
वृत्तिघटद्वयगतद्वित्वस्यसंसर्गतयाभानेतेनरूपेण॥ तत्तद्वित्वत्वेन। एतद्देशवृत्तिघटद्वयगतद्वित्वस्यशाब्दबोधात्प्रागुपस्थितिर्नापेक्षेतिशं

समाधत्ते। तत्संसर्गावच्छिन्नेति। तत्संसर्गावच्छिन्ना। तद्वित्वव्यापकैतद्देशवृत्तित्वीयस्वरूपसंसर्गावच्छिन्ना या तत्प्रकारता एतद्देशवृत्तित्व
निष्ठाप्रकारता तन्निरूपिता तत्तद्विशेष्यता घटादिनिष्ठा विशेष्यता तच्छालीबोधपरमिदं वाक्यं। इत्याकारकतात्पर्यज्ञाने संसर्गस्य विशेषण
तया। तद्वित्वव्यापकैतद्देशवृत्तित्वीयस्वरूपसंसर्गस्य विशेषणतया। तज्ज्ञाननिर्वाहाय। विशेषणीभूततत्तद्वित्वव्यापकत्वविशिष्टैतद्देशवृ
त्तित्वीयस्वरूपसंबन्धज्ञानसंपादनाय। संसर्गघटकानां तत्तद्वित्वादीनामर्थानामुपस्थितेरपि शाब्दबोधात्प्रागावश्यकत्वात्। शाब्दबोधे तात्प
र्यज्ञानं कारणं॥ प्रकृतसंसर्गेणेति॥ तत्तद्वित्वव्यापकत्वं तद्वित्वसमानाधिकरणात्यन्ताभावाप्रतियोगित्वं एतद्देशवृत्तित्वीयस्वरूपसंसर्गेसे

तत्संसर्गावच्छिन्नतत्प्रकारतानिरूपिततत्तद्विशेष्यताशालिशाब्दबोधपरमित्याकारकतात्पर्यज्ञाने संसर्गस्य विशेष
णतया तज्ज्ञाननिर्वाहाय संसर्गघटकार्थोपस्थितेरपि शाब्दबोधात्प्रागावश्यकत्वात्। प्रकृतसंसर्गेण एकपदार्थविशि-
ष्टापरपदार्थबोधपरत्वज्ञानस्य प्रकृतवाक्यार्थविषयकतया प्रागसंभवेनोपदर्शिततात्पर्यस्य ज्ञानस्यैव शाब्दधीहेतुत्वोपगमात्।

ना। एकपदार्थः एतद्देशवृत्तित्वं। तद्विशिष्टः अपरपदार्थः। घटादिः तद्बोधपरमिदं वाक्यमिति ज्ञानस्य तत्तद्वित्वेन तत्तद्वित्वोपस्थितिं विनापि
संभवात्। द्वित्वव्यापकैतद्देशवृत्तित्वीयस्वरूपसंबंधेन एकस्मिन्घटे बाधात् एतद्देशवृत्त्येकघटदशायां घटौ स्त इति न प्रयोगः न वा घटद्वयस्यै
तद्देशवृत्तित्वदशायां तत्तद्वित्वव्यापकैतद्देशवृत्तित्वीयस्वरूपसंबंधेन एतद्देशवृत्तित्वस्य घटयोरबाधेनात्र घटौ स्त इति प्रयोगाभावापादनम
पि तयापि तत्तद्वित्वव्यापकवृत्तित्वीयस्वरूपसंबंधेनैतद्देशवृत्तित्वविशिष्टघटादिरूपप्रकृतवाक्यार्थविषयकतया प्रकृते संसर्गेण एकपदार्थ

व्यु॰टी॰ ९५ विशिष्टपरपदार्थबोधपरत्वज्ञानस्य संसर्गविषयकस्य शाब्दबोधात्प्रागसंभवेन शाब्दबोधे प्रकारतया तत्संसर्गावच्छिन्नतत्प्रकारतेत्याद्युप
दर्शिनत्तात्पर्यज्ञानस्य शाब्दधीहेतुत्वोपगमात्। तच्च तात्पर्यज्ञानं शाब्दबोधात्प्राक् न संभवतीति दूषितमेवेत्येकघटादिव्यक्तेरेतद्देशवृत्तिता
दशायामत्र घटौ स्तः घटाः संतीति कथं न प्रयोगः इति पूर्वोक्तापत्तिस्तदवस्थेति भावः। दूषणांतरमाह। एवमिति। एवं तद्देशे एकघटवृत्तिता
दशायां अत्र घटौ स्त इत्यापत्तिवत् वक्ष्यमाणमपि दूषणमित्यर्थः। वाक्यार्थघटकसंसर्गस्याननुगमेनात्र घटौ स्त इत्यादौ वाक्यभेदप्रसंगाच्चेति
एतद्देशवृत्तित्वप्रकारः द्वौ घटौ विशेष्यौ तत्तद्द्वित्वव्यापकैतद्देशवृत्तितीयस्वरूपमेतद्देशवृत्तित्वसंबंधः। तत्र तत्तद्द्वित्वं तत्तदपेक्षाबुद्धिजन्य

एवं वाक्यार्थघटकसंसर्गस्याननुगमेनात्र घटौ स्त इत्यादौ वाक्यभेदप्रसंगाच्च। अत्रोच्यते। व्यासज्यवृत्तिधर्मावच्छिन्नोद्दे
श्यताकशाब्दबुद्धौ स्वव्याप्यतादृशधर्मवत्त्वमपि विधेयसंसर्गतयाभासत इति व्युत्पत्तिः॥ मपेक्षाबुद्धिनाशनाश्यं चेति नानाविध

संसर्गभेद एव वाक्यभेदनियामकः संसर्गज्ञानं वाक्यार्थज्ञानं शाब्दबोध इत्येते पर्यायशब्दाः। अत्रोच्यत इति। अथेत्यादिशंकायाः समाधानमुच्यते
व्यासज्यवृत्तिधर्मावच्छिन्नोद्देश्यताकशाब्दबुद्धाविति॥ अत्र घटौ स्त इत्यादौ द्वित्वादिरूपः व्यासज्यवृत्तिधर्मावच्छिन्ना उद्देश्यता यस्यां तादृश्यामेतद्देश
वृत्तित्वविधेयकशाब्दबुद्धौ॥ स्वव्याप्यतादृशधर्मवत्त्वमपि विधेयसंसर्गतयाभासत इति व्युत्पत्तिरिति। अत्र विधेयमेतद्देशवृत्तित्वं तदेव स्वं त
द्व्याप्यो यस्तादृशो द्वित्वादिरूपव्यासज्यवृत्तिधर्मस्तद्वत्त्वे सति एतत्त्वविशिष्टेयः स्वरूपसंबंधः घटेऽस्ति तद्वत्त्वं च घटेऽस्ति। एतद्देशवृत्तितीयस्वरूप
संबंधेन एतद्देशवृत्तित्ववंतौ द्वित्वावच्छिन्नौ घटाविति शाब्दबोधः। विधेयसंसर्गतया। एतद्देशवृत्तित्वरूपविधेयसंबंधतयाभासत इति व्युत्पत्ति

श्रीरामः
राम ९५

व्याप्यत्वंचतद्दन्यावृत्तित्वं। व्यतिरेकिविधेयकस्थलेइति। द्वित्वादावेतद्देशवृत्तित्वव्याप्यत्वंचएतद्देशवृत्तित्वतद्दन्यावृत्तित्वरूपंए
तद्देशवृत्तित्वरूपव्यतिरेकिविधेयस्थलेइत्यर्थः॥ तादृशधर्मवत्त्वमुद्देश्यतावच्छेदकताघटकसंबंधेनबोध्यमिति। एतद्देशवृत्तित्वव्याप्य
द्वित्वादिरूपव्यासज्यवृत्तिधर्मवत्त्वंघटत्वव्याप्यद्वित्वादिपर्याप्तिरूपोद्देश्यतावच्छेदकताघटकसंबंधेनबोध्यमित्यर्थः। तथाचात्रघटौस्तइत्य
त्रएतद्देशवृत्तित्वीयस्वरूपसंबंधविशिष्टैतद्देशवृत्तित्वव्याप्यव्यासज्यवृत्तिद्वित्वादिरूपधर्मनिष्ठाधेयतानिरूपितघटत्वव्याप्यद्वित्वादिपर्याप्त्य
वच्छिन्नाधिकरणतासंबंधेनएतद्देशवृत्तित्ववन्तौद्वित्वावच्छिन्नौघटावितिनिष्कृष्टशाब्दबोधः स्वव्याप्यतादृशधर्मवत्त्वमपीत्यपिनाएतद्देशवृ

व्याप्यत्वंचतद्दन्यावृत्तित्वं। व्यतिरेकिविधेयस्थलेतादृशधर्मवत्त्वंचोद्देश्यतावच्छेदकताघटकसंबंधेनबोध्यम्। अ
त्रघटौस्तइत्यादौएतद्देशवर्तमानत्वादिरूपविधेयस्यतद्दन्यावृत्तित्वरूपव्याप्तिमच्चैतद्देशस्यैकघटादिव्यक्तिमात्राधि
करणत्वेघटपटादिनिष्ठद्वित्वमेवघटत्वव्याप्तपर्याप्तिरूपोद्देश्यतावच्छेदकताघटकसंबंधावच्छिन्नंतद्वत्त्वंचघटादौबाधितमिति

त्तित्वीयस्वरूपसंबंधेन। एतद्देशवृत्तित्वरूपविधेयस्यद्वित्वरूपोद्देश्यतावच्छेदकविशिष्टेघटद्वयेऽन्वयः एतद्देशवृत्तित्वव्याप्यद्वित्वविशिष्टेनएतद्दे
शवृत्तित्वीयस्वरूपसंबंधेनएतद्देशवृत्तित्ववन्तौघटावितिशाब्दबोधः। अत्रघटौस्तइत्यादाविति। एतद्देशवर्तमानत्वादिरूपविधेयस्यव्यापकस्यए
तद्देशवर्तमानत्ववद्दन्यावृत्तित्वव्याप्तिमत् एतद्देशवृत्तिघटपटादिनिष्ठद्वित्वमेवतच्चएतद्देशस्यएकघटादिव्याप्तिमात्राधिकरणत्वेसतिबोध्यम्।
मात्रपदेनद्वितीयघटव्यक्तिनिरासः घटपटादिनिष्ठद्वित्वमेवेत्येवकारेणदेशांतरीयघटद्वयगतद्वित्वेएतद्व्याप्तिनिरासः॥ ६ ॥

घटद्वयगतद्वित्वे उक्तव्याप्तिनिरासं दर्शयति। घटत्वव्याप्यपर्याप्तिरूपाया द्वित्वनिष्ठाया उद्देश्यतावच्छेदकताया घटकः संबंधस्तेनावच्छिन्नं तद्द्वित्वं घटपटादिनिष्ठद्वित्ववत्त्वं घटादौ बाधितमिति॥ एतद्देशस्यैव घटादिव्यक्तिमात्राधिकरणत्वे॥ तादृशवाक्यस्य। अत्र घटौ स्त इति वाक्यस्याप्रामाण्यमित्यर्थः। यद्यपि घटादिनिष्ठं द्वित्वं एतद्देशवृत्तित्वव्याप्तिमद्भवति तथापि घटपटादिगतं द्वित्वाधिकरणत्वं घटत्वव्याप्तपर्याप्तिरूपोद्देश्यतावच्छेदकताघटकसंबंधेन घटादौ बाधितमिति एकघटाधिकरणस्थले अत्र घटौ स्त इति वाक्याप्रामाण्यं बोध्यम्॥ अत्रेदं बोध्यम् अत्र घटौ स्त इत्यत्र घटपटोभयवृत्तिद्वित्वमादाय सामान्यतो द्वित्वव्यापकत्वं न संभवति। घटद्वयगतद्वित्वव्यापकत्वमेत

तादृशवाक्यस्याप्रामाण्यम्॥ अधिकरणस्य घटद्वयादिमत्त्वे च घटत्वादिव्याप्यं द्वित्वमेव तद्देशेति
घटत्वादिव्याप्यपर्याप्तिसंबंधेन तद्द्वित्वं घटादावबाधितमिति तादृशवाक्यस्य प्रामाण्यं निर्वहति॥

द्देशवृत्तित्वेन संभवति देशान्तरीयघटगतद्वित्वमादाय व्यभिचारात्। एतद्देशवृत्तिघटद्वयगतद्वित्वं प्रति एतद्देशवृत्तित्वस्य व्यापकत्वसंभवेऽपि तत्तद्द्वित्वोपस्थापकपदाभावेन तत्तद्द्वित्वव्यापकत्वस्यैतद्देशवृत्तित्वरूपविधेयस्य संसर्गताघटकत्वाभावात् इति। अधिकरणस्य घटद्वयादिमत्त्वे एकघटत्वादिव्याप्यद्वित्वमेव। तथा एतद्देशवृत्तित्वव्याप्तिमत् इति घटत्वादिव्याप्यपर्याप्तिसंबन्धेन तद्द्वद्वित्ववत्त्वं घटादावबाधितमिति। अत्र घटौ स्त इत्येतादृशवाक्यस्य प्रामाण्यनिर्वाह इति मूलार्थः॥

केवलान्वयिविधेयकस्थले चेति। घटौ प्रमेयावित्यत्र स्वनिष्ठव्यापकतानिरूपकोद्देश्यतावच्छेदकाश्रयत्वसंबंधेन प्रमेयत्ववन्तौ द्वौ घटाविति
शाब्दबोधः प्रमेयत्वं तन्निष्ठव्यापकतानिरूपकं यदुद्देश्यतावच्छेदकं द्वित्वरूपं व्याप्यं तदाश्रयत्वं घटद्वयेऽस्तीत्यर्थः द्वित्वावच्छिन्नव्यापकत्वमेव
संसर्गघटकप्रमेयत्वीयस्वरूपसंसर्गघटकः तथा च द्वित्वावच्छिन्नव्यापकप्रमेयत्वीयस्वरूपसंसर्गेण प्रमेयत्ववन्तौ घटाविति निष्कृष्टशाब्दबो
धः द्वित्वावच्छिन्नव्यापकत्वमेवेत्येवकारेण पूर्वोक्तस्वव्याप्यतादृशधर्मवत्त्वस्य संसर्गतानिरासः यतस्तत्र व्याप्यत्वं तद्वदन्यावृत्तित्वरूपं निवेशितं
तच्चेह न संभवति प्रमेयत्ववदन्याप्रसिद्धेरिति भावः केवलान्वयिनि प्रमेयत्वादौ तादृशव्यापकताया अपि द्वित्वावच्छिन्ननिष्ठव्याप्यतानिरूपि

केवलान्वयिविधेयकस्थले च द्वित्वाद्यवच्छिन्नव्यापकत्वमेव संसर्गघटकं। केवलान्वयिनि तादृशव्यापकताया असत्त्वात्
ननु तत्र द्वित्वावच्छिन्नव्यापकत्वमिति न पूर्वोक्तदोषावकाशः। घटावानयति चैत्र इत्यादौ चैत्रकर्तृकानयनकर्मत्वादिव्याप्य
द्वित्वादिमन्निष्ठनिरूपकताधेयत्वादिसंबंधेन कर्मत्वादौ घटादेरन्वयो व्युत्पन्नः तेन चैत्रादौ एकघटादिव्यक्तिमात्रानयनकर्तृत्वे
न तादृशप्रयोगः॥

तव्यापकताया अपि निराबाधात्। अपिना तत्र द्वित्वव्यापकतायाः संग्रहः ननु तत्र द्वित्वाद्यवच्छिन्नव्यापकत्वमिति न
पूर्वोक्तदोषानवकाश इति तस्य द्वित्वत्वेनानुपस्थितिरूपस्य वाक्यभेदरूपस्य च दोषस्यानवकाश इत्यर्थः॥ घटावानयति चैत्र इत्यादाविति। कर्मत्वं
विशेष्यं घटः प्रकारः घटनिष्ठा कर्मतेति बोधात्। चैत्रकर्तृकं घटानयनं तन्निरूपिताया घटनिष्ठाकर्मता तद्व्याप्यं यत् द्वित्वादि तन्निष्ठा द्वित्वादिमद्धर्मनि
ष्ठानिरूपकतायस्य तादृशं घटाधेयत्वादि तदेव संबन्धः। तेन चैत्रादावेकघटादिव्यक्तिमात्रानयनकर्तृत्वे। न तादृशप्रयोगः।

नघटावानयतिचैत्रइतिप्रयोगः। चैत्रकर्तृकानयनकर्मतादिव्याप्यद्वित्वाभावेनतद्घटितसंबंधाभावादेकघटानयनकर्त्तरिनचैत्रोघटावानयतीति प्रयोगइतिभावः। द्वित्वादिमत्त्वंचेति। घटावानयतीत्यत्रद्वित्वंप्रकारःप्रकारतावच्छेदकीभूतःसंबंधः घटत्वादिव्याप्यापर्याप्तिरिति। तेन। पर्याप्तौघ टत्वादिव्याप्यतानिवेशेन। पटसहितैकघटानयनकर्तृत्वेपिनघटावानयतीतिप्रयोगः किंतुघटपटावानयतीतिप्रयोगः यत्रघटत्वपटत्वादि धर्मितावच्छेदकंनानातत्रमुख्यैवपर्याप्तिः। यत्रतुघटत्वंधर्मितावच्छेदकमेकंतत्रघटत्वव्याप्यपर्याप्तिःसंबंधइतिपूर्वमुक्तत्वादितिभावः। एवम न्यत्रापि। घटान्आनयतीतिबहुवचनान्तप्रयोगेपिचैत्रकर्त्तृकानयनकर्मतादिव्याप्यबहुत्वादिमन्निष्ठनिरूपकताधेयत्वादिसंबन्धेनकर्मतायांघ

द्वित्वादिमत्त्वंचप्रकारतावच्छेदकीभूतघटत्वादिव्याप्यपर्याप्तिसंबंधेनबोध्यम्। तेनचैत्रस्यपटादिसहितैकघटादिव्यक्त्यानय नकर्तृत्वेपिनतादृशप्रयोगः एवमन्यदप्यूहनीयम्। यत्रानेकवृत्तिधर्मोद्वित्वान्वयितावच्छेदकतयाभासतेतत्रोभयादिनैवस मंपदार्थान्तरस्यान्वयः यत्रैकमात्रवृत्तिस्तथातत्रैकेनापिव्युत्पत्तिभेदावलंबनात्कार्यकारणभाववैचित्र्याच्चसर्वंसमंजसमित्यपि वदंति॥

टस्यप्रकारताबोध्येत्यप्यूहनीयमित्यर्थः। मतान्तरमाह। यत्रानेकवृत्तीत्यारभ्यवदन्तीत्यन्तेन। यत्रघटावानयतीत्यत्र। घटत्वादि रूपोऽनेकघटवृत्तिधर्मोद्वित्वाद्यन्वयितावच्छेदकतयाभासते। तत्र। घटावानयतीत्यत्र। उभयपदेनैव। घटद्वयादिनैवसमं। पदार्थान्तरान्वयः। घटकर्मत्वान्वयः। घटद्वयकर्मकानयनकर्त्तेतिबोधात्। यत्रैकमात्रवृत्तिराकाशत्वादिरूपोधर्मस्तथाद्वित्वान्वयितावच्छेदकस्तत्राकाशौस्तइ त्यत्रएकेनाकाशेनापिसममेतद्देशवृत्तित्वरूपपदार्थान्तरान्वयः व्युत्पत्तिभेदावलंबनात् इतिनियमस्वीकारात्॥

द्वित्वविशिष्टघटद्वयविशेष्यकएतद्देशवृत्तित्वादिरूपेणरपदार्थान्वयबुद्धित्वावच्छिन्नंप्रतिअत्रेत्यादिसप्तम्यन्तपदसमभिव्याहृतद्विवचनान्तघ
टपदज्ञानत्वेनकारणताएवमाकाशावत्रेत्यत्रअत्रेतिसमभिव्याहृतद्विवचनान्ताकाशपदज्ञानत्वेनकारणतेत्यादिकार्यकारणभाववैचित्र्यात्
।सर्वसमंजसं।एकघटसत्वेऽत्रघटावित्यापत्तिर्नअत्राकाशावितिप्रयोगोपिसर्वसमंजसंसर्वकार्यनिर्वाहः।वदंतीत्यनेन।अत्राकाशौस्तइति
प्रयोगेनभवतितन्निर्वाहायत्सुसत्संगीकारकार्यकारणभावकल्पनमसमंजसमेवेत्यस्वरसःसूचितः।शंकते॥अथेति॥आश्रयभेदात्कर्मे

अथघटादिव्यक्तिभेदेनानयनकर्मताभिन्नैवेतिसंदधानस्यपुंसोघटावानयतीतिवाक्याच्छाब्दबोधानुपपत्तिः।तस्य
कर्मतात्वावच्छेदेनाधेयतासंसर्गावच्छिन्नप्रतियोगिताकस्यद्वित्वाद्यवच्छिन्नघटाद्यभावस्यनिश्चयसंभवात्।तस्यद्वित्वादि
नानादृशसंसर्गकघटादिविशिष्टधीविरोधित्वादितिचेन्नउभयत्वाद्यवच्छिन्नाभाववत्ताज्ञानमुभयत्वावच्छिन्ननिरूपिताधेयता
संसर्गावगाहिज्ञानमेवप्रतिबध्नातिनतुकेवलंविशेष्यविशेषणमितिरीत्याजायमानमुभयत्वादिनाउभयादिविशिष्टज्ञानं॥ ॥

ताभिन्नभिन्नैवेतिप्रतिसंदधानस्यपुंसोघटावानयतीत्यतोबोधोनस्यात्।तस्येति।तस्यपुंसःक्वापिकर्मतायांआधेयतासंसर्गेणघटद्वयंनास्तीतिनि
श्चयसंभवात्।तस्यनिश्चयस्य।तादृशसंसर्गकः।आधेयतासंसर्गकः।द्वित्वादिनाद्वित्वविशिष्टघटादिप्रकारककर्मताविशेष्यकधीविरोधित्वादिति
शंकांसमाधत्ते।उभयत्वावच्छिन्नेति।आधेयतासंसर्गकउभयत्वावच्छिन्नघटप्रकारककर्मतानिशेष्यकज्ञानंकर्मताविशेष्यकोभयत्वावच्छिन्नघट
द्वयनिष्ठविशेष्यतानिरूपिताआधारतानिरूपितासंसर्गककर्मताविशेष्यकबुद्धिमेवप्रतिबध्नाति।नतुकेवलंविशेष्यविशेषणमितिरीत्याजायमानमुभयत्वादिनोभयविशिष्टज्ञानम्।उभयत्वादिना॥

उभयत्वविशेषणकउभयादिविशेष्यकं विशेष्ये विशेषणमिति रीत्या ज्ञानं न प्रतिबध्यम्। अतः विशेष्ये विशेषणमिति रीत्या ज्ञानस्याप्रतिबध्यत्वात्॥ विशेषदर्शिनाम्॥ कर्मत्वमुभयत्वाद्यवच्छिन्ननिरूपिताधेयत्वाभाववदिति विशेषनिश्चयवतां। तादृशवाक्यात्। घटौ वानयति चैत्र इति वाक्यात्। आधेयतांशे। उभयत्वाद्यवच्छिन्ननिरूपितत्वावगाहि भ्रमात्मकं ज्ञानं न भवत्येव। यदि उभयस्मिन् घटद्वये कर्मता एका स्यात्तदाधेयतांशे उभयत्वावच्छिन्ननिरूपितत्वं स्यात्। अपि तु तदंशे। आधेयतांशे। तदनवगाहि। उभयत्वावच्छिन्ननिरूपितत्वानवगाहि। प्रमात्मकज्ञानमिति। विशेष्ये विशेषणमिति रीत्यावगाहिज्ञानं प्रमैवेत्यर्थः। उभयत्वावच्छिन्ननिरूपिताधेयत्वस्यैवेति। घटद्वयनिरूपिताधेयत्वस्य। घटपटोभयादिवृत्ता

अतो विशेषदर्शिनां तादृशवाक्यादाधेयत्वांशे उभयत्वाद्यवच्छिन्ननिरूपितत्वावगाहिभ्रमात्मकज्ञानं न भवत्येव॥ अपि तु तदंशे तदनवगाहि प्रमात्मकं ज्ञानमिति उभयत्वावच्छिन्ननिरूपिताधेयत्वं चोभयादिवृत्तावेकस्मिन्धर्मे एव। न तु प्रत्येकमात्रवृत्ताविति कर्मत्वांशे तादृशाधेयत्वावगाहिज्ञानस्य भ्रमत्वमित्यवधेयम्॥ ६ ॥ ६ ॥ ६ ॥ ६ ॥

वेकस्मिन्कर्मत्वरूपे धर्मे एव न तु कर्मत्वरूपे प्रत्येकमात्रवृत्तिधर्मे उभयत्वावच्छिन्ननिरूपितत्वमंगीक्रियते। घटादिरूपाश्रयभेदेन कर्मत्वस्य भिन्नत्वात्॥ कर्मत्वांशे तादृशाधेयतावगाहिज्ञानस्य॥ उभयत्वावच्छिन्नघटनिष्ठाधारतानिरूपिताधेयतावगाहिज्ञानस्य॥ भ्रमत्वमिति ॥ उभयत्वावच्छिन्ननिरूपितत्वाभाववति कर्मत्वे उभयत्वावच्छिन्ननिरूपितत्वप्रकारकत्वाद्भ्रमत्वमित्यर्थः॥ ॥ इति व्युत्पत्तिवादे एकवचनार्थान्वयनिरूपणम्॥

संख्याश्चप्रकृत्यर्थतावच्छेदकगताः स्वविभक्तीयंतेइति॥ द्वित्वविशिष्टव्रीहित्वयवत्वावच्छिन्नोपस्थापकोबहुव्रीहियवतात्पर्येणप्रयुक्तेऽपिव्रीहिय
वव्यक्त्योर्द्वित्वस्यबाधात्। प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वमितिनियमोऽत्रत्यज्यतेइतिभावः॥ द्वित्वमत्रव्रीहित्वयवत्वरूपप्रकृत्य
र्थतावच्छेदकेचेतिसाजात्यादिनिवेश्यएतत्तत्वंपूर्वमुक्तमित्यर्थः॥ विरुद्धसंख्यावच्छिन्नेति॥ एकवचनार्थैकत्वविरुद्धशतत्वादिसंख्यावच्छि
न्नशतादिसंख्यावाचकशतादिपदोत्तरैकवचनबहुवचनादिरूपविभक्त्युपस्थाप्याचएकत्वद्वित्वबहुत्वसंख्याशतादिप्रकृत्यर्थतावच्छेदक
शतत्वादिसंख्यायामेवान्वेतिनतुसंख्यावति। यथाशतमेकंद्वेशतेत्रीणिशतानीत्यत्रएकत्वविशिष्टंशतत्वंद्वित्वविशिष्टंशतत्वंबहुत्वविशि

संख्याश्चप्रकृत्यर्थतावच्छेदकगताः स्वविभक्तीयंते। यथासंपन्नोव्रीहिर्यवाविव्यादौ। एतत्तत्त्वंप्रागेवाभिहितम्। विरुद्ध
संख्यावच्छिन्नवाचकशतादिपदोत्तरविभक्त्युपस्थाप्याचसंख्याप्रकृत्यर्थतावच्छेदकसंख्यायामेवान्वेति। यथाशतमेकं
द्वेशतेत्रीणिशतानीत्यत्रशतत्वादौएकत्वद्वित्वबहुत्वानामन्वयः अतएवचएकशतद्विशततात्पर्येणनशतानीतिप्रयोगः॥

ष्टंशतत्वमितिबोधान्नशतत्वव्यतिरेकात्तत्रैकवचनम्। यत्रशतत्वधर्मव्यक्तिद्वेएवशतत्वव्यक्त्योर्नानातत्रबहुवचनानि अतएवद्वेशतेब्राह्म
णास्त्रीणिशतानिब्राह्मणाइतिनभवति एकंद्वेत्रीणीत्यनुवादकान्येव। द्वौघटावितिवत्। शतपदोत्तरद्विवचनोपस्थापितद्वित्वादेरेवशतत्वेऽन्वया
त्॥ अतएवेति॥ विरुद्धसंख्यावच्छिन्नवाचकशतादिपदोत्तरविभक्त्युपस्थाप्याचसंख्याप्रकृत्यर्थतावच्छेदकसंख्यायामेवान्वेतीतिनियमस्वी
कारादेव॥ एकशतद्विशतब्राह्मणतात्पर्येणनशतानीतिप्रयोगः॥

तत्र॥ शतानीतिप्रयोगे॥ प्रकृत्यर्थस्य। शतसंख्येयस्य॥ शतानीतिबहुवचनार्थबहुत्वान्वययोग्यत्वेपिप्रकृत्यर्थतावच्छेदकशतत्वरूपांशेउक्त नियमबलात् बहुत्वान्वयेएकबहुवचनस्यसाकांक्षत्वात्॥ तत्रच॥ शतत्वेच॥ बहुत्वान्वययोग्यताविरहादित्यर्थः। शंकते। नचैकशतेपिनाना पुरुषीयनानापेक्षाबुद्धिजंन्यनानाशतत्वानिसंभवन्त्येवेतिएकशतनिष्ठबहुत्वसमानाधिकरणशतत्वेपिबहुत्वान्वययोग्यता अक्षतैवेति शंकायांसमाधानमाह॥ परस्परसमानाधिकरणद्वयाद्यवृत्तिबहुत्वस्यैवशतादिपदोत्तरबहुवचनार्थत्वात्॥ नानापुरुषीयापेक्षाबुद्धिजन्य॥

तत्रप्रकृत्यर्थस्यशतस्यबहुत्वाद्यन्वययोग्यत्वेपिप्रकृत्यर्थतावच्छेदकशतत्वांशेबहुत्वाद्यन्वयएवबहुवचनस्यसाधुत्वा त्तत्रचयोग्यताविरहात्। नचैकशतेपिनानापुरुषीयापेक्षाबुद्धिजन्यनानाशतत्वसंभवादेकशतनिष्ठशतत्वेपिबहुत्वान्वय योग्यताक्षतैवेतिवाच्यम्। परस्परसमानाधिकरणद्वयाद्यवृत्तिबहुत्वस्यैवशतादिपदोत्तरबहुवचनार्थत्वात्। तादृशबहुत्व स्यचैकशतादिवृत्तिनानाशतत्वादौबाधात्॥

नानाविधशतत्वञ्चपरस्परसमानाधिकरणमेवेतिइदंबहुत्वंपरस्परसमानाधिकरण शतद्वयाद्यवृत्तिर्नभवति। नशतानीतिबहुवचनार्थः। तादृशबहुत्वस्येति। परस्परसमानाधिकरणशतत्वद्वयाद्यवृत्तिबहुत्वस्यच। एकशतादिवृ त्तिनानाशतत्वादौबाधादिति। एवं शतादिवृत्तिषुनानाशतत्वेषुयद्बहुत्वंतत्परस्परसमानाधिकरणशतत्वद्वयवृत्त्येवेतिपरस्परसमानाधिक रणद्वयाद्यवृत्तिबहुत्वस्यबाधादित्यर्थः। त्रीणिशतानीत्यत्रतुत्रीणिशतत्वानिपरस्परव्यधिकरणानीतिपरस्परसमानाधिकरणशतत्वद्वयाद्यवृत्त्ये वबहुत्वमितिबहुवचनार्थोभवतीतिभावः। बहुत्वेनोपस्थापकस्यबहुवचनस्यपरस्परसमानाधिकरणद्वयावृत्तित्वेनबहुत्वमुपस्थापनासम

पक्षान्तरमाह॥अथवेति।तत्रापि।त्रीणिशतानीत्यत्रापि।परस्परसमानाधिकरणद्वयावृत्तित्वविशेषरहितंकेवलंबहुत्वमेववहुवचनार्थः।त
स्यचप्रकृत्यर्थतावच्छेदकशतत्वेऽन्वयः।परस्परसमानाधिकरणशतत्वद्वयावृत्तिपर्याप्तिरेववहुवचनस्यशतत्वआकांक्षानिरूपकसंबंधःपर
स्परसमानाधिकरणद्वयावृत्तिपर्याप्तिसंबंधेनवहुत्ववत्त्रीणिशतानीतिशाब्दबोधः।द्वेशतेइत्यत्रकेवलपर्याप्तिसंबन्धेनद्वित्वविशिष्टशत
त्वेइतिशाब्दधीः।प्रथमोपस्थितेराह।अवृत्तीति।नतुत्रयावृत्तीत्यादि।यत्त्विति।द्वेशतेत्रीणिशतानीत्यादौसंख्येवशतादिशब्दार्थः।तथाच
प्रकृत्यर्थएवद्वित्वबहुत्वान्वयः।शतानीत्यादौसंख्येवशतादिपदार्थः।तथाचप्रकृत्यर्थेप्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वाद्युपप

अथवातत्रापिबहुत्वमेववहुवचनार्थः।परस्परसमानाधिकरणद्वयावृत्तिपर्याप्तिरेवाकांक्षानिरूपकःसंबन्धः।यत्तु
द्वेशतेत्रीणिशतानीत्यादौसंख्येवशतादिशब्दार्थः।नतुसंख्येयंसंख्यायस्यतदर्थत्वेविंशत्याद्याःसदैकत्वेसर्वाःसंख्येयसंख्य
योरित्यनुशासनविरोधात्द्विवचनादिसाधुत्वानुपपत्तेः॥

((त्तिःसंरक्षिता।ननुसंख्येयंसंख्येयस्यतदर्थत्वेविंशत्याद्याःसदैकत्वे
सर्वाःसंख्येयसंख्ययोरितिअनुशासनविरोधात्।द्विवचनादिसाधुत्वानुपपत्तेरिति।विंशत्याद्याःसर्वाःसंख्यावाचकशब्दाः।संख्येयसंख्ययो
र्वर्त्तन्तेसंख्यार्थेद्विबहुत्वेस्तस्तासुचानवतेःस्त्रियः इत्युत्तरार्द्धेसंख्यारूपेऽर्थेद्वेत्रीणिशतानीतिद्विवहुत्वेभवतः इत्युक्तेरवशिष्टसंख्येयार्थकत्वे
विंशत्याद्याःसर्वाःसंख्याशब्दाएकत्वेवर्त्तन्तेइत्यर्थोलभ्यते।तथाचसंख्येयार्थकत्वेएकवचनमेवसाधुनतुद्विवचनवहुवचनेसाधुनी।संख्ये
यार्थकशतादिशब्दस्यद्विवचनवहुवचनान्तत्वेऽनुशासनविरोधात्।द्विवचनादिसाधुत्वानुपपत्तिरिति।शतादिशब्दानांसंख्यार्थकत्वेवस्वीकार्ये

श्रु·टी· संख्येवार्थो न तु संख्येयमिति भावः। संख्यार्थकत्वे दोषान्तरमाह। गवांशतानीत्यादौ षष्ठ्यर्थान्वयानुपपत्तेश्चेति। भेदे षष्ठी गोवृत्तीनि वह्नि
१०५ निशतत्वानीत्यर्थः। गोवृत्तीनि शतसंख्येयानीति बाधानुपपत्तेश्चेत्यर्थः। न च गवांशतानीत्यत्राभेदः षष्ठ्यर्थः गवाभिन्नानि शतसंख्येया
नीति बोध इति वाच्यं॥ तथा सति॥ षष्ठ्या अभेदार्थकत्वे सति। ब्राह्मणा दशेत्यत्र ब्राह्मणानां दशेत्यपि स्यात्। अस्माकं च। पूर्वपक्षिणा त्व्वा ए
कादारभ्य अष्टादशपर्यन्ताः संख्यावाचकाः शब्दाः संख्येये वर्तन्ते संख्येये ह्य दशत्रिष्वित्यनुशासनात् ब्राह्मणा दशेत्येव साधु न तु ब्राह्मणा

गवांशतानीत्यादौ षष्ठ्यर्थान्वयानुपपत्तेश्च। न चाभेदः षष्ठ्यर्थः। तथा सति ब्राह्मणा दश इत्यत्र ब्राह्मणानां दशेत्यपि स्यात्।
अस्माकं चा दशतः संख्याः संख्येये वर्तन्ते अतः परं संख्याने संख्येये चेत्यनुशासनाद् दशादिशब्दानां शतादिशब्दवत्संख्या
नार्थकत्वाभावाद् दशत्वादिसंख्यायाः पदार्थतावच्छेदकत्वेन तत्र षष्ठ्यर्थसंबंधान्वयासंभवेन न तथा प्रयोग इति। तदसत् गवांश
तानीत्यादौ संख्यायाः प्राधान्येन शतादिशब्दवाच्यत्वे गवांशतं दद्यादित्यादौ शतादिपदार्थस्य संख्याया दानादिकर्मत्वान्वयायोग्य
तया प्रामाण्यानुपपत्तिः।
नां दशेति साध्वित्यर्थः। अतः परं इति सामान्येन पुंसकम्। अतः परा दशादिभिन्ना विंशत्यादिसंख्या संख्याने संख्येये चास्ति
। तथा च विंशतिर्ब्राह्मणा इत्यत्र संख्येये विंशतिशब्दः एकवचनांतः ब्राह्मणानामेक विंशतिर्द्वे विंशती तिस्रो विंशतयः। इति संख्यार्थकत्वे एक द्वि ब
हुवचनानि भवंतीत्यर्थः। दशादिशब्दानां शतादिशब्दवत्संख्यानार्थकत्वाभावात्। न ब्राह्मणानां दशेति प्रयोग इत्यर्थः। गोसंबंधि दशत्वसंख्यावंतो राम
ब्राह्मणा इत्यन्वयो न संभवति। पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्त्या पदार्थतावच्छेदके दशत्वे षष्ठ्यर्थान्वयो न भवतीति न तथा प्रयोगः १००

न ब्राह्मणानां दशेति प्रयोग इति॥ तदसदिति॥

गवांशतानीत्यादौ शतत्वसंख्यायाः प्राधान्येन शतशब्दार्थत्वे गवांशतं दद्यादित्यादौ शतत्वसंख्यायाः दानकर्मत्वं न संभवतीति गवां शतं दद्यादिति वाक्यस्य प्रामाण्यानुपपत्तिः॥ गवांशतं शुक्लमिति॥ शुक्लमेवेतं इत्यर्थः॥ क्वचिच्च मूल्यार्थकशुक्लपदघटितः पाठः सनातीवस मंजसः॥ अरुणया पिंगाक्ष्या एकहायिन्या गवा सोमं क्रीणातीत्यत्रारुण्यगुणस्य क्रयसाधनत्वे पिगोरूपाश्रयद्वारा क्रयसाधनत्वमुपपद्यते ।तथात्रापि शतत्वसंख्याया मूल्यत्वासंभवेपि शतत्वाश्रयद्रव्यस्य मूल्यत्वं संभवतीति संख्याया अपि द्रव्यद्वारा क्रयार्थत्वसंभवेन योग्यतान पायात्॥ गवांशतं दद्यादित्यादौ शतत्वसंख्यायाः शतत्वाश्रयद्रव्यद्वारा दानकर्मत्वसंभवेन प्रामाण्योपपादनेपि गवांशतं शुक्लमित्यादौ शत त्वसंख्यायां शुक्लाद्यभेदान्वययोग्यताविरहान्॥ तदनुपपत्तिश्च॥ प्रामाण्यानुपपत्तिश्चेत्यर्थः। सिद्धान्ते तु षष्ठ्यर्थः शतपदार्थैकदेशे

गवांशतं शुक्लमित्यादौ संख्यायां शुक्लाद्यभेदान्वययोग्यताविरहात्तदनुपपत्तिश्च॥

शतत्वेऽन्वेति गवांशतमित्यतः गोसमवेतं यत् शतत्वं तदवच्छिन्नं अर्थात् गोरूपधर्मि शुक्लमिति बोधः। गवांशतं गावइति प्रयोगो नास्ति शतत्वगोत्वयोराधारतानिरूपिताधेयताप्रतीतौ तुल्यवित्तिवेद्यतया शतत्वस्याधेयतानिरूपिताधारतागविप्रतीतेरेवेति पुनस्तत्सतिपदनेवाक्यं निराकांक्षं यथा नीलघटयोरभेद इत्यत्र नीलघटपदे नीलत्वघटत्वपरे पदार्थभेदे द्वन्द्वः अभेद इत्यस्य चाश्रयाभेद इत्यर्थः। तथा च गवांशतं दद्यात् गवांशतं शुक्लं यत्रापि गोसमवेतं शतत्वं तदधिकरणं दद्यात् तदधिकरणं शुक्लमित्यर्थसंभवात् संख्यार्थत्वस्वयुक्तमेव आरोपे सति निमित्तानुसरणं न तु निमित्तमस्तीत्यारोप इति सिद्धप्रयोगेष्वेवागतिः न तु लक्षितेन गवां गंधं रूपं रसं च दद्या इत्या

रोपोपितथापितदधिकरणमित्यधाहारगौरवात् सिद्धान्तमेव सम्यगिति नीलघटयोरभेद इत्यत्रागत्या तथाङ्गीकारात्॥ तस्मात्। अप्रामाण्यापतिरूपदोषात्। दशादिशब्दा इव शतादिशब्दा अपि संख्याविशिष्टसंख्येयार्थका एव न तु धर्मिविशेषणतानापन्नकेवलसंख्यादिवाचका इत्यर्थः। संख्येयार्थकत्वेपि संख्यार्थकताप्रवादमुपपादयितुमाह। स्वार्थैकदेशेपि संख्यायामिति। शतपदार्थैकदेशेपि शतत्व संख्यायां स्वं शतादिशब्दः प्रकृतिर्यस्यास्तादृशी प्रथमादिविभक्तिस्तदर्थैकत्वरूपसंख्यान्वयसाकांक्षतया एकं शतत्वमिति बोधात्। एवमन्यप्रकृतिकषष्ठ्यर्थसंबन्धान्वयसाकांक्षतया चेति। गवां शतमित्यत्रान्यप्रकृतिका गोपदप्रकृतिका या गवामिति षष्ठी तदर्थः

तस्माद्दशादिशब्दा इव शतादिशब्दा अपि संख्यावच्छिन्नवाचका एव। न तु धर्मिविशेषणतानापन्नसंख्यावाचकाः स्वार्थैकदेशेपि संख्यायां स्वप्रकृतिकविभक्त्यर्थसंख्यान्वयसाकांक्षतयान्यप्रकृतिकषष्ठ्यर्थसंबन्धान्वयसाकांक्षतया तेषां संख्यानार्थकताप्रवादः न तु दशादिशब्दानां तथात्वं दशादिब्राह्मणतात्पर्येण ब्राह्मणानां दशेत्यादिप्रयोगविरहादिति॥

संबन्धस्तदन्वयसाकांक्षतया चेत्यर्थः। गोवृत्तिशतत्वसंख्येति बोधात्। तेषां। शतादिशब्दानां। संख्यानार्थकताप्रवाद इति। स्वार्थैकदेशशतत्वविशेष्यकविभक्त्यर्थैकत्वादिप्रकारकबोधजनकपदत्वमेव शतादिशब्दे संख्यानार्थकत्वं अत्र विभक्त्यर्थपदेन स्वप्रकृतिकविभक्त्यर्थअन्यप्रकृतिकविभक्त्यर्थोपि ग्राह्यः। न तु दशादिशब्दानां तथात्वम्। स्वार्थैकदेशशतत्वे दशपदप्रकृतिकप्रथमार्थैकत्वान्वयसाकांक्षत्वरूपं संख्यानार्थकत्वेन एकं ब्राह्मणपदरूपान्यप्रकृतिकषष्ठ्यर्थसंबंधान्वयसाकांक्षत्वरूपं संख्यानार्थकत्वं दशादिशब्देनास्ति ब्राह्म

तेषां॥ दशादिशब्दानां संख्येयमात्रवाचिताप्रवादइत्यर्थः। विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः। संख्यायां द्विबहुत्वे स्त इत्यनुशासनं
चोक्तार्थे तात्पर्यग्राहकमिति॥ विंशत्याद्याः संख्याः संख्येयसंख्ययोर्वाचका इति नार्थः किंतु संख्येयसंख्यान्यतरविशेष्यकैकत्वादिरूपविभ-
क्त्यर्थप्रकारकान्वयबोधपरा इत्येवानुशासनार्थः। शतं गावः गवां शतमित्युभयविधप्रयोगदर्शनात्। संख्येयमात्रविशेष्यकशतत्वादिप्रका-
रकबोधपराः शतादिसंख्यावाचकशब्दाः सदैकत्वे वर्तन्ते शतं ब्राह्मणा इति प्रयोगदर्शनात्। संख्यायां शतत्वादिसंख्याविशेष्यकशतादिपदो-
त्तरैकवचनद्विवचनबहुवचनार्थएकत्वद्वित्वबहुत्वप्रकारकबोधपराः शतादिसंख्यावाचकाः शब्दाः एकवचनान्ताः द्विवचनान्ताः बहुवचनां

तेषां संख्येयमात्रवाचिताप्रवादइति। विंशत्याद्याः सदैकत्वे सर्वाः संख्येयसंख्ययोः संख्यायां द्विबहुत्वे स्त इत्यनुशासनम
प्युक्तार्थे तात्पर्यग्राहकम्। एकद्विबहुशब्दोत्तरैकवचनद्विवचनबहुवचनानि च न संख्याबोधकानि। उद्देश्यतावच्छेदकवि
धेययोरैक्येनैकत्वान्वये आकांक्षाविरहादिति। तदुत्तरं प्रथमाविभक्तिः साधुतामात्राय॥

ता अपीत्यर्थः। गवां शतं शते शतानीति प्रयोगा
त् एकं शतत्वं द्वे शतत्वे त्रीणि शतत्वानीत्यर्थादिति प्रसंगादाह। एकद्विबहुशब्दोत्तरैकवचनद्विवचनबहुवचनानि च न संख्याबोधकानीति। ए
को द्वौ बहव इत्यत्र एकत्वादि उद्देश्यतावच्छेदकं विधेयं प्रथमार्थः। एकत्वाद्येवेति एकत्वादिविशिष्टएकत्वादिविशेषः इति शाब्दधीर्नजायते।
ननु नैरर्थक्ये प्रथमादिरहितमेव प्रयोक्तुमुचितमत आह। प्रथमाविभक्तिः प्रयोगसाधुतामात्रायेति। प्रत्यवायाजनकत्वं च साधुत्वं। न केवला प्र
कृतिः प्रयोक्तव्या न च केवलः प्रत्ययः इति केवलप्रकृतिप्रत्ययप्रयोगनिषेधात्। एकः शब्दः सम्यग्ज्ञातः सुप्रयुक्तः स्वर्गे लोके कामधु-

भवतीति महाभाष्योक्तेः प्रत्ययसहितप्रकृतिप्रयोग एव सुप्रयोग इति साधुतामात्रायेत्यनेन विभक्तिबोधकत्वव्यवच्छेदः। नित्यबहुव
चनान्ताः। ये आपः सुमनसो वर्षा अप्सरः सिकताः समाः। एते स्त्रियां बहुत्वे स्युरेकत्वेप्युत्तरत्रयं इति कोशात्। अप्शब्द आदिर्येषां ते अबाद
यः। तेभ्यः परं केवलं प्रथमाबहुवचनमपि किंचिन्निरर्थकमेवेति। यत्र। एकजलव्यक्तौ॥ तादृशः आप इति शब्दः। प्रयुज्यते। तत्र। एक
व्यक्तितात्पर्येण प्रयुक्ते आप इति शब्दे एकव्यक्तौ बहुवचनार्थबहुत्वान्वययोग्यताविरहादित्यर्थः। यल्लिति। वर्धमानोपाध्यायैः जलगतरूप

नित्यबहुवचनांतावादिशब्दपरं प्रथमाबहुवचनमपि किंचिन्निरर्थकमेव यत्रैकव्यक्तिमात्रतात्पर्येण तादृशशब्दः प्रयु
ज्यते तत्र बहुत्वान्वये योग्यताविरहात्। यत्तु तद्गतगुणादिसाधारणबहुत्वस्य तत्रान्वय इति। तन्न शोभनम्। प्रकृत्यर्थतावच्छे
दकव्याप्यपर्याप्तिसंबन्धेनैवानेकवृत्तिसंख्यान्वयस्य व्युत्पन्नतया तादृशसंबन्धेन तथाविधबहुत्वान्वये योग्यताविरहात्। अ
न्यथोदासीनघटपटादिसाधारणबहुत्वस्याप्यन्वयसंभवेन तद्गतगुणादिसाधारणबहुत्वानुधावनस्याकिंचित्करत्वात्॥

रसमसाधारणबहुत्वस्य तत्र जलगतगुणेष्वन्वय इत्युक्तं। तन्न शोभनमिति। अनेकवृत्तिद्वित्वबहुत्वादिसंख्या सा एकस्मिन्न वर्तते इत्यनेकवृत्तिः सं
ख्या द्वित्वबहुत्वादिः सा च आप इत्यत्र जलत्वरूपप्रकृत्यर्थतावच्छेदकव्याप्या या पर्याप्तिः तद्रूपसंबंधेनैवान्वेतीति नियमेन। तादृशसंबंधेन प्रकृ
त्यर्थतावच्छेदकजलत्वव्याप्या याद्वित्वबहुत्वादिपर्याप्तिः सा जल एवास्ति न जलीयगुणेषु तत्र जलत्वाभावादिति भावः। तथाविधबहुत्वान्वये जल
त्वव्याप्यपर्याप्तिसंबंधेन जलीयगुणेषु बहुत्वान्वये। गुणेषु जलत्वाभावेन जलत्वव्याप्यपर्याप्तिसंबंधेन बहुत्वान्वये योग्यताविरहादित्यर्थः। अन्यथा

उदासीना आप इत्येतज्जन्यशाब्दविषयाश्च घटपटादयस्तत्साधारणबहुत्वस्य जले प्रकृत्यर्थेऽन्वयसंभववत्तद्गतजलगतगुणादिसाधारणबहु
त्वानुधावनस्यासमाधायकत्वादित्यर्थः। शंकते। अथाजहत्स्वार्थलक्षणयेति। गुणादिसाधारणो धर्मो जलजलगतगुणान्यतरत्वादिरूपो यद्वा
जलत्वंजलगतगुणाश्चेति समूहालंबनविषयत्वादिरूपस्तदवच्छिन्नमेव जलत्वंजलगतगुणान्यतरदेव प्रकृत्यर्थः। तथाच जलत्वंजलगतगुणेष्व
न्यतरत्वरूपप्रकृत्यर्थतावच्छेदकव्याप्यपर्याप्तिसंबन्धेन बहुत्वान्वयः संभवत्येवेति शंकायां समाधत्ते। तर्हि बहुत्वेनेति। बहुत्वेन भासमानेषु गुणा
दिष्वपि आपो द्रव्याणीति अभेदसंबन्धेन द्रव्यरूपपदार्थान्तरान्वयः स्यादिति वाक्यस्याप्रामाण्यापत्तिः एवं दारा अत्र गृहे सन्तीत्यत्रापि दारगुणेषु

अथाजहत्स्वार्थलक्षणया गुणादिसाधारणधर्मावच्छिन्नमेव प्रकृत्यर्थ इति चेत्तर्हि बहुत्वेन भासमानेषु गुणादिष्वपि प
दार्थान्तरान्वयः स्यात्। तथा चापो द्रव्याणि दारा अत्र गृहे संतीत्यादिवाक्यानामप्रमाणतापत्तिः गुणादिषु द्रव्याभेदे गृहवृ
त्तितादेर्बाधात्। मुख्यार्थमात्रपरत्वादृशशब्दानां बहुवचनांततानुपपत्तेश्चेति न किंचिदेतत्॥ १ गृहवृत्तित्वरूपपदार्थान्तरान्व

यापत्तेर्वाक्यस्याप्रमाणतापत्तिरित्यर्थः। ननु आरोपे सति निमित्तानुसरणं नतु निमित्तमस्तीत्यारोप इत्यभ्युपगमात्पदार्थान्तरान्वयापत्तिर्न संभवत्य
त आह। मुख्यार्थमात्रपरेति॥ लाक्षणिकार्थपरापदारादिशब्दानां बहुवचनांततोपपादनेपि मुख्यार्थमात्रपरत्वादृशशब्दानां अप्दारादिश
ब्दानां बहुवचनान्ततानुपपत्तेश्चेति। एकस्मिन्नापः परमाणौ एकस्यां राजयोषिति आपः दारा इति बहुत्वस्य बाधादिति भाव इति॥ न किंचि
देतदिति। तद्गतगुणानादाय बहुवचनोपपादनमसमञ्जसमित्यर्थः॥

अवादिपदार्थैएकद्वित्वान्वययोग्यतासत्वेपिअसाधुत्वादेवतदुत्तरमेकवचनद्विवचनंचनप्रयुज्यतेइति॥आपःस्त्रीभूम्निवार्वारिदाराःपुंभू
म्नीतिचामरकोशानुशासनादेकव्यक्तावपिबहुवचनंसाधुआपोदाराइत्यत्रतुएकस्यांव्यक्तौएकत्वान्वययोग्यतासत्वेपिएवंव्यक्तिद्वयेद्वित्वा
न्वययोग्यतासत्वेपिचअसाधुत्वादेवअनुशासनाननुशिष्टत्वरूपासाधुत्वादेवअप्दारादिशब्दोत्तरमेकवचनद्विवचनेनभवतइत्यर्थः॥इति
व्युत्पत्तिवादेसुप्विभक्तिविवरणम्।आख्यातैकवचनस्यसंख्यार्थकत्वेपिविवदन्तेनिष्कर्षानुसारिणइति।यत्राख्यातस्यैकवचनं
तत्रसुबेकवचनंनियतंकर्तृप्रत्ययस्थलेकर्मप्रत्ययस्थलेतुतत्रएकत्वंसुबर्थःआख्यातार्थोवेतिविवदन्तेइत्यर्थः।आख्यातादिव

अबादिपदार्थैएकत्वद्वित्वान्वययोग्यतासत्वेप्यसाधुत्वादेवतदुत्तरमेकवचनंनप्रयुज्यतेइतिध्येयम्।आख्यातैकवचन
स्यसंख्यार्थकत्वेपिविवदन्तेनिष्कर्षानुसारिणःघटोस्तीत्यादौसुबेकवचनादेवसंख्याबोधसंभवात्चैत्रेणदृष्टोघटइ
त्यादिस्थलानुरोधेनतस्यतद्बोधकतायाआवश्यकत्वात्।नचैकवचनत्वेनानुगतेनैकत्वशक्तत्वात्तिङेकवचनस्याप्येक
त्ववाचकत्वमक्षतमितिवाच्यम्॥ द्विवचनयोश्चसंख्यार्थकत्वमस्त्येवेतिनविवादः।चैत्रोमैत्रश्चगच्छतःसचत्वञ्चअहञ्चभवामःइ
त्यत्रसुब्द्विवचनबहुवचनयोरनियमादाख्यातमेवद्वित्वबहुत्ववाचकंनतुसुब्विभक्तिर्वाचिकेत्यर्थः।घटोस्तीत्यादौसुबेकवचनादेवसं
ख्याबोधसंभवादिति।सुबेकवचनादेवेत्येवकारेणाख्यातैकवचनस्यसंख्याबोधकत्वव्यवच्छेदः।चैत्रेणदृष्टोघटइत्यादौआख्यातंवि
नापिसुपाएकत्वबोधनात्।तस्यतद्बोधकतायाःसुबेकवचनस्यैकत्वबोधकतायाआवश्यकत्वादित्यर्थः॥शंकतेनचैकवचनत्वेनेति॥

एकवचनत्वस्येति। आख्यातसुप्साधारणैकवचनत्वेनैकत्वे शक्तिरितितु आत्माश्रयान्योन्याश्रयादिदोषैः पूर्वमेवनिराकृतइत्यर्थः। तुष्यतु
दुर्जनइतिन्यायेनाह। अस्तुवेति। तेनरूपेण। एकवचनत्वेनरूपेण। एकवचनस्याप्येकत्वेशक्तिः तथापितिङ्जन्यैकत्वोपस्थितेः शाब्द
बोधहेतुत्वेमानाभावः। मानाभावमुपपादयति। नहीति॥ सामान्यतएकवचनज्ञानजन्यैकत्वोपस्थितित्वेनतच्छाब्दबोधसंभवः। एक
त्वशाब्दबोधसंभवोनहीत्यर्थः। तथासतीति। एकत्वोपस्थितिंप्रतिएकवचनज्ञानजन्यैकत्वोपस्थितित्वेनकारणत्वांगीकारेसती— त्यर्थः। एक

एकवचनत्वस्यैकत्वशक्ततावच्छेदकतायाः प्रागेवनिराकृतत्वात्। अस्तुवातेनरूपेणतिङेकवचनस्याप्येकत्वेशक्ति
स्तथापितज्जन्यैकत्वोपस्थितेः शाब्दबोधोपयोगित्वेमानाभावः नहिसामान्यतएकवचनज्ञानजन्योपस्थितित्वेनतच्छाब्द
बोधहेतुतासंभवः। तथासत्येकत्वेऽगृहीतसुपदवृत्तिकस्यपुंसः सुपदप्रकृतिघटादिपदोपस्थाप्यघटादौपटादिपदोत्तरा
मादिपदोपस्थाप्यैकत्वाद्यन्वयबोधप्रसंगः किन्तुसुपदत्वादिप्रकारकज्ञानजन्यतदुपस्थितित्वादिनैव॥ ६ ॥

त्वेअगृहीतसुपदवृत्तिकस्यपुंसः सुपदप्रकृतिघटादिपदोपस्थाप्यघटादौपटादिपदोत्तरामादिपदोपस्थाप्यैकत्वाद्यन्वयबोधप्रसं
गइति॥ येनपुरुषेणघटइतिश्रुतंघटपदेशक्तिर्गृहीता। घटपदोत्तरंसुपदस्यैकत्वेशक्तिर्नगृहीतापटमित्यत्रापिएकत्वेऽर्थेशक्तिर्गृहीता
तस्यपुंसः अमुपस्थाप्यैकत्वंपटेभासतेघटेतुनभासते। सुपस्थाप्यैकत्वं घटेपिभासेतअमूरूपैकवचनजन्यैकत्वोपस्थितिरूपकारण
सत्वात्तद्वारणायसुपदत्वादिप्रकारकसुपदविशेष्यकज्ञानजन्यकर्मत्वोपस्थितित्वेनैवएकत्वप्रकारकघटादिशाब्दबोधहेतुतासंभ

तथासति॥ एकत्वप्रकारकशाब्दबोधं प्रति सुपदत्वादिप्रकारकज्ञानजन्यैकत्वोपस्थितित्वेनैव कारणतांगीकारे सति॥ घटादिपदोत्तरसु
पदत्वरूपोयआनुपूर्वीविशेषस्तद्रूपायाः आकांक्षायायज्ज्ञानंतद्घटितायाघटादावेकत्वान्वयबोधस्यसामग्र्यां सुपदत्वादिप्रकारकधीजन्यो
पस्थितेरंतर्भावात्तादृशापत्तेरनवकाशात्। अन्तर्भावादित्यनेन आकांक्षाज्ञानकारणतयैवनिर्वाहे सुपदत्वादिप्रकारकधीजन्योपस्थितेः
पृथक्कारणत्वाकल्पनलाघवंदर्शितम्। तादृशापत्तेः। एकत्वेः गृहीतसुपदवृत्तिकस्यपुंसो घटादौ पटादिपदोत्तराम्पदोपस्थाप्यैकत्वान्वयबो

तथासति घटादिपदोत्तरसुपदत्वादिरूपानुपूर्वीविशेषरूपाकांक्षाज्ञानघटितायां घटादावेकत्वान्वयबोधस्यसामग्र्यांसु
पदत्वादिप्रकारकधीजन्योपस्थितेरंतर्भावात्तादृशापत्तेरनवकाशात्। एवंतिबादिपदत्वप्रकारकज्ञानजन्योपस्थितित्वेन
तच्छाब्दबोधहेतुत्वेमानाभावइति। यत्तु तिबादेः संख्यानभिधायकत्वे चैत्रः पचति तण्डुलं चैत्रेण पच्यते तण्डुल इत्यादौ
कर्तृकर्मवाचकपदात्तृतीयाद्वितीययोरापत्तिः। कर्तृकर्मसंख्याया अनभिधाने कर्तृकरणयोस्तृतीयेति कर्मणि द्वितीयेति सू
त्राभ्यांतयोरनुशासनात्। नैयायिकमते लकारस्य कर्तृकर्मावाचकतया तदनभिधानस्य द्वितीयातृतीयानियामकत्वासंभवात्॥ ॥

धापत्तेरनवकाशादित्यर्थः। एवमिति। तिप्जन्योपस्थितित्वेन एकत्वशाब्दबोधहेतुत्वेमानाभावइत्यर्थः। यत्त्विति। तयोस्तृतीयाद्वितीययोः ननु
वैयाकरणमतवत् लकारेण कर्ता कर्म चाभिधीयतांइति तदनभिधानस्य कर्तृकर्मानभिधानस्य तृतीयानियामकतास्तु कर्तृकर्मगतसंख्यान
भिधाने तृतीयाद्वितीयानियामकतामास्त्वित्यतआह। नैयायिकमतेइति। तदनभिधानस्य। कर्तृकर्मानभिधानस्य। तृतीयाद्वितीयानियामकत्वा

कर्तृकर्मगतसंख्यानभिधानमेव तृतीयादिनियामकं इत्याख्यातस्य संख्यावाचकत्वमावश्यकमिति भावः। ननु एकवचनत्वेन एकत्वावच्छि
न्नशक्तिस्वीकारात् चैत्रः पचतीत्यत्रैव चैत्रेण पच्यत इत्यत्राख्यातैकवचनेन चैत्रगतैकत्वाभिधानात् कर्त्रादिवाचकसंख्यानभिधानस्य क
र्त्रादिवाचकपदोत्तरतृतीयादिनियामकत्वं न संभवतीति शंकते। न चेति। समाधत्ते। यतस्तत्कृतेत्यादिना। चैत्रादिगतसंख्यानभिधायकत्व
म्। प्रकृते। चैत्रेण पच्यते इत्यत्र। किं नाम न हि चैत्रगतैकत्वादिसंख्यानिष्ठाया शक्तिरूपा वृत्तिस्तदनिरूपकत्वं। आख्यातैकवचनस्य

न च कर्त्रादिगतसंख्यानभिधानमेव कथं कर्त्रादिवाचकपदोत्तरतृतीयादिनियामकं। चैत्रेण पच्यते तण्डुल इत्यादिस्थले
पि लकारस्य चैत्रादिगतसंख्याभिधायकत्वादेकत्वत्वादिना एकत्वादिसामान्यस्यैवैकवचनाद्यभिधेयत्वादिति वाच्यं। यतः
तद्गतसंख्यानभिधायकत्वं प्रकृते न तद्गतसंख्यानिष्ठवृत्त्यनिरूपकत्वम् अपि तु तद्विशेष्यकसंख्याप्रकारकशाब्दबोधाननुकूलत्वमेव।
तथा च कर्त्रादिविशेष्यकसंख्यान्वयबोधाजनकलकारादिसमभिव्याहृतकर्त्रादिवाचकपदात्तृतीयादयो भवंतीत्यत्र तदनुशासन
तात्पर्यम्॥

॥चैत्रगतैकत्वनिष्ठशक्तिनिरूपकत्वात्। अपि तु तद्विशेष्यकः। चैत्रादिविशेष्यकः। आख्यातार्थैकत्वसंख्याप्रकारकः। चैत्रः पच
तीति वाक्यजन्यः शाब्दबोधस्तदनुकूलत्वं चैत्रेण पच्यत इति तृतीयान्तचैत्रपदसमभिव्याहृतैकवचने वर्तते इदमेव चैत्रादिगतसंख्यानभिधा
यकत्वम्। तथा च कर्त्रादिविशेष्यकः लकारार्थैकत्वसंख्याप्रकारकान्वयबोधस्तज्जनको यो लकारादिस्तत्समभिव्याहृतकर्त्रादिवाचकचैत्रा
दिपदात्तस्मात्तृतीयादयो भवन्ति एवं कर्मविशेष्यकः आख्यातार्थैकत्वसंख्याप्रकारकः शाब्दबोधस्तज्जन ॥ ६ ॥ ॥

व्यु॰टी॰ कर्त्तण्डुलः पच्यते इति लकारादिः तज्जनकः तण्डुलं पचतीति लकारादिः तत्समभिव्याहृतकर्मादिवाचकपदाद्द्वितीया इति कर्तृकरणयोस्तृ
१०५ तीया कर्मणि द्वितीयेत्यनुशासनयोस्तात्पर्यम्। संख्याकालातिरिक्तार्थो भावना भावनान्वयिनि संख्यान्वय इति नियमात्साक्षात्समवायसंब
न्धेन भावनान्वयि चैत्रः तण्डुलं पचतीत्यत्र प्रथमान्तोपस्थाप्यचैत्रस्तत्रैव संख्यान्वयः कृतिमानेकश्चैत्र इति शाब्दबोधात्। चैत्रेण पच्यते तण्डु
ल इत्यादौ परंपरया स्वप्रयोज्यव्यापारजन्यफलवत्त्वरूपपरंपरासंबन्धेन तण्डुलो भावनाविशेष्यस्तत्र स्वं चैत्रवृत्तिकृतिस्तज्जन्यो व्यापारः

चैत्रेण पच्यते तंडुल इत्यादौ चैत्रादिविशेष्यकं संख्यान्वयबोधकत्वं नाख्यातस्य आख्यातार्थभावनाया यत्रान्वयस्तद्वि
शेष्यकसंख्यान्वयबोधस्यैवाख्यातेन जननात्तादृशभावनान्वयबोधविशेष्यश्च प्रथमान्तपदोपस्थाप्य एव चैत्रः पचति त
ण्डुलमित्यादौ चैत्रादिः साक्षादेव भावनाविशेष्यः। चैत्रेण पच्यते तण्डुल इत्यादौ तु परम्परया चैत्रादिनिष्ठभावनाजन्यफ
लशाली तण्डुल इत्याकारकबोधस्य तत्रोदयात्॥ तस्मात्तिबादेरपि संख्याबोधकत्वमावश्यकमिति॥ ॥ ६ ॥

कृत्कारादिस्तज्जन्यफलं विक्लित्तिस्तद्वत्त्वम्। चैत्रनिष्ठभावनाजन्यफलशाली तण्डुल इति बोधात्॥ उपसंहरति॥ तस्मादिति॥ तिबादेः संख्यान
भिधायकत्वे कर्तृकर्मणोस्तृतीयाद्वितीयाव्यवस्थानुपपत्तिरूपहेतोस्तिबादेरपि संख्याबोधकत्वमावश्यकमित्यर्थः। ननु कर्त्रादिनिष्ठसं
ख्याबोधानुकूललकारादिसमभिव्याहृतकर्त्रादिवाचकपदात्तृतीयेत्यत्र कर्तृकरणयोस्तृतीयेति सूत्रतात्पर्यमित्युक्तं तत्र लकारादेः क राम
र्त्रादिनिष्ठसंख्यान्वयबोधानुकूलत्वं फलोपधायकत्वलक्षणं विवक्षितं उत स्वरूपयोग्यत्वलक्षणं इति विकल्पं दूषयति॥ ६ ॥ १०५

तन्नशोभनमित्यपिपाठः।तथाहीति।आद्येआह।चैत्रःतण्डुलंपचतीत्यत्रचैत्रादिरूपकर्तृविशेष्यकैकत्वप्रकारकान्वयबोधानुकूलत्वंतिङेकवचने
स्तिकर्त्रादिनिष्ठसंख्यान्वयबोधानुपधायकत्वेचैत्रेणतण्डुलःपच्यतेइत्यत्रतेइत्येकवचनमस्तिइतिचैत्रेणेतितृतीयोपपत्तिः।यदितादृ
शबोधोपधायकज्ञानविषयत्वाभाववत्त्वंतदायादृशतिवादिज्ञानेन॥चैत्रःपचतितण्डुलमितितिवादिज्ञानेन।सहकार्यान्तरविरहात्
तिङेकवचनमेकत्वेनशक्तमितिबाधज्ञानंएकत्वप्रकारकचैत्रविशेष्यकबोधेकारणविघटकतयाप्रतिबंधकं।तद्विरहःसहकार्यान्तरंतद्वि
रहाद्यज्ञानात्।तादृशबोधेनजनितःपाकानुकूलकृतिमांश्चैत्रइतिबोधेनजनितः।तत्रतिङेकवचनज्ञानंएकत्वप्रकारकचैत्रविशेष्यकबो

तन्नविचारसहम्।तथाहि।कर्त्रादिनिष्ठसंख्यान्वयबोधाननुकूलत्वंयदितादृशबोधोपधायकज्ञानविषयत्वाभाववत्त्वंत
दायादृशतिवादिज्ञानेनसहकार्यान्तरविरहात्तादृशबोधेनजनितस्तद्योगेतृतीयाद्यापत्तेः।यदिचतादृशबोधस्वरूपयोग्यज्ञा
नविषयत्वाभावस्तदायगादिसमभिव्याहृतात्मनेपदादिज्ञानस्यापितादृशबोधस्वरूपयोग्यत्वात्तत्स्वरूपयोग्यज्ञानाविषयति
वाख्यानस्यैवाप्रसिद्धेः। ।।धरूपफलानुपधायकमितितादृशबोधोपस्थापकज्ञानविषयकत्वाभाववत्त्वरूपनियामकत्वात्।तद्योगे
वाधकालीनतिवादियोगेचैत्रेणतण्डुलंपचतीतितृतीयाद्यापत्तिरित्यर्थः।द्वितीयेआह।यदिचेतितादृशबोधस्वरूपयोग्यताज्ञानविषयत्वा
भावइति।एकत्वप्रकारकचैत्रविशेष्यकशाब्दबोधनिष्ठकार्यतानिरूपिताख्यातैकवचनत्वादिरूपकारणतावच्छेदकधर्मवत्त्वप्रकारकज्ञान
विषयत्वाभावः।तदाचैत्रेणतण्डुलःपच्यतेइति।यगादिसमभिव्याहृतात्मनेपदज्ञानस्यापितादृशबोधस्वरूपयोग्यत्वात्॥एकत्वप्रकारकचै

व्यु.टी. शेष्यकशाब्दनिरूपिताख्यातैकवचनत्वतिस्वतेत्वादिज्ञानस्वरूपकारणतावच्छेदकधर्मवत्वात्। नत्वस्वरूपयोग्येति। एकत्वप्रकारकचै
१०६ त्रविशेष्यकशाब्दबोधनिरूपिताख्यातैकवचनत्वतिस्वतेत्वादिप्रकारकज्ञानस्वरूपं स्वरूपयोग्यज्ञानं तद्विषयतिपाख्यानस्यैवासि
द्धेतिवादेर्नसंख्याबोधकत्वमितिभावः। शंकते॥ अथेति। चैत्रविशेष्यकैकत्वप्रकारकान्वयबुद्धित्वावच्छिन्नं प्रति चैत्रपदसमभिव्याहृतत्व
तिवादिविषयकज्ञानत्वेन हेतुताइति। कर्तृविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकं विषयित्वं चैत्रपद

अथ कर्त्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयितानिरूपकत्वमेव ताह
शबोधानुकूलत्वम्। चैत्रः पचतीत्यादिवाक्यघटकतिवादिविषयिता चैत्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नज
न्यतानिरूपितजनकतावच्छेदिका। ताहशान्वयबुद्धित्वावच्छिन्नं प्रति चैत्रादिपदसमभिव्याहृततिवादिपदज्ञानस्य हेतु
त्वात्। चैत्रेण पच्यते तंडुल इत्यादिवाक्यघटकतादिपदविषयिता च न ताहशी। चैत्रादिपदसमभिव्याहृततादृशपदज्ञा
नत्वेन ताहशबुद्धित्वावच्छिन्नं प्रत्यहेतुत्वात॥ ११ समभिव्याहृततिवादिविषयकज्ञाननिष्ठत्वन्निरूपकत्वं चैत्रः तण्डुलं पचतीति पदे प्र
सिद्धम्। चैत्रेण तण्डुलः पच्यत इत्यत्रतेपदे ताहशविषयतानिरूपकत्वं तदेव ताहशबोधानुकूलत्वं कर्त्रादिनिष्ठसंख्यान्वयबोधानुकूलत्वम्
तण्डुलः चैत्रेण पच्यत इत्यत्र तेपदेऽसीति कर्त्रादिविशेष्यकसंख्यान्वयबोधाजनकत्वकारादिसमभिव्याहृतकर्त्रादिवाचकचैत्रपदात्तृतीयो राम
त्पत्तिरित्यर्थः चैत्रः पचतीत्यादिवाक्यघटकतिवादिज्ञाननिष्ठातिपादिनिष्ठविषयतानिरूपितविषयिता चैत्रादिविशेष्यकएकत्वसंख्याप्रका १०६

न्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदिकातादृशान्वयबुद्धित्वावच्छिन्नंप्रतिचैत्रादिविशेष्यकसंख्याप्रकारकान्व
यबुद्धित्वावच्छिन्नंप्रतिचैत्रादिपदसमभिव्याहृततिबादिपदज्ञानस्यहेतुत्वात्।चैत्रेणपच्यतेतण्डुलइत्यादिवाक्ये।तेआदिपदनिरूपितति
बादिपदज्ञाननिष्ठाविषयिताचनतादृशी।ननुचैत्रादिविशेष्यकैकत्वरूपसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनक
तावच्छेदिकाचैत्रादिपदसमभिव्याहृततातादृशपदज्ञानत्वेन।तिबादिपदज्ञानत्वेन।तादृशान्वयबुद्धित्वावच्छिन्नंप्रति।चैत्रादिविशेष्यकसं
ख्याप्रकारकान्वयबुद्धित्वावच्छिन्नंप्रतिअहेतुत्वादित्यर्थः।सिद्धान्तीशंकते।नचेति।चैत्रःपचतेइत्यादौचैत्रविशेष्यकाख्यातार्थसंख्याप्रकार

नचचैत्रःपचतेइत्यादौचैत्रविशेष्यकाख्यातार्थसंख्यान्वयबोधोत्पत्त्याचैत्रादिपदसमभिव्याहृततादिपदज्ञानत्वेनतादृ
शान्वयबुद्धित्वावच्छिन्नहेतुताऽक्षतैवेतिचैत्रेणपच्यतेइत्यादिवाक्यघटकीभूततादिपदविषयितापितादृश्येवेतिवाच्यम्

कान्वयबोधोत्पत्त्याचैत्रसमभिव्याहृततिबादिपदज्ञानत्वेनापितादृशान्वयबुद्धित्वावच्छिन्नंप्रतिचैत्रविशेष्यकाख्यातार्थप्रकारकान्वयबुद्धित्वाव
च्छिन्नंप्रतिहेतुताअक्षतैवेति।चैत्रेणपच्यतेइत्यादिवाक्यघटकीभूततादिपदविषयितापितादृश्येव।तादिपदनिरूपितातादिपदज्ञाननिष्ठाविष
यितापिचैत्रादिविशेष्यकसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्नजनकतावच्छेदिकैवेतितादृश्येवेत्यर्थः।तथाचसर्वमप्याख्यातंकर्त्रादिविशेष्य
कसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयित्वनिरूपकमेवकर्तृपदोत्तरतृतीयाप्रयोजकईदृशविषयितानिरूप
कमाख्यातमेवाऽप्रसिद्धमिति।कर्त्रविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयित्वानिरूप॥ ६

कारख्यातसमभिव्याहृतकर्त्रादिवाचकपदात्तृतीयादयः कथमुत्पद्येरन्ततश्चैत्रेणपचतेतण्डुलइत्यत्रापिचैत्रःपच्यतेतण्डुलइतिशंकायां
समाधत्ते॥ चैत्रेणपचतेचैत्रःपच्यतेइत्यादिवाक्यात्चैत्रादिविशेष्यकस्य। चैत्रादिविशेष्यकभावनाप्रकारकान्वयबोधस्य। एवंचैत्रादिवि
शेष्यकसंख्याप्रकारकान्वयबोधस्यचानुदयात्। तद्विशेष्यकतदुभयान्वयबोधे। चैत्रविशेष्यकभावनासंख्योभयप्रकारकशाब्दबोधेप्र
थमान्तचैत्रादिपदसमभिव्याहृतशबादिविकरणोत्तरंयत्त्चैत्रःपचतेचैत्रःपचतीत्यत्रतादृततदाख्यातपदन्तज्ज्ञानत्वेनहेतुःचैत्रेण
पच्यतेतण्डुलइत्यादिवाक्यघटकतादृपदानान्तादृशसमभिव्याहारादिशून्यतया। प्रथमान्तचैत्रादिपदसमभिव्याहृतशबादिविकरणो

चैत्रेणपचतेचैत्रःपच्यतेइत्यादिवाक्याच्चैत्रादिविशेष्यकस्यभावनायाःसंख्यायाश्चान्वयबोधस्यानुदयात्। तद्विशेष्यक
तदुभयान्वयबोधप्रथमांतचैत्रादिपदसमभिव्याहृतशबादिविकरणोत्तरतत्तदाख्यातपदज्ञानत्वेनहेतुत्वाच्चैत्रेणपच्य
तेतण्डुलइत्यादिवाक्यघटकतादीनांतादृशसमभिव्याहारादिशून्यतयातद्विषयितायाअतादृशत्वात्॥ ऽत्तरत्वरूपसमभि
व्याहारादिशून्यतया। तद्विषयितायाः। चैत्रेणपच्यतेतण्डुलइत्येतद्वाक्यघटकतादिनिरूपितयगादिज्ञाननिष्ठविषयितायाः। अतादृशत्वात्
॥ चैत्रादिविशेष्यकसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकत्वात्॥ तथाचचैत्रःपच्यतेइत्यादियगाद्यंता
ख्यातस्यचैत्रविशेष्यकसंख्यान्वयबुद्धिनिरूपितजनकतावच्छेदकविषयित्वानिरूपकत्वात्तत्समभिव्याहृतकर्तृपदेतृतीयैवसाध्वीतियम
चैत्रेणपच्यतेइत्येवभवतिनतुचैत्रःपच्यतेइतिभावः। चैत्रःपच्यतेइत्यादितआरभ्यतृतीयाद्वितीययोरप्रसक्तावपिइत्यन्तःशंकाग्रन्थः ॥ ॥ १०७

चैत्रः पच्यते लृट्लकारः कर्तरि स्यः तत्र चैत्रविशेष्यकबोधात्। एवं तण्डुलश्च पच्यते इति कर्मण्याख्यातलृट्लकारः तत्र तण्डुलविशेष्यकबो
धोदयात्। प्रथमान्तचैत्रतण्डुलादिपदसमभिव्याहृतस्योत्तरत्वादीनां चैत्रादिविशेष्यकसंख्यान्वयबुद्धित्वावच्छिन्नजन्यतानिरूपितजनकताव
च्छेदकविषयित्वनिरूपकत्वात्। तृतीयाद्वितीययोरप्रसक्तौ ईदृशविषयित्वानिरूपकत इत्याद्याख्यातपदसमभिव्याहृतचैत्रतण्डुलादिपदत्वं
प्रथमायां नियामकमिति चैत्रः पच्यते तण्डुल इति प्रथमान्ततण्डुलकर्तृकर्मणोर्युगपत्प्रयोगः स्यादित्यर्थः। चैत्रादिविशेष्यकसंख्याप्रकारकान्वय
बुद्धित्वावच्छिन्नजन्यतानिरूपितजनकतावच्छेदकविषयित्वानिरूपकाख्यातसमभिव्याहृतचैत्रपदत्वं तृतीयाप्रयोजकमेवमीदृशविषयि

चैत्रः पच्यते इत्यादितस्तण्डुलः पच्यत इत्यादितश्चैत्रतण्डुलादिविशेष्यकसंख्यान्वयबोधोत्पत्त्या चैत्रः पच्यते तण्डुल इ
त्यत्र उभयविशेष्यकसंख्यान्वयबोधोपयिकसमभिव्याहारज्ञानविषयितायाः तदित्यादौ सत्वेन कर्तृकर्मणोस्तृतीयाद्वितीययोर
प्रसक्तावपि न॥

त्वानिरूपकाख्यातपदसमभिव्याहृततण्डुलपदत्वं द्वितीयाप्रयोजकमिति पूर्वमावेदितमेव तदभावाच्चैत्रः पच्यते तण्डुल इत्यु
भयत्र कर्तृकर्मणोः प्रथमा स्यादिति भावः। चैत्रः पच्यते तण्डुल इत्यत्र चैत्रतण्डुलोभयविशेष्यकैकत्वसंख्याप्रकारकान्वयबोधोपयिकसमभिव्या
हारः प्रथमान्तचैत्रतण्डुलपदसमभिव्याहृतस्य प्रथमान्तचैत्रसमभिव्याहारः ते इत्याख्यातपदे त्विपचसमभिव्याहृतस्य समभिव्याहृतते इत्या
ख्यातपदज्ञानत्वेन चैत्रतण्डुलविशेष्यकसंख्याप्रकारकान्वयबुद्धित्वावच्छिन्ने हेतुत्वात्। चैत्रः पच्यते तण्डुल इत्यत्र चैत्रतण्डुलोभयविशेष्य
काख्यातार्थसंख्याप्रकारकान्वयबोधोपयिकः प्रथमान्तचैत्रतण्डुलपदसमभिव्याहृतस्य प्रत्ययान्तपचधातुसमभिव्याहारस्ते प्रत्यये स्तीति ॥

व्यु॰ दी॰ ज्ञानकारणज्ञाननिष्ठाया विषयितायानिरूपकतासंबन्धेन प्रत्ययेसत्वेन विषयित्वानिरूपकाख्यातसमभिव्याहृतचैत्रादिकर्तृपदात्तृ
१०८ तीया। एवन्ताद्दशविषयित्वानिरूपकाख्यातपदसमभिव्याहृततण्डुलपदात्द्वितीया। इह तु विषयित्वनिरूपकाख्यातसमभिव्याहृतक
र्तृकर्मणोस्तृतीयाद्वितीययोरप्रसक्तावपीति शंकायांसमाधानमाह॥ ताद्दशवाक्यंव्युसन्नाः प्रयुंजते इति॥ अप्रयोगेहेतुमाह। कर्तरि
साक्षात्समवायसंबन्धेन भावनाविशेषणकान्वयबोधस्य एवंकर्मणि आख्यातार्थभावनायाःस्वप्रयोज्यव्यापारजन्यफलवत्वसंबंधेन भाव
नाविशेषणकान्वयबोधस्य च युगपज्जनकताया आख्यातस्य व्युसन्नतया॥ ताद्दशवाक्यात्। चैत्रः पश्यते तण्डुल इति वाक्यात्। चैत्रतण्डु

ताद्दशवाक्यंव्युसन्नाः प्रयुंजते। कर्तरि साक्षात्कर्मणि च दर्शितपरंपरया युगपद्भावनाविशेषणकान्वयबोधजनकताया आ
ख्यातस्याव्युसन्नतया ताद्दशवाक्यादुभयविशेष्यकान्वयबोधासंभवात्। न चाकांक्षायोग्यतादिसत्वात्कथं न ताद्दशान्व
यबोध इति वाच्यम्। अगत्या एकविधान्वयबोधेन्यविधान्वयबोधसामग्र्यास्तद्घटकतात्पर्यज्ञानस्य वा प्रतिबंधकत्वोपग

लोभयविशेष्यकान्वयबोधासंभवात्॥ न चैत्रः पश्यते तण्डुल इति व्युसन्नाः प्रयुंजते इत्यर्थः। शंकते। न चाकांक्षायोग्यतादेः सत्वात्कथं न चैत्रः पश्य
ते तण्डुल इति प्रयोग इति वाच्यमिति। समाधत्ते। अगत्येति। अगत्या उपायान्तराभावेन। एकविधान्वयबोधे। चैत्रविशेष्यकपश्यते इत्याख्यातार्थै
कत्वप्रकारकबोधे। अन्यविधान्वयबोधसामग्र्याः। तण्डुलविशेष्यकपश्यते इत्याख्यातार्थसंख्याप्रकारकान्वयबोधसामग्र्याः॥ प्रथमान्ततण्डु
लपदसमभिव्याहृतपश्यते इत्यादिज्ञानयोग्यताकांक्षातात्पर्यज्ञानादिरूपायाः तद्घटकसामग्रीघटकतात्पर्यज्ञानस्य वा लाघवात्प्रतिबन्धकतो राम १०८

एवंतण्डुलविशेष्यकाख्यातार्थसंख्याप्रकारकान्वयबोधेप्रथमान्तचैत्रपदसमभिव्याहृतपश्यतेइत्याख्यातपदजन्योपस्थितिघटितयोग्यताज्ञानादि
सामग्र्याःप्रथमान्तचैत्रपदसमभिव्याहृतपश्यतेइत्याख्यातपदंचैत्रविशेष्यकसंख्याप्रकारकान्वयबोधंजनयतुइतिनासर्वज्ञानस्यवालाघ
वात्प्रतिबंधकत्वोपगमात्परस्परप्रतिबध्यप्रतिबन्धकभावोपगमात्सुन्दोपसुन्दन्यायेनसत्प्रतिपक्षस्थलीयानुमितिवत्चैत्रतण्डुलोभय
विशेष्यकपश्यतेइत्याख्यातार्थसंख्याप्रकारकबोधानुदयादितिभावः।शंकते।नचेति।तण्डुलःपश्यतेचैत्रेणेतिकर्माख्यातेनतण्डुलंपश्यते
चैत्रइतिकर्त्राख्यातेवाक्यद्वयविषयकसमूहालंबनदशायांअपिचैत्रविशेष्यकतण्डुलविशेष्यकोभयविधानुपपत्तिः॥चैत्रविशेष्यक

नचचैत्रेणतण्डुलःपश्यतेचैत्रस्तंडुलंपश्यतेइत्यादिवाक्यद्वयविषयकसमूहालंबनदशायामपिउभयविधान्वयबोधा
नुपपत्तिरितिवाच्यम्।तादृशैकविधान्वयबोधेतादृशान्यविधान्वयबोधपरत्वेनागृह्यमाणतथाविधाख्यातधर्मिकप्रकृतान्वय
बोधपरत्वज्ञानस्यहेतुतया॥ शाब्दबोधेतण्डुलविशेष्यकशाब्दसामग्र्याःएवंतण्डुलविशेष्यकशाब्दबोधेचैत्रविशेष्यकशाब्दसामग्र्याः

प्रतिबंधकत्वादितिभावः।पूर्वपक्षीसमाधत्ते।तादृशैकविधान्वयबोधेइति।प्रथमान्ततण्डुलपदसमभिव्याहृतपश्यतेइत्याख्यातजन्यतण्डुल
विशेष्यकसंख्याप्रकारकान्वयबोधे।तादृशान्यविधान्वयबोधपरत्वेन।प्रथमान्तचैत्रपदसमभिव्याहृतपश्यतेइत्याख्यातजन्यचैत्रविशेष्यक
संख्याप्रकारकान्वयबोधपरमिदमाख्यातंचैत्रःपश्यतेतंडुलइत्येतद्वाक्यघटकंपश्यतेइत्याख्यातपदंतादृशान्यविधान्वयबोधपरत्वेनागृ
ह्यमाणमेव।तथा विधमाख्यातम्।पश्यतेइत्याख्यातं॥तादृशाख्यातधर्मिकमेवचैत्रविशेष्यकसंख्याप्रकारकान्वयबोधपरत्वज्ञानं

प्रकृतान्वयबोधपरत्वज्ञानंतस्यतादृशैकविधान्वयबोधेहेतुत्वंनास्तिअपितुतादृशैकविधान्वयबोधेतण्डुलःपश्यतेचैत्रेणेत्यत्रतण्डुलविशेष्य
काख्यातार्थसंख्याप्रकारकान्वयबोधेतादृशचैत्रविशेष्यकाख्यातार्थसंख्याप्रकारकःअन्यविधतण्डुलान्यचैत्रविशेष्यकोबोधस्तत्परत्वेनगृ
ह्यमाणंतण्डुलंपश्यतेचैत्रइतिकर्त्राख्यातंअगृह्यमाणंपुनस्तण्डुलःपश्यतेचैत्रेणेतिकर्माख्यातंतथाविधमाख्यातंतन्नहिकिंतत्प्रकृतान्वय
बोधपरत्वज्ञानंतण्डुलःपश्यतेचैत्रेणेतिकर्माख्यातंतण्डुलविशेष्यकसंख्याप्रकारकान्वयबोधपरमितिज्ञानम्प्रकृतान्वयबोधपरत्वज्ञानंत
स्यज्ञानस्यतादृशैकविधान्वयबोधेतण्डुलविशेष्यकसंख्याप्रकारकान्वयबोधेहेतुतया॥चैत्रःपश्यतेतण्डुलइत्यादिवाक्यात्‌।तण्डुलचैत्रो
भयविशेष्यकतादृशद्विविधान्वयबोधवारणस्यशक्यत्वात्‌।चैत्रःपश्यतेतण्डुलइत्यत्रएकमेवपश्यतइत्याख्यातंचैत्रविशेष्यकसंख्याप्र

चैत्रःपश्यतेतण्डुलइत्यादिवाक्यात्तादृशद्विविधान्वयबोधवारणस्यदर्शितवाक्यात्तदुपपादनस्यशक्यत्वात्‌॥

कारकान्वयबोधपरत्वेनगृह्यमाणमिति।तादृशैकविधान्वयबोधपरत्वेनगृह्यमाणंभवति।अथचचैत्रान्यतण्डुलविशेष्यकसंख्याप्रकारकान्व
यबोधपरत्वेनगृह्यमाणमितितादृशान्यविधान्वयबोधपरत्वेनापिगृह्यमाणंनभवतिइत्यत्रगृह्यमाणतथाविधाख्यातधर्मिकप्रकृतान्वयबोध
परत्वज्ञानरूपहेत्वभावात्‌।चैत्रःपश्यतेतण्डुलइतिनभवतिचतण्डुलःपश्यतेचैत्रेणेतितंडुलंपचतिचैत्रइतिसमूहालंबनजन्यशाब्दधीत
ण्डुलःपश्यतेकर्माख्यातंतण्डुलविशेष्यकसंख्याप्रकारकान्वयबोधपरत्वेनगृह्यमाणंतत्कर्माख्यातचैत्रविशेष्यकसंख्याप्रकारकान्वयबो राम
धपरत्वेनगृह्यमाणंनभवतिकिंतुतण्डुलंपचतिचैत्रइतिकर्त्राख्यातमेवतण्डुलान्यचैत्रविशेष्यकसंख्याप्रकारकान्वयबोध॥ ६ ॥ १०९

परत्वेनगृह्यमाणमितिकारणाभावाच्चैत्रःपच्यतेतण्डुलमितिनभवतिभवतिचतण्डुलःपच्यतेचैत्रेणतण्डुलंपचतीतिचैत्रकारणत्वात्। दर्शितवाक्यात्। तण्डुलःपच्यतेचैत्रेणतण्डुलंपचतिचैत्रइतिवाक्यात्।तदुपपादनस्य। तंडुलविशेष्यकचैत्रविशेष्यकबोधोपपादनस्यचशक्यत्वादित्यर्थः।शंकते। नचनिरुक्तसंख्यानभिधानस्यतृतीयाद्वितीयानियामकत्वेइति। चैत्रविशेष्यकसंख्याप्रकारकबोधजनकतावच्छेदकविषयित्वानिरूपकाख्यातसमभिव्याहाररूपस्यसंख्यानभिधानस्यतृतीयाद्वितीयानियामकत्वेचैत्रेणस्वंदृश्यतइत्यत्रस्वपदार्थश्चैत्ररूपकर्तातद्विशेष्यकसंख्याप्रकारकबोधजनकतावच्छेदकविषयित्वनिरूपकदृश्यतइत्याख्यातसमभिव्याहारस्यचैत्रपदेसत्वेनतृतीयानुपपत्तिः

नचनिरुक्तसंख्यानभिधानस्यतृतीयाद्वितीयानियामकत्वेचैत्रेणस्वंदृश्यतेचैत्रःस्वंपश्यतीत्यादौतृतीयाद्वितीययोरनुपपत्तिः
।कर्त्रादिविशेष्यकसंख्याप्रकारकान्वयबोधोपयिकाकांक्षाज्ञानीयविषयत्वनिरूपकत्वस्यतत्राख्यातेसत्वादितिवाच्यम्॥

एवंचैत्रःस्वंपश्यतीत्यत्रस्वपदार्थचैत्रादिविशेष्यकसंख्याप्रकारकबोधजनकतावच्छेदकविषयित्वनिरूपकपश्यतीत्याख्यातसमभिव्याहारस्यकर्मवाचकस्वपदेसत्वेनद्वितीयानुपपत्तिरित्यर्थः। कर्त्रादिविशेष्यकेति। चैत्रेणस्वंदृश्यतेऽत्रकर्त्रादिविशेष्यकसंख्यान्वयबोधोपयिकाकांक्षास्वपदोत्तरदृशधातूत्तरतेप्रत्ययादिसमभिव्याहाररूपाचैत्रपदनिष्ठातज्ज्ञानीयंतज्ज्ञाननिष्ठंयत्विषयित्वंतन्निरूपकत्वस्यतत्राख्यातेचैत्रेणस्वंदृश्यतइत्याख्यातेसत्वात्।एवंचतादृशविषयित्वानिरूपकाख्यातसमभिव्याहृतत्वरूपानभिधानस्यचैत्रपदेसत्वेनतृतीयानुपपत्तिरित्यर्थः।एवंचैत्रःस्वंपश्यतीत्यत्रस्वपदार्थचैत्रविशेष्यकसंख्यान्वयबुद्धिजनकचैत्रपदसमभिव्याहृतपश्यतीत्याख्यात॥ ६ ॥ ॥

समभिव्याहारस्तानंतन्निष्ठविषयित्वनिरूपकमेवपश्यतीत्याख्यातमितिताद्दशविषयित्वनिरूपकाख्यातसमभिव्याहाररूपस्यानभिधानस्यस्वम

मु.टी. ११० दे असत्वात् चैत्रः स्वंपश्यतीत्यत्र द्वितीयानुपपत्तिः॥ समाधत्ते। कर्त्रादिपरेति। चैत्रेण स्वं दृश्यत इत्यत्र कर्त्रादिपरं यत् पदं चैत्रपदं दृश्यत इत्याख्या

तपदं च तयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयित्वानिरूपक इतितत्सदोत्तरं चैत्रपदोत्तरं तृतीयारूपविभक्तिरितिकर्त्री

दिपदस्वपदाख्यातपदयोः समभिव्याहारसंख्याप्रकारकस्वविशेष्यकबुद्धित्वावच्छिन्नप्रयोजकं यत् विषयित्वं तन्निरूपकस्तत्सदोत्तरं स्वप

दोत्तरं तृतीयाविभक्तिर्न भवति किंतु स्वपदोत्तरं प्रथमैव भवतीत्येतदुपपादयति। प्रथमस्थले इति। चैत्रेण स्वं दृश्यत इत्यत्र चैत्रपदं स्वपदं तस्य

कर्त्रादिपरयत्सदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयित्वानिरूपकस्तत्सदोत्तरं तृती

याविभक्तिरित्येवं नियमोपगमेन प्रथमस्थले चैत्रपरस्वपदाख्यातपदयोर्द्वितीये च तत्सदचैत्राख्यातपदयोः समभिव्याहारस्यैव

तद्विशेष्यकसंख्यान्वयबोधप्रयोजकतया क्रमेण चैत्रपदस्वपदाभ्यां तृतीयाद्वितीययोरनुपपत्त्यनवकाशादिति चेन्न।

दृश्यत इत्याख्यातपदं तस्य च परस्परसमभिव्याहारः न स एव तद्विशेष्यकस्वविशेष्यकसंख्यान्वयबोधप्रयोजकतया चैत्रपदात्तृतीया

नुपपत्त्यनवकाशात् चैत्रेण स्वं दृश्यत इत्यत्र चैत्रपदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयित्वानि

रूपक एवेति चैत्रपदात्तृतीयोपपत्तिरित्यर्थः। द्वितीये च चैत्रः स्वं पश्यतीत्यत्र च तत्सदं स्वपदं यत् चैत्रपदं पश्यतीत्याख्यातपदं तयोः स्व मु.टी. ११०

परचैत्रपदाख्यातपदयोः समभिव्याहारस्यैव चैत्रविशेष्यकसंख्याप्रकारकान्वयबोधप्रयोजकतया स्वपदाद्द्वितीयानुपपत्त्यनवकाशादि

अथेत्यारभ्य तृतीयाद्वितीययोरनुपपत्त्यनवकाशादीत्यन्तः पूर्वपक्षग्रन्थः। तत्र समाधानं वक्तुमारभदीमारचयति। अनभिहिते इत्यधिकारे कर्तृकर
णयोस्तृतीयायनुशासनस्य किं फलमिति वक्तव्यं। चैत्रः पचति तण्डुलः पच्यते चैत्रतण्डुलपदाभ्यां तृतीयाद्वितीययोरप्रयोगः। अप्रयोगः प्रयो
जनमिति चेत्तर्हि। किं प्रश्ने आक्षेपे वा। मणिमंत्रादिन्यायेन ताद्दशानुशासनस्य। कर्तृकरणयोस्तृतीयेत्यनुशासनस्य। तथाविधप्रयोगविरोधिता।
तृतीयाद्वितीययोः प्रयोगविरोधिता। यथा प्रतिबन्धकमणेर्दाहाभावः फलं इत्युक्ते दाहं प्रति मणिः प्रतिबंधक इत्यर्थो लभ्यते तथानुशासनस्य तृ
तीयाद्वितीयाप्रयोगाभावः प्रयोजनमित्युक्तेऽनुशासनं तृतीयाद्वितीयाप्रयोगे प्रतिबंधकमित्यर्थः प्रतीयते स च न संभवति स्वरूपतोऽनुशासन

अनभिहिते इत्यधिकारे कर्तृकरणयोस्तृतीयेत्याद्यनुशासनस्य किं प्रयोजनमिति वक्तव्यम् चैत्रः पचति तण्डुलः पच्य
ते इत्यादौ चैत्रतण्डुलपदाभ्यां द्वितीयातृतीययोरप्रयोग इति चेत्। तत्किं मणिमंत्रादिन्यायेन ताद्दशानुशासनस्य तथाविध
प्रयोगविरोधिता येन तदभावस्तत्प्रयुक्तः स्यात्। न चैवं संभवति। पचति पच्यते इत्यादिक्रियायोगे कर्तृकर्मवाचकपदानंतर
तृतीयाद्वितीययोरसाधुत्वस्य॥ सत्वेपि चैत्रेण तण्डुलमिति तृतीयाद्वितीयाप्रयोगसंभवेन प्रतिबन्धकतायां व्यभिचारात्। येन। विरोधित्वे
ना तदभावः। तृतीयाद्वितीयाप्रयोगाभावः। तत्प्रयुक्तः। अनुशासनप्रयुक्तः स्यात्। न चैवं संभवति। न ह्येवं विरोधित्वं संभवति। अनुशासनसत्वे
पि तृतीयाद्वितीयाप्रयोगसंभवात्। अनुशासनस्य इदं फलं न संभवतीति व्यर्थमनुशासनमिति भावः अनुशासनस्य प्रयोजनान्तरमाशंक्य ख
ण्डयति। पचति पच्यते इत्यादिक्रियायोगे कर्तृकर्मवाचकपदानन्तरं तृतीयाद्वितीययोरसाधुत्वस्य प्रतिपत्तिः प्रयोजनं तस्यानुशासनस्येति चेत्।

असाधुत्वपदार्थविवरणोनि। तत्कर्तृत्वतत्कर्मत्वादिति। पचतीत्यत्र पाककर्तृत्वबोधोपयिकाकांक्षा प्रथमायामेवास्ति तृतीयायान्तु पाककर्तृत्वादि
बोधोपयिकाकांक्षारहितत्वमस्तीति न देवासाधुत्वम्। चैत्रः पचतीति प्रयोगादिति भावः। एवं पच्यत इत्यत्र पाककर्मत्वबोधोपयिकाकांक्षा प्रथमायामे
वास्ति चैत्रेण तण्डुलः पच्यत इति प्रयोगात् द्वितीयायान्तु पाककर्मत्वबोधोपयिकाकांक्षाराहित्यरूपमसाधुत्वमस्ति तंडुलं पच्यत इत्यप्रयोगात्
इति चेत्तर्हि उक्तनियमपरतयापि न तत्सल्लाभ इति। कर्तृकरणयोस्तृतीयेत्यनुशासनस्य उक्तनियमपरतयापि कर्त्रादिपरयत्सद्गण्यन्त

तत्कर्तृत्वतत्कर्मत्वादिबोधोपयिकाकांक्षादिरहितत्वादिरूपस्य प्रतिपत्तिः प्रयोजनं तस्येति चेत्तर्हि उक्तनियमपरतयापि
न तत्सल्लाभः॥ प्रथमान्तचैत्रतण्डुलपदतत्तदाख्यातपदयोः समभिव्याहरस्यैव चैत्रतण्डुलादिविशेष्यकतत्तदाख्या
तार्थसंख्यान्वयबोधप्रयोजकतया चैत्रेण पचति तण्डुलं पच्यत इत्यादिवाक्यघटकचैत्रतण्डुलादिपदतदाख्यातपदयोः
समभिव्याहारस्यातथात्वेन तद्घटकतृतीयाद्वितीययोः साधुत्वस्योक्तनियमाव्यवच्छेद्यत्वात्॥ ६ ॥ ६ ॥

पदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयित्वानिरूपकस्तत्पदोत्तरं तृतीयादिविभक्तिरित्युक्तनियमपरतयापि न ततः
कर्तृकरणयोरिति सूत्रात् तल्लाभः। पचति पच्यत इत्यत्र कर्तृकरणयोस्तृतीयाद्वितीययोरसाधुत्वलाभ इत्यर्थः। तृतीयाद्वितीययोरसाधुत्वलाभाभावं
उपपादयति। प्रथमान्तेत्यादिना। प्रथमान्तं चैत्रपदं प्रथमांतं तण्डुलादिपदं। चैत्रः पचति तण्डुलः पच्यत इति। तत्तदाख्या—तपदेतयोः
परस्परसमभिव्याहारस्यैव। चैत्रविशेष्यकतंडुलविशेष्यकपचतिपच्यत इति तत्तदाख्यातार्थकत्वप्रकारकान्वयबोधप्रयोजकतया॥

चैत्रेण पचति तंडुलं पच्यते इत्यादिवाक्यघटकचैत्रतण्डुलादिपदतिवादिपदयोः समभिव्याहारस्य अनथात्वेन। चैत्रतंडुलविशेष्यकतत्तदाख्यातार्थ
संख्याप्रकारकान्वयबोधप्रयोजकत्वेन चैत्रेण पचति तण्डुलं पच्यते इत्येतद्वाक्यघटकतृतीयाद्वितीययोः साधुत्वस्य उक्तनियमाव्यवच्छेद्यत्वात्।
कर्त्रादिपरयस्तदाख्यातपदयोः समभिव्याहारः संख्यान्वयबुद्धित्वावच्छिन्नप्रयोजकविषयितानिरूपकस्तत्सदोत्तरं तृतीयादिविभक्तिरितिनि
यमवाक्यात् पचतीत्यत्र कर्त्तरि तृतीयानसाध्वीतण्डुलं पच्यते इत्यत्र कर्मणि द्वितीयानसाध्वीत्यर्थो न प्रतीयते इति भावः। दूषणमुपसंहरति। त
स्मादिति। तस्मात् आख्यातेन कर्त्तृकर्मगतसंख्यानभिधानस्य तृतीयाद्वितीयानियामकत्वासंभवात्। मुख्यभाक्तसाधारणकर्त्तृत्वकर्मत्वयोः क॰

तस्मान्मुख्यभाक्तसाधारणकर्त्तृत्वकर्मत्वयोः कर्त्तृकर्मवाचकपदसमभिव्याहृतलकृत्तद्धितसमासैरनभिधानमेव तृतीया
द्वितीयादिनियामकं शिरोमणिभिस्तत्रैव निर्भरो विहितः लादीनां तदनभिधायकत्वं च न तद्वाचकत्वं तन्निष्ठवृत्त्यनिरूपकत्वं वा

र्तृकर्मवाचकपदसमभिव्याहृतलकृत्तद्धितसमासैरनभिधानमेव तृतीयायानियामकं न तु कर्त्तृकर्मसंख्यानभिधानमित्यर्थः। चैत्रः पचतीत्यत्र
मुख्यं कर्त्तृत्वं। जानातीत्यत्र गौणं कर्त्तृत्वम्। पच्यते तंडुल इत्यत्र मुख्यं कर्मत्वम्। ज्ञायते घट इत्यादौ गौणं कर्मत्वं बोध्यम्। शिरोमणिभिस्तत्रैव नि
र्भरो विहितः। इति लादीनां कर्त्तृत्वकर्मत्वयोरनभिधानमेव तृतीयाद्वितीयानियामकमित्यत्रैव निर्भरो मुख्यतात्पर्यस्थापित इत्यर्थः। अत्रैवेत्येव
कारेण संख्यानभिधानस्य तृतीयाद्वितीयानियामकत्वव्यवच्छेदः कृतः। लादीनां तदनभिधायकत्वञ्च। कर्त्तृत्वकर्मत्वानभिधायकत्वञ्च।
न तद्वाचकत्वं। न कर्त्तृकर्मत्वावाचकत्वम्। तन्निष्ठवृत्त्यनिरूपकत्वं वा। कर्त्तृत्वकर्मत्वनिष्ठशक्तिलक्षणान्यतररूपवृत्त्यनियामकत्वं वा ॥

मु॰टी॰ आख्यातसामान्यस्यापि आख्यातत्वेन रूपेण आख्यातत्वस्याननुगतत्वादाह। तत्त्वादिना वा। कर्त्तृत्वादिनिष्ठशक्तिलक्षणानिरूपकत्वात् कर्त्तृत्वा
११२ नभिधायकाख्यातस्यैवाप्रसिद्धेः। लादीनां कर्त्तृत्वकर्मत्वावाचकरूपकर्त्तृत्वकर्मत्वावाचकानभिधायकत्वं न संभवतीत्यर्थः। तच्छाब्दबोधौ
पयिकाकांक्षाशून्यत्वमेव तदिति। कर्त्तृत्वादिविषयकशाब्दबोधौपयिकाकांक्षा पचतिपचतेइत्यत्राख्यातेऽस्ति तच्छून्यत्वं चैत्रेणप
च्यतेइत्याख्यातेऽस्ति न देवतत्कर्त्तृत्वकर्मत्वानभिधायकत्वं चैत्रेणपच्यतेइत्याख्यातेन तदेव तृतीयाद्वितीयानियामकमित्यर्थः। तच्छाब्दबो
धौपयिकाकांक्षाशून्यत्वमेव तदिदन्त्वं इत्यपिनेत्यनेनान्वितम्। चैत्रेणपच्यतेतण्डुलइत्यादावाख्यातस्य कर्त्तृत्वादिवाचकत्वेपीति। आख्यात

आख्यातत्वेन तत्त्वादिना वा कर्त्तृत्वादिनिष्ठशक्तिलक्षणानिरूपकत्वात् कर्त्तृत्वानभिधायकाख्यातस्यैवाप्रसिद्धेः। त॰
च्छाब्दबोधौपयिकाकांक्षाशून्यत्वमेव तत्। चैत्रेणपच्यतेतण्डुल इत्यादावाख्यातस्य कर्त्तृत्वादिवाचकत्वेपि तच्छाब्दबो
धौपयिकाकांक्षाराहित्यं तत्रास्त्येव। चैत्रादिपदोत्तरतृतीययैव कर्त्तृत्वबोधनसंभवात्। तत्र तादृशाकांक्षाया अकल्प॰
नात इत्यपि न॥ त्वेनाख्यातस्य कर्त्तृत्वादिवाचकत्वे कर्त्तृत्वादिवाचकत्वरूपकर्त्तृत्वाद्यनभिधायकत्वाभावः सूचितः। न यापि। तच्छा
ब्दबोधप्रयोजकाकांक्षाराहित्यमेव कर्त्तृत्वाद्यनभिधायकत्वं। कर्त्तृत्वादिविषयकशाब्दप्रयोजिकाकांक्षा पचतिपचतेइत्यत्रतेप्रत्ययादौ वर्त्त
ते तच्छून्यत्वं चैत्रेणपच्यतेइत्याख्याते चैत्रविशेष्यकाख्यातार्थप्रकारकबोधानुदयात्। तत्रास्त्येव। चैत्रेणपच्यतेइत्याख्यातेऽस्त्येव॥ टि॰प
तयाच तच्छाब्दप्रयोजकाकांक्षाराहित्यरूपकर्त्तृत्वाद्यनभिधानसत्वात्तृतीयोपपत्तिरित्यर्थः। चैत्रपदोत्तरतृतीयया कर्त्तृत्वादिविषयकबोधसं ११२

तत्र।चैत्रेणपच्यतेतण्डुलइत्याख्याते।तादृशाकांक्षायाःकर्तृत्वशाब्दबोधजनकाकांक्षायाअकल्पनात्तृतीययैवकर्तृत्वविषयकशा
ब्दबोधनिर्वाहेपच्यतेइत्याख्यातस्यकारणतानकल्प्यतेइतिभावः।चैत्रेणपक्ष्यतेइत्यादौतृतीयानुपपत्तेरिति।कर्तृत्वादिविषयकशाब्द
बोधप्रयोजिकाकांक्षैवचैत्रेणपक्ष्यतेइतिकर्माख्यातेप्यस्तिउक्ताकांक्षाराहित्यरूपकर्तृत्वाद्यनभिधायकत्वंतृतीयानियामकंनास्तीतितृती
यानुपपत्तेरित्यर्थः।पक्ष्यतेचैत्रइत्यादितःचैत्रादौपाककृतेः।एवंचैत्रइत्यादिरहितात्केवलात्पक्ष्यतेइत्यादितश्चमुख्यविशेष्यतयातस्याः
कृतेर्बोधात्तादृशाख्यातधात्वोःकर्मण्यपिकर्तरिचतुल्यतयापक्ष्यतेइत्याख्यातधात्वोरानुपूर्वीविशेषरूपाकांक्षायाकर्तरीवकर्मण्यपिप्रत्ययेकृ

चैत्रेणपक्ष्यतेइत्यादौतृतीयानुपपत्तेः।पक्ष्यतेचैत्रइत्यादितश्चैत्रादौपाककृतेःकेवलात्पक्ष्यतइत्यादितश्चमुख्यवि
शेष्यतयातस्याबोधात्तादृशाख्यातधात्वोरानुपूर्वीविशेषाकांक्षायाःकृतिबोधौपयिकत्वात्।नचसमभिव्याहाररूपाकांक्षै
वविवक्षणीया।प्रकृतेप्रकृतिप्रत्यययोरानुपूर्वीरूपाकांक्षानतुसमभिव्याहारइतिनोक्तानुपपत्तिरितिवाच्यम्॥

।तिबोधौपयि
कत्वात्कर्तृत्वप्रकारकशाब्दप्रयोजकाकांक्षैवास्तीत्युक्ताकांक्षाराहित्यरूपकर्तृत्वानभिधानस्यतृतीयाप्रयोजकस्याभावात्तृतीयानुपपत्तिरि
त्यर्थः।शंकते॥नचेति॥चैत्रःपक्ष्यतेइतिप्रथमान्तचैत्रपदसमभिव्याहारादेवकृतिबोधइतिप्रथमान्तचैत्रपदसमभिव्याहारएवपक्ष्यतेइ
त्यत्रविवक्षितः।समभिव्याहाररूपाकांक्षैवकर्तृत्वविषयकशाब्दबोधप्रयोजिकाकांक्षात्रविवक्षिता।तादृशाकांक्षाराहित्यंचैत्रेणपक्ष्यते
इत्याख्यातेस्तीतितृतीयोपपद्यतेइतिभावः।प्रकृते।चैत्रेणपक्ष्यतेतण्डुलइत्यत्र।प्रकृत्यव्यवहितोत्तरत्वरूपानुपूर्वीरूपाकांक्षातेप्रत्ययेस्तिसा

वस्तिनाइतितादृशाकांक्षाराहित्यरूपतृतीयाप्रयोजकाभावेपिप्रथमान्तचैत्रपदसमभिव्याहाररूपाकांक्षाराहित्यरूपतृतीयाप्रयोजकस्यसत्वात्
।चैत्रेणपक्ष्यतेतण्डुलइत्यत्रतृतीयोपपद्यतेइतिभावः।चैत्रेणेतितृतीयान्तपदसमभिव्याहारस्थलेकर्तृत्वप्रकारकशाब्दानुदयात् तृतीयान्तप
दसमभिव्याहाररूपाकांक्षाविवक्षणीयेतिभावः।एवञ्चतृतीयानुपपत्तिरूपोक्तदोषोनास्तीत्यर्थः॥तथासतिचैत्रेणपचतीत्यादावपितृतीयायाःसा
धुतापत्तेरिति।कर्तृत्वप्रकारकबोधेयादृशसमभिव्याहारोजायतेतादृशसमभिव्याहाररूपाकांक्षाविवक्षणीयातादृशसमभिव्याहारश्चप्रथमान्त
चैत्रपदसमभिव्याहारएवनतुतृतीयान्तचैत्रपदसमभिव्याहारः एवञ्चकर्तृत्वप्रकारकशाब्दबोधप्रयोजकप्रथमान्तचैत्रसमभिव्याहारोजा

तथासतिचैत्रेणपचतीत्यादावपितृतीयायाःसाधुतापत्तेःतादृशचैत्रपदाख्यातपदयोःसमभिव्याहारस्यकृतिबोधानौपयिकत्वात्॥

यतेतादृशसमभिव्याहाररूपाकांक्षाविवक्षणीयातादृशसमभिव्याहारश्चप्रथमान्तचैत्रपदसमभिव्याहारएवनतुतृतीयान्तचैत्रपदसमभि
व्याहारः एवञ्चकर्तृत्वप्रकारकशाब्दबोधप्रयोजकप्रथमान्तचैत्रसमभिव्याहाररूपाकांक्षाराहित्यरूपतृतीयाप्रयोजककर्तृत्वानभिधा
नरूपकारणस्यपचतीत्याख्यातेसत्वाच्चैत्रेणपचतीत्यादावपितृतीयायाःसाधुतापत्तेरित्यर्थः॥तादृशेति॥तृतीयान्तचैत्रपदपचतीत्या
ख्यातपदसमभिव्याहारस्यकृतिप्रकारकबोधानौपयिकत्वात्।कृतिबोधोपयिकप्रथमान्तचैत्रपदसमभिव्याहाररूपाकांक्षाराहित्यस
रूपकर्तृत्वानभिधानरूपकारणसत्वाच्चैत्रेणपचतीतितृतीयायाःसाधुतापत्तेरित्यर्थः॥ ६ ॥

चैत्रेण विजेष्यते मैत्र इत्यादौ तृतीयानुपपत्तेश्च विजेष्यते मैत्र इत्यादितः कृतिबोधात्तादृशाख्यातपदमैत्रपदयोः समभिव्याहारस्य कृतिबोधौपयि
कत्वादिति मूलम्। विजेष्यते मैत्र इत्यादौ कर्तृप्रत्ययस्थले कर्तृत्वबोधप्रयोजकप्रथमान्तचैत्रपदविजेष्यत इत्याख्यातपदसमभिव्याहाररूपाकांक्षा
राहित्यमेव चैत्रेण मैत्रो विजेष्यत इति कर्माख्यातपदेस्तीनितादृशाकांक्षाराहित्यरूपकर्तृत्वानभिधानरूपकारणाभावात्तृतीया न स्यादित्यर्थः
।किंत्विति। तत्तात्पर्यशून्यत्वमेव। कर्तृत्वतात्पर्यशून्यत्वमेव कर्तृत्वानभिधायकत्वमाख्याते। तथा च चैत्रेण पश्यत इत्यादावाख्यातस्य कर्तृतात्स

चैत्रेण विजेष्यते मैत्र इत्यादौ तृतीयानुपपत्तेश्च विजेष्यते मैत्र इत्यादितः मैत्रकृतिबोधात्तादृशाख्यातमैत्रपदयोः समभिव्या
हारस्य कृतिबोधौपयिकत्वात्। किंतु तत्तात्पर्यशून्यत्वमेव। तथा च चैत्रेण पश्यत इत्यादावाख्यातस्य कर्तृत्वादितात्पर्य
कत्वे तृतीया असाधुरेव चैत्रेण पचतीत्यादावाख्यातस्यार्थाविवक्षायां तृतीयायाः साधुत्वेपि परस्मैपदस्यासाधुत्वान्न प्रयो
गः। परस्मैपदस्यासाधुत्वं च धात्वर्थविशेष्यस्य प्रसयेनाविवक्षणे भावकर्मणोरिति सूत्रेणात्मनेपदनियमात्॥ यत्र पमासाधुत्व

तीयाया असाधुरेव एवं कर्तृत्वतात्पर्यसत्त्वाच्चैत्रेण पचतीत्यत्र तृतीयाया असाधुत्वेपि कर्तृत्वरूपाख्यातार्थाविवक्षायां तृतीयायाः साधुत्वापादनेपि
चैत्रेण पचतीति प्रयोगाभावः परस्मैपदासाधुत्वादेव समर्थनीयः शेषात्कर्तरि परस्मैपदमित्यनुशासनात्। नित्वङितः स्वरितेत्वनिमित्तहीनाद्धातोः
कर्त्तरि कर्तृत्वविवक्षायां परस्मैपदमिति तदर्थात्कृत्यविवक्षायां परस्मैपदमसाध्विस्यर्थः। परस्मैपदासाधुत्वं च धात्वर्थविशेष्यस्य प्रसयेना
विवक्षणे भावकर्मणोरिति सूत्रेणात्मनेपदनियमनात् इति। भावकर्मणोरात्मनेपदमेव न परस्मैपदमिति नियमः परस्मैपदस्यासाधुत्वे हेतुः। धा

कृतिरूपस्याविवक्षणे आख्याते आख्यातेनाविवक्षणे आख्यातार्थकृतिर्हि कर्त्तरि समवायेन साक्षात्संबंधेनान्वेति कर्मणि तु कृतिजन्यव्यापारजन्यफलवत्व रूपपरंपरासंबंधेनान्वेति। भावनान्विताधेयत्वं सप्तम्यर्थः फलान्विताधेयत्वं द्वितीयार्थः तंडुलं पचनीसत्र तण्डुलवृत्तिविक्लृसनुकूलव्यापारानुकूल कृतिमानिति शाब्दबोधात् यद्वा धात्वर्थं प्रति विशेष्याकृतिराख्यातार्थः तया विवक्षिता तदा परस्मैपदं साधु यदा तु कृतिर्न विवक्षिता तदा भावकर्मणि वात्मनेपदमेव न परस्मैपदमित्यर्थः। अत्रौदनं पक्त्वा भुज्यते इत्यत्र भावे क्त्वाप्रत्ययः स्वकर्तृकत्वस्वोत्तरत्वोभयसंबंधेन पाकक्रियाविशिष्टाया भुजिक्रियातज्जन्यगलाधोदेशसंयोगरूपफलशाली ओदन इति शाब्दबोधः स्वपदद्वयं पाकक्रियापरं पाककर्त्तीकर्त्ता यस्यास्ति त्वं भुजिक्रिया

आख्यातार्थाविवक्षायां न चैत्रेण पचते इत्यादिप्रयोगः। शवादिविकरणस्यासाधुत्वात्। कर्तृत्वतात्पर्यकसार्वधातुक योग एव तत्साधुत्वात्। कर्तृत्वकर्मत्वोभयतात्पर्येण मैत्रः पश्यते तंडुल इत्यादयस्तु न प्रयोगाः॥

((यामस्ति। अत्राख्यातेन स्वकर्तृक त्वसंसर्गघटकतया कर्तृत्वविवक्षायामपि भावे क्त्वाप्रत्ययदर्शनेन धात्वर्थनिरूपितविषयता सामान्यं विहाय विशेष्यस्येति विशेष्यतानिवेशः धा त्वर्थविशेष्यीभूताख्यातार्थकृतेरविवक्षायां चैत्रकर्तृकः पाक इति बोधसंभवाच्चैत्रेण पचते इति भावे चैत्रेण पचते तण्डुल इति कर्मणि च प्रयोग स्तु न भवति शवादिविकरणस्यासाधुत्वात् कर्त्तरि शबित्यनुशासनात् कर्तृके सार्वधातुके परे शविति तदर्थात् कर्तृत्वतात्पर्यकसार्वधातुकयोगे एव तत्साधुत्वात् शपः साधुत्वात् भावकर्मणोर्विहिते आत्मनेपदे परे यगेव साधुर्न तु शविति भावः। कर्तृत्वकर्मत्वोभयतात्पर्येण चैत्रेण पश्यते तण्डुल एम इत्यादयस्तु न प्रयोगाः। अर्थाबोधकं वाक्यं मूकमित्यभियुक्ता न प्रयुञ्जते इति भावः॥ ६ ॥ ७ ॥ ६ ॥ ७ ॥

कर्त्तृत्वतात्पर्यसामान्यतारूपकर्तृत्वानभिधायकत्वस्य कर्तृपदोत्तरतृतीयानियामकस्य कर्मत्वतात्पर्यशून्यत्वरूपकर्मत्वानभिधायत्व
स्य कर्मपदोत्तरद्वितीयानियामकत्वस्य चाभावात् तृतीयाद्वितीययोरप्रसक्त्या कर्तृत्वपरत्वरूपकर्तृत्वाभिधानस्य कर्मत्वपरत्वरूपकर्मत्वा
भिधानस्य च पच्यते इत्याख्याते सत्त्वात् कर्तृकर्मणोः प्रथमाप्रसंग इति भावः। तदेकतरबोधे। कर्त्तृत्वकर्मत्वयोर्मध्ये कर्त्तृत्वबोधे। कर्तृत्वान्य
कर्मत्वपरत्वेन गृह्यमाणमेव चैत्रः पच्यते तण्डुल इत्याख्यातमितरान्यपरत्वेनागृह्यमाणमाख्यातम्। चैत्रः पच्यते तण्डुलमिति द्वितीयासमभिव्या
हृतमाख्यातं॥ तद्धर्मिकं प्रकृतान्वयबोधपरत्वज्ञानं। चैत्रकर्त्तृकपाकबोधपरत्वज्ञानं। तादृशज्ञानत्वेन पाककृतिप्रकारकचैत्रविशेष्यक

तदेकतरबोधेन्यपरत्वेनागृह्यमाणाख्यातधर्मिकप्रकृतान्वयबोधपरत्वज्ञानस्य हेतुत्वात्। चैत्रेण पच्यते तण्डु
ल इत्यादौ कर्तृत्वाद्याख्यातस्य तात्पर्यग्रहे कर्मत्वाद्यन्वयबोधोपि न भवत्येव॥ शाब्दबोधत्वावच्छिन्नं प्रति हेतुत्वाभावादेव त

ण्डुलविशेष्यकफलप्रकारकबोधो न जायते चैत्रः पच्यते तण्डुल इति वाक्यात् एवं चैत्रेण पच्यते तण्डुल इति कर्माख्याते कर्मत्वान्य कर्तृत्वपरत्वेनाऽ
गृह्यमाणकर्माख्यातधर्मिकतण्डुलविशेष्यकविक्लित्तिफलप्रकारकप्रकृतान्वयबोधपरत्वज्ञानत्वेन हेतुत्वात्तादृशहेतोरभावादेव चैत्रः पच्यते त
ण्डुल इत्यत्र चैत्रविशेष्यककृतिप्रकारकबोधो न जायते पच्यते इति लृट्कर्तृरि कर्मणि च भवतीति कर्तृत्वान्यकर्मपरत्वेन गृह्यमाणमेव एवं कर्मत्वा
न्यकर्तृत्वपरत्वेन गृह्यमाणमेवाख्यातमितरान्यपरत्वेन अगृह्यमाणाख्याताऽभावाऽदन्यपरत्वेनागृह्यमाणाख्यातधर्मिकप्रकृतान्वयबोधपर
त्वज्ञानरूपहेतोरभावाच्च चैत्रतंडुलोभयविशेष्यकशाब्दबोधाभाव इति भावः। चैत्रेण पच्यते तंडुल इत्यादौ कर्तृत्वाद्याख्यातस्य तात्पर्यग्रहे

कर्त्तृत्वपरत्वेनागृह्यमाणत्वात्तधर्मिककर्मत्वपरत्वज्ञानरूपकारणाभावात्कर्मत्वबोधोपि न भवत्येवेत्यर्थः। अथैतसारभ्य चेन्नेसन्तग्रन्थेना
शंकते। पक्वानिभुंक्तेचैत्रः इत्यत्र कर्मणिक्तप्रत्ययेन कर्त्तृत्वानभिधानात् चैत्र इत्यत्र तृतीया कथं न स्यात्। एवमोदनः पक्त्वा भुज्यते इत्यादौ भावे
क्त्वाप्रत्ययेन कर्मत्वानभिधानादोदन इत्यत्र द्वितीया कथं न स्यादित्यर्थः। समानकर्त्तृकत्वस्योत्तरत्वोभयसंबन्धेन पाकक्रियाविशिष्टभोजन
कर्मीभूत ओदन इति शाब्दबोधात्। शंकते॥ नचेति। पक्वानिभुंक्तेचैत्र इत्यत्र पक्वानीति क्तेन कर्मत्वे उक्ते ताचैत्र इति कर्त्तृत्वानभिधानेपि भुंक्ते इत्या
ख्यातेन चैत्रनिष्ठकर्त्तृत्वाभिधानान्न तृतीयाप्रयोजकानभिहितत्वमेवमोदनः पक्त्वा भुज्यते इत्यत्र भावे क्त्वाप्रत्ययेन ओदनकर्मत्वानभि

अथ पक्त्वानिभुंक्तेचैत्र ओदनः पक्त्वा भुज्यते इत्यादौ क्त्वाक्रमेण कर्त्तृत्वकर्मत्वानभिधानाच्चैत्रपदौदनपदाद्युनरं
तृतीयाद्वितीये कथन्न स्याताम्। न च कृत्तानभिधानेपि आख्यातेन तदभिधानान्नानभिहितत्वं स्वसमभिव्याहृतपदाभि
हितत्वसामान्याभावस्यैवानभिहितपदेन विवक्षणात्। समभिव्याहृतेतिकरणाच्च चैत्रेण गम्यते ग्रामस्तं मैत्रो गच्छतीत्यादौ न तृ
तीयाद्वितीययोरनुपपत्तिः॥ धानेपि भुज्यते इत्याख्यातेनौदनकर्मत्वाभिधानान्न द्वितीयाप्रयोजकानभिहितत्वमोदननिष्ठकर्मत्वस्येत्यर्थः

तत्र हेतुमाह। समभिव्याहृतत्वपदाभिहितत्वसामान्याभावस्यैवानभिहितपदेन विवक्षणादिति। प्रथमान्तचैत्रपदसमभिव्याहृतभुंक्ते इत्याख्यातप
दाभिहितत्वमेव चैत्र इति कर्त्तृत्वस्येति न चैत्रपदात्तृतीया एवमोदनः पक्त्वा भुज्यते इत्यत्रौदनपदसमभिव्याहृतभुज्यते इत्याख्याताभिहितत्वमेवौ
दनकर्मत्वस्येति न द्वितीयाप्रयोजकमनभिहितत्वमित्यर्थः। समभिव्याहृतेतिकरणाच्चैत्रेण गम्यते ग्रामस्तं मैत्रो गच्छतीत्यादौ न तृतीयाद्वितीययोरनु

चैत्रनिष्ठकर्तृत्वे गच्छतीत्याख्यातपदाभिहितत्वसत्त्वात् चैत्रेणेति तृतीया न स्यादतः समभिव्याहृतेति। तथा गच्छतीत्याख्यातं भिन्नवाक्यस्थमिति चैत्रपदं समभिव्याहाररूपाकांक्षारहितमिति चैत्रेणेति समभिव्याहृतं गम्यते इत्यात्मनेपदं तदभिधेयत्वं स्यात्तं प्रति कर्मत्वे तदभिधेयत्वसामान्याभावरूपमभिधेयत्वं चैत्रनिष्ठकर्तृत्वे इति तृतीयोपपत्तिरेव गम्यते इत्याख्यातपदाभिधेयत्वन्तमिति तच्छब्दबोध्यकर्मत्वे इति तमिति द्वितीया न स्यात् समभिव्याहृतेति विशेषणात्तु भिन्नवाक्यस्थं गम्यते इत्याख्यातपदमिति द्वितीयान्तपदसमभिव्याहृतं न भवतीति तमिति द्वितीयान्तपदसमभिव्याहृतमेकवाक्यस्थं गच्छतीत्याख्यातं तदभिधेयत्वं मैत्रवृत्तिकर्तृत्वे तदभिधेयत्वसामान्याभावरूपमनभिहितं॥

गच्छति गम्यत इत्याख्यातस्य तत्पदाद्यसमभिव्याहृतत्वादिति वाच्यम्। तथा सति भुंजानेन चैत्रेण पच्यते भोक्तव्यमोदनं पचतीत्यादौ तृतीयाद्वितीययोरनुपपत्तिः कृता कर्तृत्वकर्मत्वयोरभिधानात्॥ ॥ तत्वन्तमिति कर्मत्वे इति द्वितीयापत्तिरित्यर्थः। गच्छति गम्यते इत्यादावाख्यातस्य तत्पदाद्यसमभिव्याहृतत्वादिति। गच्छतीति भिन्नवाक्य एवाख्यातस्य चैत्रेणेति तृतीयान्तपदासमभिव्याहृतत्वादेव गम्यते इति भिन्नवाक्य एवाख्यातस्य तमिति द्वितीयान्तकर्मवाचकपदासमभिव्याहृतत्वादित्यर्थः। अथेति पूर्वपक्षी समाधत्ते। तथा सतीति। समभिव्याहृतपदाभिधेयत्वसामान्याभावस्य तृतीयाद्वितीयानियतांगीकारे सतीत्यर्थः। भुंजानेन चैत्रेण पच्यते भोक्तव्यमोदनं पचतीत्यादौ तृतीयाद्वितीययोरनुपपत्तिः कृता कर्तृत्वकर्मत्वयोरभिधानादिति मूलं। भुंजानेनेति कर्तृशानचा चैत्रवृत्ति कर्तृत्वाभिधानादेव भोक्तव्यमिति कर्मणि तव्येन ओदनवृत्ति कर्मत्वाभिधानात्तृतीयाद्वितीये न स्यातामिति समभिव्याहृतपदाभिहितत्वसामान्याभावरूपमनभिहि

सु॰टी॰ शंकते। कृत्वा इत्यारभ्य चेदित्यंतेन। कृत्वा कर्तृ शानचा तत्र भुंजानेनेति वाक्ये चैत्रवृत्तिभोजनकर्तृत्वाभिधानेपीत्यनेन चैत्रेणेति तृतीयाया अप्रा
११६ प्तावपि एवं कृत्वा कर्मणि तव्यता भोजनकर्मत्वाभिधानेपीत्यनेनौदनमिति द्वितीयाया अप्राप्तावपि। शंकामध्ये समाधत्ते। पाककर्तृत्वं पाककर्म
त्वमनभिहितमिति चैत्रेणेति तृतीया ओदनमिति द्वितीया चोपपन्ना तथा च स्वसमभिव्याहृतपदाभिहितत्वसामान्याभाववद्यत्किंचित्क
र्तृत्वे एव तृतीयेति शंकाशयः। चैत्रेण पच्यते ओदन इत्यत्र स्वं चैत्रेणेति तृतीयान्तं तत्समभिव्याहृतं पच्यते इत्याख्यातपदं तदभिहितत्व
मोदनवृत्तिकर्मत्वे तत्सामान्याभाववति पाकादिरूपयत्किंचित्क्रियानिरूपितकर्तृत्वे एव तृतीयेत्यर्थः। एवं स्वं द्वितीयांतमोदनपदं तत्सम

कृता तत्र भोजनकर्तृत्वकर्मत्वयोरभिधानेपि पाककर्तृत्वं तत्कर्मत्वं चानभिहितमिति चेत्तर्हि प्रकृतेपि तदनभिहित
मेव। न च प्रधानक्रियानिरूपितकर्तृत्वाद्यनभिधाने तृतीयादेः साधुतेति॥ भिव्याहृतपचति इति पदाभिहितत्वसामान्याभावव

साककर्मत्वे एव द्वितीयेत्यर्थः। अथेति पूर्वपक्षी समाधत्ते। तर्हि प्रकृतेपि तदनभिहितमेवेति। पक्वानि भुंक्ते चैत्र इत्यत्राख्यातेन भोजनकर्तृत्वा
भिधानेपि पाककर्तृत्वमनभिहितमेव। तथा ओदनः पक्वा भुज्यते इत्यत्राख्यातेन भोजनकर्मत्वाभिधानेपि पाककर्मत्वमनभिहितमेवेत्यर्थः।
स्वसमभिव्याहृतपदाभिहितत्वसामान्याभाववत्प्रधानक्रियाकर्तृत्वे एव तृतीयेत्याशयेन शंकते। न चेति। भुंजानेन चैत्रेण पच्यते ओदन इत्य
त्र स्वं चैत्रपदं तृतीयान्तं तत्समभिव्याहृतं पच्यते इत्याख्यातपदं तदभिहितत्वमोदननिष्ठकर्मत्वे तदभिहितत्वसामान्याभावश्च चैत्रवृत्ति राम
प्रधानपाकक्रियानिरूपितकर्तृत्वे इति चैत्रेणेति तृतीयेत्यर्थः॥ १॥ न च प्रधानक्रियानिरूपितकर्तृत्वाद्यनभिधाने तृतीयादेः साधुतेति ११६

पक्त्वानिभुंक्ते चैत्र इत्यत्र गौणपाकक्रियानिरूपितओदनकर्मत्वाभिधानेपि प्रधानीभूतभोजनक्रियानिरूपितकर्तृत्वाभिधानाद्द्वितीयोपपत्तिर्न भवत्येव मो
दनः पक्त्वा भुज्यते इत्यादौ क्त्वाप्रत्ययेन ओदनकर्मत्वानभिधानेपि प्रधानीभूतभोजनक्रियानिरूपितकर्मत्वाभिधानान्द्वितीयापत्तिर्न किंतु प्रथमैवेत्य
र्थः। एवं भुंजानेन चैत्रेण पच्यते ओदन इत्यत्र भुंजानेनेति शानचा चैत्रनिष्ठकर्तृत्वाभिधानेपि प्रधानीभूतपाकक्रियानिरूपितकर्तृत्वानभिधानात् चैत्रेणे
ति तृतीयोपपत्तिरेवं भोक्तव्यमोदनं पचतीत्यादौ तव्यता भोजनकर्मत्वाभिधानेपि पचतीति प्रधानक्रियया कर्मत्वानभिधानादोदनमिति द्वितीयानुप
पत्तिर्नास्तीत्यर्थः। तदुक्तमिति। प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक्। शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते इति वाक्यपदीमर्थतोनुवदति।
प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत्प्रकाशते इति। भोक्तव्यमोदनं पचतीत्यत्रोदने गौणभोजनक्रियानिरूपितकर्मत्वमेकं प्रधानपाकक्रियानिरू

तदुक्तं। प्रधानशक्त्यभिधाने गुणशक्तिरभिहितवत्प्रकाशते इति शक्तिः कर्तृत्वादिति वाच्यम्॥ ७ ॥

पितकर्मत्वं द्वितीयं। तत्र प्रधानकर्मण्यनभिहिते गुणकर्माप्यनभिहितवद्भवति तदुक्तं हरिणा। उक्तमेवोक्ततां याति क्वचिदुक्तमनुक्तताम्। अनुक्तमपि नोक्तं
स्यात्क्वचिदेव पदान्तरैरिति भुंजानश्चैत्रः पचतीत्यत्र कृदाख्याताभ्यां कर्तृत्वोक्तेराद्यम्। भोक्तव्यमोदनं पचतीत्यत्र कृतोक्तमप्याख्यातेनानुक्तमिति द्वि
तीयं। तिङ्कृज्ज्ञानानीत्यत्र कृदाख्याताभ्यामिति याभुक्ते स्तृतीयं। तथा भोक्तव्यमोदनं पचति चैत्र इत्यत्र प्रधानपाकक्रियानिरूपितं चैत्रवृत्तिकर्तृत्व
माख्यातोक्तमिति प्रधानशक्त्यभिधान शक्त्यभिधाने भोक्तव्यमिति कर्मकृतानभिहितमपि चैत्रनिष्ठकर्तृत्वं गौणभुजिक्रियानिरूपितमभिहि
तवत्प्रकाशते इति भोक्तव्यमोदनं पचति चैत्र इत्यत्र न चैत्रपदात्तृतीयापत्तिरित्यर्थः॥ ६ ॥ ७ ॥ ६ ॥ ७ ॥

अथेति पूर्वपक्षी समाधत्ते। तथापि चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यादौ ज्ञानभेदेन विषयताभेदाभावात् चैत्रदर्शनमैत्रदर्शनोभयनिरूपितवि
षयत्वरूपकर्मतायाः कृताभिधानात् द्वितीयानुपपत्तिरिति चेन्नेति। अत्र मैत्रसमवेतदर्शनविषयत्वरूपकर्मताप्रधानक्रियानिरूपितकर्मतास्यैव
कृता दृश्यमानमिति कर्मशानचाभिहिता इति घटपदोत्तरं प्रथमास्यादनभिहिताधिकारीया द्वितीया न स्यादित्यर्थः। अथ सिद्धान्ती अनभिधानपदार्थं नि
र्वक्ति। तत् प्रातिपदिकार्थविशेषणत्वमात्रेण कर्मत्वकर्तृत्वाद्यविवक्षाया एव तदनभिधानपदार्थत्वादिति मूलम्। स स इति प्रातिपदिका
र्थस्तत्र प्रातिपदिकार्थे विशेष्ये विशेषणत्वमात्रेण न तु विशेष्यतया पि पाककर्मत्वाविवक्षा कर्तृत्वाद्यविवक्षा साविवक्षैव। तदनभिधानपदार्थत्वा

तथापि चैत्रेण दृश्यमानं घटं मैत्रः पश्यतीत्यादौ ज्ञानभेदेन विषयताभेदाभावात्। चैत्रदर्शनमैत्रदर्शनोभयनिरू
पितविषयत्वरूपकर्मतायाः कृताभिधानाद्द्वितीयानुपपत्तिरिति चेन्न॥ त। कर्मत्वकर्तृत्वानभिधानपदार्थत्वात्। एवञ्च चैत्रेण दृश्य

मानं घटं मैत्रः पश्यति इत्यादौ घटनिष्ठविषयत्वलक्षणा कर्मता घटं प्रति विशेष्यीभूता विशेष्यीभूतापि चैत्रसमवेतदर्शनविषयतावान् यो घटस्तद्वृत्तिर्या वि
षयत्वरूपकर्मता तन्निरूपकदर्शनसमवायि मैत्र इति शाब्दबोधात्। विषयता घटवृत्तिरिति विषयतारूपा कर्मता विशेष्या विषयतावान् घट इति विषयतारूप
कर्मता विशेषणमपि इति विशेषणत्वविशेष्यत्वोभयरूपेण विवक्षितत्वात् विशेषणत्वमात्रेण कर्मत्वस्य विषयत्वरूपस्य अविवक्षारूपानभिधानसत्वात् चैत्रेण दृ
श्यमानं घटं मैत्रः पश्यतीत्यत्र घटपदोत्तरं द्वितीयानुपपत्तिर्नास्तीत्यर्थः। चैत्रेण पच्यते तण्डुल इत्यत्र तण्डुलरूपप्रातिपदिकार्थविशेष्यकर्मतायाः विशेषण
त्वमात्रेण विशेषणमात्रेण विवक्षा इति अविवक्षारूपानभिधानाभावान्न द्वितीया किन्तु अभिधानात्प्रथमैव। एवं चैत्ररूपप्रातिपदिकार्थविशेष्यविशेषणत्वमा

त्रेणकर्तृत्वाविवक्षाविवक्षारूपानभिधानसत्वाच्चैत्रेणपच्यतेतण्डुलइत्यत्रचैत्रपदात्तृतीयाअत्रचैत्रेविशेषणंकर्तृत्वंविशेष्यंचैत्रवृत्तिकृतिज
न्यव्यापारजन्यफलशालीतण्डुलइतिशाब्दबोधादित्यर्थः। विशेषणमात्रेणेति। विशेषणत्वातिरिक्तविशेष्यत्वेनकर्मत्वकर्तृत्वाद्यविवक्षायाअभावव
त्वेसतिविशेषणत्वेनकर्मत्वकर्तृत्वाद्यविवक्षैवविशेषणत्वमात्रेणकर्मत्वकर्तृत्वाद्यविवक्षापदार्थः। तत्रअविवक्षायाअभावेसतीत्यत्रअभावद्वयनि
वेशप्रयुक्तगौरवम्। एवंविशेषणत्वेनकर्मत्वकर्तृत्वाद्यविवक्षारूपविशेष्यदलनिवेशप्रयोजनाभावश्चेतिमनसिनिधायफलितार्थमाह। तत्त
त्प्रातिपदिकार्थविशेष्यतयाकर्मत्वकर्तृत्वादिविवक्षायांद्वितीयादिविभक्तेःसाधुत्वमित्यर्थेतात्पर्यस्यपर्यवसितत्वादितिमूलम्। चैत्रेणदृश्यमा

तत्तत्प्रातिपदिकार्थविशेषणत्वमात्रेणकर्तृत्वकर्मत्वाद्यविवक्षायाएवतदनभिधानपदार्थत्वात्। तत्तत्प्रातिपदिका
र्थविशेष्यतयाकर्मत्वकर्तृत्वादिविवक्षायांद्वितीयाविभक्तेःसाधुत्वमित्यर्थेतात्पर्यस्यपर्यवसितत्वात्। शेषमाख्यातार्थविचा
रेविवेचयिष्यतइत्यलमत्राधिकेन॥ ॥ नंघटंमैत्रःपश्यतीत्यत्रसमवेतदर्शनविषयाभिन्नघटविषयताकदर्शनाश्रयोमैत्रइतिबोधात्घटादि
रूपनतत्तत्प्रातिपदिकार्थविशेष्यतायाविषयतारूपकर्मत्वेसत्त्वात्नद्वितीयानुपपत्तिरित्यर्थः। कर्मत्वकर्तृत्वादौप्रातिपदिकार्थनिष्ठविशेषणतानिरूपितविशे
ष्यतैवअनभिधानपदार्थइतिफलितम्। तात्पर्यस्यपर्यवसितत्वात्। निश्चितत्वात्। इदमनभिधानंनाभिधानाभावरूपपदलभ्यंयत्तन्नभवतिकिंतुतात्प
र्यविषयीभूतमित्यर्थः। शेषमाख्यातार्थविचारेविवेचयिष्यतइत्यलमत्राधिकेनेति। ननुप्रातिपदिकार्थस्यविशेषणत्वविवक्षायांतृतीयाविशेष्यत्वविवक्षायां
प्रथमेत्युक्तम्तत्रलकृत्तद्धितसमासैरभिधानंकुत्रोपयुज्यतइतिचेदाख्यातादिनाकर्तृत्वबोधविवक्षायामुक्तार्थत्वात्तृतीयानिराकांक्षा॥ आख्यातेनकर्मत्व

इतिव्युत्पत्तिवादेसुबर्थसंख्याविवरणम्॥ आख्यातद्विवचनबहुवचनयोस्तुसंख्याबोधकत्वमावश्यकमिति। आख्यातैकवचनस्यैकत्वम
र्थः किंत्वावश्यकसुप एकत्वमर्थः। आख्यातंविनापिद्रष्टव्योघटइत्यादौसुपएकत्वेशक्तिरावश्यकीतिभावः। कथयंति। सूचयंति। अत्राख्यात
मेवबहुत्वंबोधयतिबहुवचनस्यभावात् कलंकइतिप्रथमोपस्थितसुपः एकत्वलक्षणात्। समाधत्ते। कर्तृकर्मणोः कृतिषष्ठीअनुशिष्टानस्याः
कर्तृत्वादौलक्षणाअन्यथाऽनुशासनिकातिरिक्तविभक्तेरपिलक्षणांङीकारेणचैत्रोमैत्रश्चगच्छतः इत्यत्रचैत्रपदोत्तरसुपः मैत्रपदोत्तर।

आख्यातद्विवचनबहुवचनयोस्तुसंख्याबोधकत्वमावश्यकंचैत्रोमैत्रश्चगच्छतः चैत्रोमैत्रोदेवदत्तश्चगच्छंती
त्यादौचंद्रेकलंकः सुजनेदरिद्रताविकाशलक्ष्मीःकमलेषुचंचला। मुखाप्रसादःसधनेषुसर्वदायशोविधातुःकथयंतिखंडि
तम्इत्यादौचद्वित्वबहुत्वबोधकसुपोऽभावात्। नचतत्रसुवेकवचनस्यवद्वित्वबहुत्वादौलक्षणास्त्विति वाच्यं। आनुशा
सनिकातिरिक्तार्थेसुब्विभक्तेर्लक्षणायाअनभ्युपगमात्। अन्यथाचैत्रोमैत्रश्चगच्छतइत्यादाविवच्छंदसिलक्षणयैवद्वित्वादि
नाद्वित्वादिबोधनसंभवात्। औजसादिरूपादेशिस्मृतिद्वाराद्वित्वादिबोधनिर्वाहायछंदसिसुपांसुलुगित्यादिसूत्रेणऔ
जसादिस्थानेस्वाद्यादेशस्यवैयर्थ्यात्॥

॥सुपोवा। यथाहिद्वित्वेलक्षणातथाअनृक्षराऋजवःसंतुपन्थाः इत्यादिछन्दस्यपिपंथाःइतिसोरपिबहु
त्वेलक्षणास्तुपंथानइत्यर्थसंभवात्। पंथाइत्यत्रादेशेनसुनाऔजसादिरूपस्थानिस्मृतिस्तद्वाराद्वित्वबहुत्वबोधनिर्वाहायच्छंदसिसुपांसुलुगित्या
दिसूत्रेणौजसादिस्थानेस्वाद्यादेशस्यवैयर्थ्यात् इतिमूलम्। यद्यपिसुपांसुलुक्पूर्वसवर्णाच्छेयाडाड्यायाजालइतिसूत्रेनिर्विभक्तिकसुपदंअतःसुपां

प्रसक्तमित्यादिदीधितिवत् अङ्गः प्रतीकोऽवयव इति कोशात् तथापि विभक्त्यन्यस्य प्रतीकस्य धारणं सांप्रदायिकमिति सुरित्युपन्यस्तमिति भावः
अनुश्शराज्झ्रजवः संतु पंथाः इत्यत्र जसः सुरादेशः। परमे व्योमन् अत्र सप्तम्या लुक् धीसाम सा इत्यर्थे धीती मती इती ईकारस्य पूर्वसवर्णः एवमाद्धे
याडाड्यायाच् आल् इत्युदाहरणानि चैत्रादिपदोत्तरैकवचनस्य द्वित्वादिलाक्षणिकत्वे। तदप्रकृति चैत्रपदोत्तरसुपोऽप्रकृति मैत्रपदं तथा मैत्रा
दिसाधारणद्वित्वादिबोधे च प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति। सुसन्निविरोधेनानुपपत्तिश्च। चैत्रपदोत्तरं सुबेकत्वस्य मैत्रेऽन्वयानु
पपत्तिश्चेत्यर्थः। चैत्रमैत्राद्यनेकपदोत्तरानेकसुपां बहुत्वलक्षणया अनेकबहुत्वबोधापत्तिरपि द्रष्टव्येति तु एकवचनसुपो द्वित्वबहुत्वादिलक्षणे
ति भावः। आख्यातार्थद्वित्वादिप्रकारकान्वयबोधे च समानविशेष्यिका संख्याविशिष्य चैत्रमैत्रोभयरूपो विशेष्यो यस्या ईदृशी या तदर्थाख्यातार्थ

चैत्रादिपदोत्तरैकवचनस्य द्वित्वादिलाक्षणिकत्वे तदप्रकृत्यर्थमैत्रादिसाधारणद्वित्वादिबोधस्योक्तसुसन्निविरोधेनानुपपत्ते
श्च आख्यातार्थसंख्यान्वयबोधे च समानविशेष्यकतदर्थभावनान्वयबुद्धिसामग्री अपेक्षिता भावनायाबाधादिग्रहकाले
तात्पर्य्यशून्यकाले वा उक्तस्थले द्वित्वान्वयाबोधात्। भावनाया अविशेष्यधात्वर्थादौ संख्यान्वयाबोधाच्च नादृशसामग्र्याः ॥ ६॥

भावनान्वयबुद्धिस्तस्याः सामग्री अपेक्षिता। सामग्र्यपेक्षायुक्तिमाह॥ भावनाया इति। चैत्रमैत्रयोर्गमनानुकूलाकृतिर्नास्तीति बाधग्रहकाले एवं तत्र चैत्र
मैत्रोभयविशेष्यकभावनाप्रकारकान्वयबोधे। तात्पर्यशून्यकाले च। उक्तस्थले। चैत्रो मैत्रश्च गच्छत इत्युक्तस्थले। द्वित्वान्वयबोधाभावात् बाधाभावता
त्पर्ययोग्यताकांक्षादिज्ञानरूपा सामग्र्यपेक्षिता। तत्र समानविषयकेति विहाय समानविशेष्यकत्वनिवेशप्रयोजनमाह। भावनाया अविशेष्यधात्वर्थादौ
संख्याया बोधाच्चेति॥ संख्याप्रकारकान्वयबोधं प्रति समानविशेष्यताप्रत्यासत्त्याख्यातजन्यगमनानुकूलकृतिनिरूपभावनोपस्थितित्वेन कारणता चैत्रो

सु·टी० कार्यमाख्यातजन्यभावनोपस्थितिः कारणं च समानविशेष्यताप्रत्यासत्त्या चैत्रमैत्रोभयत्रास्ति तत्र समानविशेष्यतास्थाने समानविषयतानिवेशः।
११९ विषयतासंबन्धेन च गमनानुकूलकृतिरूपभावनोपस्थितिर्धात्वर्थगमनेपीति धात्वर्थविशेष्यकसंख्याप्रकारकशाब्दाभावाद्व्यभिचार इति वि
शेष्यतानिवेशः। धात्वर्थगमनादौ तु विशेष्यतासंबन्धेन गमनानुकूलकृतिभावनोपस्थितिसभावान्नव्यभिचार इति। गमनानुकूलकृतिमन्तौ हि स्व
विशिष्टौ चैत्रमैत्राविति बोधोदयात् तत्र बोधे संख्यान्वयबुद्धित्वमस्ति भावनान्वयबुद्धित्वं चास्ति भावनामविषयीकृत्याख्यातेन संख्यान्वयबोधः कदा
संख्यान्वयबुद्धित्वावच्छिन्नं प्रति न स्यात् तन्त्रेण हेतुता न तदवच्छेदकत्वेनेपि आख्यातजन्यसंख्योपस्थितियोग्यताज्ञानविशेषादिघटितसा
मग्र्या भावनानवगाहिसंख्यान्वयबोधस्य कदाप्यजननात्। संख्यान्वयबोधसाधारणभावनान्वयबोधत्वावच्छिन्ने हेतूनाम
पितादृशसामग्रीघटकत्वेनापत्त्यभावात्। न च तादृशकारणानां भावनान्वयबुद्धित्वं संख्यान्वयबुद्धित्वं वा जन्यतावच्छेदकमु
पेयते इत्यत्र विनिगमनाविरहः। संख्यामविषयीकृत्यापि भावनान्वयबोधस्यानुभवसिद्धत्वात्। द्वितीयस्य जन्यतावच्छेदकत्वा
संभवादिति दिक्। अथ गुणादिवाचकपदोत्तरद्विवचनबहुवचनयोः कथं द्वित्वादिबोधकता संख्याया गुणत्वेन गुणादौ बाधात्।
पिताभ्यां न जन्यते चैत्रमैत्राभ्यां भूयते इति भावाख्यातेन संख्यामविषयीकृत्यापि भावनाप्रकारकबोधाजन्यत्वे इति संख्यान्वयबोधपरत्वापके भावना
न्वयबोधत्वमेवाख्यातजन्योपस्थितेः कार्यतावच्छेदकमभ्युपगन्तव्यमिति। द्वितीयस्येति। द्वितीयस्य संख्यान्वयबुद्धित्वस्य भावनान्वयबुद्धिसामग्रीजन्य
तावच्छेदकतासंभवादित्यर्थः। दिगिति। भावनान्वयबुद्धित्वसंख्यान्वयबुद्धित्वयोरुभयोर्भावनान्वयबुद्धिसामग्रीकार्यतावच्छेदकत्वे विरोधिबुद्धिसामग्रीप्रतिब
न्धकतास्थले प्रतिबध्यप्रतिबन्धकभावद्वयापत्तिरिति दिगर्थः। अथ गुणादिवाचकपदोत्तरेति। बाधात्। समवायेन गुणे गुणानङ्गीकारादिति भावः। ८ ॥११९

मु॰ टी॰ पूर्वपक्षी शंकते। नचेति। नत्र। रूपेरूपाणीत्यादौ। द्रव्यसमवेतं द्वित्वादिस्वाश्रयसमवेतत्वसंबंधेन घटपटादिसमवेतं द्वित्वादिकं तदाश्रयघटादिसमवेतत्वसं
१२० बंधेन द्वित्वादिकं रूपे भासत इत्यर्थः। शंककः समाधत्ते। एकव्यक्तावपितादृशसंबंधेन द्वित्वादेः परिसमाप्ततया एकमात्रतात्पर्येणापि द्विवचनाद्यापत्तिरित्य
र्थः। अथैतादृशुक्तशंकायां समाधत्ते। अपेक्षाबुद्धिविषयत्वमेवेति। रूपेरूपाणीति रूपपदोत्तरद्विवचनादिना। इदमेकमिदमेकं रूपमित्यपेक्षाबुद्धिविषयत्वरूपं
द्वित्वादिकं बोध्यते। नचापेक्षाबुद्धिविषयत्वरूपद्वित्वबहुत्वस्य एकमात्रवृत्तिधर्मस्य रूपत्वसंयोगत्वादेः प्रकृत्यर्थतावच्छेदकत्वस्थले रूपेरूपाणि संयोगे
संयोगा इत्यादौ रूपत्वसंयोगत्वादेरेकमात्रधर्मस्य प्रकृत्यर्थतावच्छेदकत्वस्थले रूपत्वसंयोगत्वादिरूपप्रकृत्यर्थतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसं

नचतत्रस्वाश्रयसमवेतत्वादिसंबंधेन द्रव्यगतं द्वित्वादिकमेव भासत इति वाच्यम्। एकव्यक्तावपितादृशसंबंधेन द्वित्वादेः परिस
माप्ततया एकमात्रतात्पर्येणापि द्विवचनाद्यापत्तिरिति चेत्। मैवम्। अपेक्षाबुद्धिविषयत्वमेव तदुत्तरद्विवचनादिना बोध्यते। नचै
कमात्रवृत्तिधर्मस्य प्रकृत्यर्थतावच्छेदकत्वस्थले प्रकृत्यर्थतावच्छेदकव्याप्यत्वविशिष्टपर्याप्तिसंबंधेन प्रकृत्यर्थेऽन्वेति।
अन्यत्र शुद्धपर्याप्तिसंबंधेनेति न द्वंद्वादिस्थलोक्तदोष इति विदुषां परामर्शः॥ इति प्रथमा १॥ बंधेन प्रकृत्यर्थे रूपसंयोगादौ द्वित्वबहुत्वा
दिकमन्वेतीत्यर्थः। अन्यत्रेति। यत्र संयोगविभागाविति तत्र प्रकृत्यर्थतावच्छेदकं नैकं किन्तु संयोगत्वविभागत्वरूपं नाना शुद्धपर्याप्तिरेव द्वित्वादौ नां संबन्धः
तत्र संयोगविभागाविति तत्र द्वित्वपर्याप्तिर्न संयोगत्वव्याप्या न वा विभागत्वव्याप्येति। न द्वन्द्वादिस्थलोक्तदोष इतीति। धवखदिराविति तत्र धवद्वयखदिर
द्वयबोधापत्तिरूपदोष इत्यर्थः। प्रकृत्यर्थतावच्छेदकधवत्वव्याप्यायाः पर्याप्तेर्धवद्वय एव। एवं प्रकृत्यर्थतावच्छेदकखदिरत्वव्याप्यापर्याप्तिः खदिरद्व
य एवेति प्रकृत्यर्थतावच्छेदकव्याप्तपर्याप्तिसंबंधेन न द्वित्वान्वयः स्वीक्रियते किंतु शुद्धपर्याप्तिसंबंधेनैवेति भावः॥ इति व्युत्पत्तिवादे प्रथमाविभक्त्यर्थः

इस्तिहार दिया जाता है ग्राहक लोगों को कि बम्बई कलकत्ता· लखनऊ· इलाहाबाद पूना· आगरा· दि
ल्ली· मेरट· बनारस· और कई एक छापे की पुस्तक हमारे इहां मौजूद हैं जिन महाशयों को लेना होय
तो आप आने का टिकट भेज को संस्कृत और भाषा सूचीपत्र मंगाय लेवैं उस्मे पुस्तकों का नाम और दर
लिखा है॥ ॥इस कार्य के संपादक· बाबू कोलेश्वर सिंह बुक्सेलर बनारस· ॥ ✽ ॥